P.	D;Sk.	13×27 50;7;33	C	Good; V.S.1912	
P.	D;Sk.	12.5×27 37;7;39	C	Good; V.S.1912	
P.	D;Sk.	13×27 10;12;36	Inc.	Good; 20th c.	'Varṣa-phala-udāharaṇa' only.
P.	D;Sk.	15.5×32 69;9;46	C	Good; V.S.1912	Composed in V.S. 1686; Scb.—Lālārāma.
P.	D;Sk.	13.5×25.5 90;10;32	C	Good; 20th c.	
P.	D;Sk.	13×25.5 89;7;26	C	Good; V.S.1912	
P.	D;Sk.	13×26.5 36;7;27	Inc.	Good; 20th c.	Further text missing.
P.	D;Sk.	16×33.5 38;9;39	Inc.	Good; 20th c.	"
P.	D;Sk.	15×30.5 626;7;31	C	Good; V.S 1910	With Index on 12 additional folios; Scb.—Lālūrāma; Pl.—Alavara.

1	2	3	4	5
24 (iv)				
5940	2879	Ramala-valī	Bhaya-bhañjana Śarmā	
5941	2871	Ramala-śāstra (Ramala-roṣana)	Cintāmaṇi Paṇḍita	
5942	2881	Ramala-sāra	Śrīpati Bhaṭṭa s/o Lakṣmīnṛsiṁha	
5943	6095	"	"	
5944	2878 (2)	Ramala-saṁhitā		
5945	2882	Ramalendu-prakāśa	Rudradhara Tripāṭhī	
5946	2987	Rājavijaya-svarodaya	Raṇahastī	
5947	2725	Lampāka with Ṭīkā	Padmanābha	Padmanābha
5948	3006	Vasantarāja-śākuna	Vasantarāja	
5949	3007	"	"	
5950	5521	"	"	
5951	3005	" with Ṭīkā	"	Bhānucandra
5952	2997	Vijaya-kalpalatā	Cakrapāṇi	
5953	6093	Śakuna-ratnāvalī with Ṭīkā		
5954	2829	Śakunāvalī		
5955	5956	Śiva-svarodaya with Ṭīkā		
5956	6269	"		
5957	6198	Ṣaṭ-pañcāśikā with Ṭīkā	Pṛthuyaśa	Bhaṭṭotpala

6	7	8	9	10	11
P.	D;Sk.	16.5×32 186;9;38	C	Good; V.S.1912	
P.	D;Sk.	13×26.5 24;8;28	C	Good; 20th c.	'Praśna-tantra' only.
P.	D;Sk.	12.5×27 24;7;30	Inc.	Good; 20th c.	Commencing & last portion missing.
P.	D;Sk.,	19×33.5 13;13;38	C	Good; 20th c.	Composed in V.S. 1899 at Gokula.
P.	D;Sk.	13.5×21.5 287;15;9	C	Good; 19th c.	
P.	D;Sk.	16.5×22 39;14;15	C	Good; V.S.1912	
P.	D;Sk.	12.5×24.5 120;8;32	Inc.	Good; 20th c.	Further text missing.
P.	D;Sk.	13×27 32;14;43	C	Good; V.S.1909	
P.	D;Sk.	14×33.5 66;12;45	C	Old; V.S.1826	Brittle & torn.
P.	D;Sk.	11×24 100;10;37	C	Good; 20th c.	
P.	D;Sk.	11.5×34.5 127;8;44	C	Good; 20th c.	Scb.—Bālādatta.
P.	D;Sk.	19.5×38 117;12;41	C	Good; V.S.1907	
P.	D.Sk.	20×38 47;12;48	C	Good; V.S.1912	With coloured Cakra; Scb.—Hirālāla; Pl.—Alavara.
P.	D;Sk.	17×26 29;11;25	C	Good; 20th c.	
P.	D;Sk.	12.5×29.5 6;6;32	C	Good; 20th c.	From—Skanda-purāṇa.
P.	D;Sk.;	13×17.5 24;7;16	Inc.	Good; 20th c.	F. 1st missing.
P.	D;Sk.	17×13 21;7;15	C	Good; V.S.1928	
P.	D;Sk.	34×13 16;10;40	C	Old; V.S.1908	Moth-eaten; Scb.—Devadatta Śarmā.

1	2	3	4	5
24 (iv) 5956	6202	Ṣaṭ-pañcāśikā with Ṭīkā	Pṛthuyaśa	Bhaṭṭot-pala
5959	2850	" "	"	"
5960	2851	" "	"	"
5961	5468 (5)	" "	"	"
5962	5581	" "	"	"
5963	2995	Sapta-nāḍī-cakra	Narapati	
5964	2984	Samara-vijaya		
5965	2974	Samara-sāra	Rāma Daivajña s/o Sūryadāsa	
5966	2975	"	"	
5967	2976	"	"	
5968	5518	"	Rāmacandra Daivajña	
5969	2977	" with Ṭīkā	"	Bharata
5970	5519	" "	"	"
5971	5508	" "	"	"
5972	2994	Sarvatobhadra		
5973	5373	Svapna-cintāmaṇi		
5974	3802	Svapnādhyāya		
5975	3803	"		

6	7	8	9	10	11
P.	D;Sk.	31×11 6;7;44	Inc.	Old; V.S.1921	Brittle.
P.	D;Sk.	13.5×37 20;12;36	C	Old; 19th c.	
P.	D;Sk.	13×24.5 20;10;39	C	Good; V.S.1910	Scb.—Nirbhayarāma.
P.	D;Sk.	15.5×24 17(11-27); 18;25	C	Old; V.S.1942	
P.	D;Sk.	18×30.5 12;15;49	C	Good; V.S.1928	Scb—Premdāsa Mahanta.
P.	D;Sk.	12.5×25.5 9;8;29	C	Good; 20th c.	From—Narapati-jayācaryā.
P.	D;Sk.	13×25 33;9;28	C	Good; V.S.1909	From—Rudrayāmala-tantra.
P.	D;Sk.	11×21.5 20;6;26	C	Good; V.S.1879	Scb.—Bhagavāna; Pl·—Mauja-pura.
P.	D;Sk.	10.5×22.5 10;12;32	C	Good; V.S.1844	Scb —Rāmakṛṣṇa.
P.	D;Sk.	12×27 14;7;31	C	Good; V.S.1880	
P.	D;Sk.	11×27 14;8;33	C	Good; 19th c.	
P.	D;Sk.	13×25.5 50;8;27	C	Good; V.S 1899	
P.	D;Sk.	11×27 43;9;35	C	Good; 19th c.	
P.	D;Sk.	11×28 26;10;42	C	Good; 19th c.	
P.	D;Sk.	13.5×25.5 29;7;25	C	Good; 20th c.	From—Narapatijayacaryā.
P.	D;Sk.	10×19 32;9;20	Inc.	Good; 19th c.	F. 2nd missing.
P.	D;Sk;	9.5×25.5 9;7;32	C	Good; 19th c.	Scb.—Śivadayāla.
P.	D;Sk.	11×20 6;7;27	C	Good; V S.1898	

1	2	3	4	5
24 (iv) 5976	6023	Svapnādhyāya		
5977	2985	Svara-pañcāśikā	Nandarāma Miśra	
5978	2992	Svarodaya-tātkālika-candra-jñāna		
5979	2993	Haṁsacāra-svarodaya		
5880	3002	Hasta-sañjivana with Ṭīkā	Meghavijaya Gaṇi	Megha-vijaya Gaṇi
5981	3004	"	"	"
24 (v) 5982	5053	Gaṇita-nāma-mālā		
5983	3010	Pārasīka-prakāśa	Vedāṅgarāya	
5984	3325	"	"	
25 5985	4654	Abhilaṣārtha-cintāmaṇi (Mānasollāsa)	Someśvaradeva	

6	7	8	9	10	11
P.	D;Sk.	12×18.5 1;12;14	C	Good; V.S.1895	Scb.—Sukhadeva Pujārī.
P.	D;Sk.	12.5×26.5 6;9;36	C	Good; V.S.1908	
P.	D;Sk.	13.5×25.5 6;7;23	C	Good; 20th c.	
P.	D;Sk.	8.5×18 4;8;36	C	Good; 20th c.	
P.	D;Sk.	13.5×25.5 63;9;28	Inc.	Good; 20th c.	Begins from 'Nakṣatra-cakra'; Further text missing.
P.	D;Sk.	13.5×25 71;9;32	C	Good; V.S.1909	
P.	D;Sk.	13×20 19;9;19	C	Good; V.S.1900	Scb.—Śivdāsa Boharā.
P.	D;Sk.	10×23.5 22;8;43	C	Good; V.S.1861	Composed in V.S. 1643.
P.	D;Sk.	12.5×26.5 11;7;30	C	Good; V.S.1912	
P.	D;Sk.	12×34 180;20;17	C	Good; 20th c.	

APPENDIX

(Extracts from important Manuscripts)

99/161 नीतिमञ्जरी-भाष्य-वेदार्थप्रकाशसह

OPENING :

श्री गणेशाय नमः ।

दिवाकरं प्रणम्यादौ मुकुन्दं च द्विवेदिनम् ।
वेदवेदाङ्गतत्वज्ञं स्मृतिज्ञं दीक्षितं प्रभुम् ॥१॥

तस्य नप्ता युवा यज्वा युवधर्मोऽल्पबुद्धिमान् ।
एकादशप्रकारैस्तु संहितापाठतत्परः ॥२॥

वसंश्च श्रीमदानंदे सुरभूसरमण्डिते ।
तेनेयं रचिता यस्मात्तन्नाम युवदीपिका ॥३॥

विलोक्य संहितामध्य इतिहासान्पुरातनान् ।
कृता वै धर्मसंयुक्ता श्लोकैर्बद्धा सुबुद्धिदा ॥४॥

अध्येया चार्थदा विप्रैर्धर्मिष्ठैः सत्यवादिभिः
अल्पज्ञेन कृता यस्माच्छोधनीया सुबुद्धिभिः ॥५॥

ऋज्वर्थाः इमे श्लोकाः । तथाप्युच्यते । दिवाकरं प्रणम्येति । ननु सर्वदेवान्त्स्यक्त्वा दिवाकरनमस्कारे किं प्रयोजनम् ? प्रयोजनमस्त्येव किम् ? दिवाकरे नमस्कृते सर्वे देवा नमस्कृताः भवन्ति ।

ततो विद्वत् प्रार्थना–

CLOSING :

विना वित्ति (विधि) केशवमीश्वरं वा;
न विद्यते वेदकृतोबुधोऽन्यः ।
अनाकयचिन्त्य (अनायकत्वाच्च विचिन्त्य) शोध्यं,
वक्तुं क्षमोद्या (वा) –न यतोऽल्पबुद्धिः

COLOPHON :

विन्दुश वै (शरशरै) केनमिते संचतिडम्बुधौ ।(?)
वत्सरे माघ शुक्लादावकरोद्द्यातिथाविमाम् ॥

अङ्कानां वामतो गतिरित्युक्तत्वाद् बिन्दुपञ्चपञ्चाङ्केन तं वाम-गणितेन संवत्सम्वदशपञ्चाशे वत्सरे दुन्दुभिनाम्नि माघशुक्लादौतिथौ प्रतिपदि द्याद्विवेद इमां नीतिमञ्जरीं सभाष्यमकरोत् ॥

Post-Colophonic : इति श्रीमत् (द्) द्याद्विवेदकृते नीतिमञ्जर्याख्ये भाष्येऽष्टमाष्टकः समाप्तः । शुभंभवतु ।

x x x

406/643 ताण्ड्यभाष्य (ब्राह्मण)

OPENING :

श्रीगणाधिपतये नमः । ओम् नमोः सामवेदाय ।

नमो विघ्नहर्त्रे, नमः ।
अभीष्टसम्यक् प्रवणो विधाता ।
निसर्गचेष्टाप्रशमक्रमेण ।
यः स्वास्थ्य. . . . . ।
नारायणं तं प्रणतः प्रपद्ये ॥१॥

मातेव या चित्रफलप्रदानैर्नी-
चात्मसाम्मुख्यमथान्यपूर्वम् ।
त्रयीप्रपञ्चोपशमं प्रधानं
नारायणं तं प्रणतः प्रपद्ये ॥२॥

राणायनीयकाचार्य्यौ त्रय्यनुष्ठानतत्परौ ।
वन्दे पितृपितृव्यौ च तौ हरिस्वामिसुन्दरौ ॥३॥

जयन्ति गुरवो वन्द्या . . . . . ।
सुप्रसिद्धान्ता शब्दन्यायप्रभाकराः ॥४॥

सद्ग्रन्थार्थप्रचारार्थं सन्मनोव्योमनिर्ज्जितम् ।
स्वच्छैसूलमलासंगोनय . . . . ॥५॥

पञ्चात्र पञ्चिका पूर्वब्राह्मणे पञ्चविंशके ।
कृताकृतधियामर्थे सर्वार्थो . . . ॥६॥

तस्य प्रतिपदं व्याख्यां निधानाद्य . . . ।
. . . श्वन्यायचन्द्रैः परिष्कृताम् ॥७॥

पण्डितधियां ताण्डकार्थप्रकाशिकाम् ।
. . . सैवाह माणिक्यमाला ॥८॥

COLOPHON : (पत्र संख्या १२६ पर)
इति सप्तमस्य दशमोनुवाकः ।
पञ्चविंशार्थमालेयं या जयस्वामिना कृता ।
हरिस्वामिसुतेनास्यां सप्तमोगात्प्रपाठकः ।

CLOSING : आपूर्यमाण शब्दो वामावास्याम् मित्रः प्रमीयतेस्त्रायतेऽहि रक्षः पिशाचचौरसरीसृपादिभ्यस्त्रायते रात्रिर्वरुणो वृणोति तमसा एवमर्द्धमास इत्यादि ।

x x x

415/655 सामविधानभाष्य

श्रीगणेशाय नमः । सामवेदाय नमः ।

OPENING : ओम् ईश । उक्ता हाहीन सत्रात्मकाः यज्ञाः ।

अथातः सामविधानभाष्योक्तपञ्चस्वाध्यायसं (ग)त साध्यफलप्रसाधकमिति विवक्षुराह । ब्रह्म हवा इदमग्र आसीत्तस्यतेजो-रसोत्परिच्यत स ब्रह्मासमभवत्तूष्णीम् मनसाध्यायतस्य यन्मन आसीत्स प्रजापतिरभवत्त (स्र) स्मात्प्राजापत्यां मनसा जुह्वति मनोहि प्रजापतिः भवति इदं जगदित्वं पूर्व ब्रह्म.तु न नामरूपमनुव्याख्यास्यामः ।

CLOSING : अथास्य सामविधिभागस्याध्ययनाधिकारिणमाह । सन्तवानाय ब्रह्मचारिणे समावर्त्तमानाख्यास्समावर्तनायेति अन्यं सर्वं वेदभागमधीत्य गुरुकुलात्समार्तिष्यभनषेति, आख्याय आख्येयः स्पष्टमन्यदिति । अथावासिनः आह उपाध्यायं ग्रामवरं सहस्रश्चेतन्चाश्वं प्रदायानुज्ञातो वायं कामं कामयते तमाप्नोति ।

COLOPHON : इति सामविधाने आचार्यभरतस्वामिकृतौ पदार्थमात्रकृतौ तृतीयोऽगात्प्रपाठक इति सामविधानभाष्यम् समाप्तम् ।
शुभमस्तु ।

Post-Colophonic : संवत् १९०५ शाके १७७० मार्गशीर्षकृष्णातिथौ शनिवासरे । लिषायतं श्रीमन्महाराजाऽधिराजेन्द्रश्रीसवाईविनयसिंहजीबहादुर ॥
लिखितं भगवान । शुभम् ।

x x x

885/3966 श्रौतपद्धतिः

श्रीगणेशाय नमः ।

OPENING : विद्यानां विभवं शिवं शिवकरं नत्वा गणेशं गिरं
ज्ञात्वा वेदवचांसि कर्कविवृतिं सत्संप्रदायान्विताम् ।
श्रौतस्मारणकर्मपद्धतिमिमामृज्वीं महार्थामहं
वक्ष्ये याज्ञिकवल्लभां गुरुपदाम्भोजप्रसादोज्ज्वलाम् ॥१॥

श्रीमच्छ्रीमालनामप्रथितगुणगणं सत्पुरं भाति भूमौ,
सारं त्वादाय तूनं विबुधनिलयतो निर्मितं पापतापम् ।
सत्तीर्थादित्यवृन्दैर्मुनिजननिवहैर्भूषितं भूमिभूषं,
वेदेज्यादानचञ्चुद्विजगणशमिताशेषदोषं सतोषम् ॥२॥

श्रीमाले संबभूव द्विजवरतिलकः कान्तकीर्तिः क्रियावा–
न्सुर्द्देवो नाम तस्मादजनि गुणनिधिर्दीक्षितो देवशूरः ।
नाना सच्छास्त्रवेदी श्रुतिविमलमतिर्दानशौण्डप्रकाण्डं,
तज्जोऽभूत्तोल्लदेवो द्विजगुणविमलः सत्यसन्धः सुवन्द्यः ॥३॥

तस्माद्गङ्गाधरोऽभूद्बहुसवनचणश्चिन्तितार्थप्रदायी,
सोऽयं प्रासूत पुत्रावविनिसुवयालङ्कृति एतयोस्तु ।
ज्यायान्धन्यो वदान्यो नृपतिशतशिरोरत्नवद्भासुराद्रि–
र्वेदाध्यायी विनीतो दशमनिरतः कर्मशीलः सुशीलः ॥४॥

तस्यायं योनुजन्मा श्रुतविमलमतिः श्रीमहादेवनामा
साग्निः सत्यार्थनामा द्विजवरतिलको वेदवेदान्तवेदी ।
साचारः सत्यशीलो यमनियमरतो धर्मशास्त्रेष्वधीति—
र्दाता धर्मावतारो भुवि विजययुतो यज्ञविद्यावदातः ॥५॥

अन्तर्मेदिनि मेदिनिपतिसमो मान्यो वदान्योऽग्रणी-
रन्तर्वाणिचरो विचारविदुरो वेदार्थविद्विश्रुतः ।
तर्के कर्कशगीः स्मृतौ विमलधीर्जज्ञे ततो याज्ञिको,
जातौ तेन सुतौ महर्षिरुदयो विद्याविनीतावुभौ ॥६॥

तस्यानुजो धर्मसुधानिधानं,
लक्ष्मीधरो लक्षगुणैर्वलक्षः ।
धरामरेज्यः श्रुतवेदवेदी,
श्रीवासुदेवाङ्घ्रिसरोजभृङ्गः ॥७॥

CLOSING : इति कुलवर्णनम् ॥
अनुक्तं प्रागुक्तं द्रष्टव्यम् ।

COLOPHON : इति दीक्षितमहादेवकृतौ श्रौतपद्धतावतिरात्रः समाप्तः ॥

543/450 कातीययजुर्वेदमञ्जरी

OPENING :

श्रीगणेशाय नमः ।

यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात्पुंसां सर्वत्र (ज) यमङ्गले ।

समभूदवनौ वनीपकानां,
सुरशाखी सुकृती ततः क्षितीशात् ।
सहदेवनराधिपो यदोजः,
प्रतिबिम्बा ननु भानुवाडवाद्याः ॥१॥

आसीदमुष्मात् प्रबलप्रतापः,
श्रीहंसपालः प्रतिपक्षपालः ।
वाञ्छाधिकं दानमुदीक्ष्य यस्य,
पञ्चत्वमापुः किमु कल्पवृक्षाः ॥२॥

ततोजनि श्रीमहसां निदानं,
सन्मङ्गलो मङ्गलभूमिपालः ।
पदत्रयं येन हरेः पवित्रम्
कीर्तिप्रसूनैरमहि प्रगल्भैः ॥३॥

तस्मादितस्सारकलाविलासः
श्रीवीरवालो जगदेकपालः ।
आसीच्छुनासीरयशा मघोनः
संस्पर्द्धमानः क्रतुभिःशतेन ॥४॥

गुणाववाले धनसत्त्वबीजान्निरन्तरं दानजलावसेकैः ।
उदीयमाना निजवंशमुच्चैरालम्ब्य यत्कीर्त्तिलता जजृम्भे ॥५॥

तस्मादभूदरिविभूतिभूतलक्ष्मीः
अक्षीणपुण्यविभवो जसपालदेवः ।
निर्वैरिणं क्षितितलं प्रविधाय शान्तो
रामाश्रयात् परशुराम इवाभिरेमे ॥६॥

नीहारहारहरहासविकासिकाश-नीकासनिर्भरमनोहरकीर्त्तिवल्ल्यः ।
दिग्दन्तिदन्तवलनक्रमतो वितानाः, पुष्यन्ति तारकमिषादधुनापि यस्य॥७॥

लक्ष्मीपतिप्रणयकेलिगृहादमुष्माद्, दुग्धाम्बुधेरमृतभानुरिवोदयासीत् ।
भूभृत्किरीटनिवहेषु पदं दधानः,...कलाभिरमलो मरुराजदेवः ॥८॥

यस्य प्रतापतपने समुदीयमाने, वैरिक्षितीशा कमलावलयोनिमीलाम् (?)।
स्वैरं प्रयान्त्यपि च बान्धवकैरवाली, पद्माश्रयां मुदमुपैति विचित्रमेतत्॥९॥

निर्दूषणा प्रियतमापि गृहादनेन, लक्ष्मीविनोदनवशम्बदमानसेन ।
निष्कासितास्ति कुरुकं त्विति किं प्रवक्तुं कीर्त्तिः परिभ्रमति दिग्वलयं यदीया॥ ।१०॥

दानैर्निवृत्तिपदवीं नयतोर्थिनश्च, प्रत्यर्थिनं च न शिरःप्रणयं दधानः ।
यः संसदि स्फुरति चाद्भुतमन्त्रशक्तिर्विस्मापितामरगुरुर्गुणरत्नभूमिः॥११॥

यो निश्चिनोति विदुषामपि संशयेषु,
धर्मे श्रुतिस्मृतिगतानभिधेयभावान् ।
यश्चातनोति निखिलासु कलास्वभिज्ञो,
यज्ञान् (न्न) यज्ञमहितानहितापकारी ॥१२॥

स यजुर्मञ्जरीं रम्यां करोति कृतिनाम्मुदे ।
नानाविधफलव्यूहप्रसवोल्लासितश्रियम् ॥१३॥

विरच्य भाष्यं विविधांश्च कल्पा-
नेतस्य तोषाय मुदा व्यतानीत् ।
भट्टस्वय भूतनयोऽत्र विद्वान्,
श्रीकालनाथः सहकारिभावम् ॥१४॥

CLOSING : आसीयम् इति तिलाहुति शतसहस्रं जुहुयात् विपांशो भवति ब्राह्मणमपि लक्षहोमेन तारयेत् इति रणदीक्षाप्रकारः । इति चतुर्थः ।

x x x

612/3546 अश्वमेध (यज्ञ) पद्धतिः

OPENING : श्रीगणेशाय नमः ।
॥ ॐ ॥

अश्वमेघमखस्येह पद्धतिः सर्वसम्मताः ।
वीरभद्रात्मजेनेयं महानन्देन तन्यते ॥१॥

CLOSING : श्रौतानुष्ठानगीर्वाणगुरुभिर्गुरुभिर्भुवि ।
पाठकश्रीमहानन्दैः स्मार्तैऽतिनिपुणैरयम् ॥
अश्वमेधाख्ययज्ञस्य प्रयोगस्त्वतिनिर्मलः ।
निरमायि सतां लुब्धै नितरां स जयत्वलम् ॥

COLOPHON : इति श्रीमन्महायाज्ञिक धुरंधर-पाठक कुलप्रदीप-पाठक-श्रीवीरभद्रात्मज-पाठक-श्रीमहानंदविरचितोऽश्वमेध-प्रयोगो विद्वद्वराणां श्रौतस्मार्तकर्मनिपुणानां सन्तोषाय चिरं भूयादिति शिवं ।

Post-Colophonic : संवत् १८६१ वर्षे श्रीमन्नागरज्ञातीय पण्डितोपनामक चन्द्रदेवात्मज पण्डितोपनामक-कान्हदेवनपात्-पण्डितोपनामक श्यामदेवसूनुना सुरदेवेन प्रयोग-लेखः कृतः ।

श्रीसाम्प्रबसन्नः ॥

641/569 आपस्तम्ब-शुल्व-रहस्य-प्रकाशः

OPENING :

श्रीगणेशाय नमः ।

यस्य पूःप्राणिनः सर्वे यो हेतुर्जगतां सताम् ।
तं यज्ञपुरुषम्वन्दे स्वर्गादिफलदायिनम् ॥१॥

विघ्नशतेन सहितं देवं द्वैमातुरं सदा ।
सरस्वतीं तथा देवीं प्रणमामीष्टसिद्धये ॥२॥

कलिताखिलविज्ञेयं करूणैकनिकेतनम् ।
आपस्तम्बं मुनिश्रेष्ठं परमाप्तम्भजे सदा ॥३॥

यासामनुग्रहो भूयात्कोपि मद्गोचरः शुभः ।
ग्रथनाहेतुतामेति ता वन्दे गुरुदेवताः ॥४॥

वाधूलान्वयरङ्गराजविदुषः शिष्येण विद्यानिधे-
र्गार्ग्यश्रीनरसिंहयज्वतनयेनोद्ग्राहिणी निर्मला ।
आपस्तम्बमुनीन्द्रवक्त्रजनुषां शुल्वाह्वयानां गिरां,
गोपालेन विरच्यते नयवती सद्याज्ञिकालङ्कृतिः ॥५॥

मया यथासूत्रमियं यथामति
प्रणीय तेभ्यः परिदीयतेऽधुना ।
य एव सन्तो जगतीह याज्ञिका
विदूष्यतां तैर्यदिवाभिनन्द्यताम् ॥६॥

सूद्योगोन्यायविद्धीमान्जातः श्रोता सुशिक्षितः ।
शुल्वानां धारकः सम्यक्तदर्थान्बोद्धुमर्हति ॥७॥

एवं शुल्वरहस्यबोधजननी सदर्शिता पद्धति-
र्ज्ञेयैषैव यतः समस्तमुपयोग्यत्रोदितं कर्मसु ।
श्रद्धा यस्य दृढेश्वरादिषु परांभक्तिश्च धीर्योत्तमा,
सत्त्वे नावलम्ब्य शौल्वमखिलं तत्त्वं परिज्ञास्यति ॥१॥

विशोध्यतां साधुपदार्थवेदिभिः सुवृतशीलैः परिगृह्यतामपि ।
इयं न दीयेत हितार्थिभिर्जनैरसूयकायानृजवेऽयजे च ॥२॥

मत्कृततादुनिकत्वं व्याख्यानान्तरविरोध इत्येते ।
मानविरोधाभावे नास्याः दोषाः स खलु दोषः ॥३॥

उपनिषत्स्मृतिनीतिविशारदाः यमनु संदधते हृदि योगिनः ।
स्वविषयां मम भक्तिमचञ्चलां स तनुताद् भगवान्मखपूरुषः ॥४॥

CLOSING: विधिविष्णुशिवादिदेवता आपस्तम्बमृषींस्तथापरान् ।
प्रणमामि गुरून्महीसुरानपि नित्यं सुकृताभिवर्द्धनात् ॥५॥

COLOPHON : इति श्रीमद्वाघूलश्रीरंगराजमिश्रशिष्यस्य गार्ग्यस्य गार्ग्यश्री नरसिंह-सोमवत्सुतस्य गोपालस्य कृतावापस्तम्बशुल्वरहस्यप्रकाशने भाष्ये षष्ठः पटलः ।

आलोच्य मूलमानानि गोपालो यदरीरचत् ।
समाप्तन्तदिदं भाष्यं शुल्वतत्त्वप्रकाशनम् ॥
शुभं भवतु । श्री कृष्णाय नमः ।

x x x

643/566 आपस्तम्बशुल्वसूत्र-टीका

OPENING : श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥

ओमित्येकाक्षराख्येयं वन्दे वाङ्मनसातिगम् ।
पश्यन्ति सूरयो यद्धि तद्विष्णोः परमम्पदम् ॥१॥

लक्ष्मीसहायमतसीकुसुमच्छवि शाश्वतम् ।
ज्योतिर्मे हृदये भूयात्सदा राजीवलोचनम् ॥२॥

आपस्तम्बाय मुनये नमो वेदार्थभूमये ।
तत्सूत्र उक्तास्तिष्ठन्ते यज्ञाश्रुतिकुमारिकाः ॥

तत्सूत्रशुल्वव्याख्येयमक्षरार्थाविबोधिना ।
करविन्दाभिधेयेन क्रियते भाष्यकृन्मते ।।

CLOSING : अतः प्रकृतौ पुरूषाणामेव सख्यासंयोगात् अश्वमेधेऽपि एकविंशाग्नौ पुरूषाणामेव संख्यासंयोगो युक्तः इति । अरत्नि प्रायेतरं अरत्निना दक्षिण इति कुर्यादित्यर्थः । एतदुक्तं भवति त्रिस्तावैकविंशतिप्रकारद्वयविधेः त्रिस्तावैकविंशोग्निः ब्राह्मणदर्शनात् द्वादशवास्यां द्विरुक्तिः प्रश्नसमाप्ति द्योतनार्था ।

COLOPHONIC : इति श्री **करविंदस्वामिकृतौ** शुल्वटीकायां षष्ठः पटलः समाप्तः ।

x x x

673/387 कात्यायनशुल्वसूत्र-भाष्यसह

OPENING : श्रीगुरुगणपतिशारदाभ्यो नमः ।

जयत्येको जगत्यां श्रीहरिशंकरदीक्षितः ।
त्रयी सारविवेक्तृश्रीरामचन्द्रगुरोर्गुरुः ।।१।।

रामचन्द्रगुरून्नत्वा गर्गकर्कादियाज्ञिकान् ।
श्रीकात्यायनशुल्वस्य कुर्वे भाष्यमिदं स्फुटम् ।।२।।

CLOSING : रामचन्द्रतनूजेन श्रीगङ्गाधरशर्मभिः ।
पितृचरणैः सूत्रेऽस्मिन् कातीये शुल्वसंज्ञके ।।१।।

विवृतं यत्ततः शिष्टं तदिह विवृतं मया ।
गङ्गाधरतनूजेन रामकृष्णेन धीमता ।।२।।

नागरज्ञातिसंज्ञेन काशीपुरनिवासिना ।
याज्ञिकास्तेन तुष्यन्तु प्रीयतां यज्ञमुग्विभुः ।।३।।

यदत्रसौष्ठवं किञ्चित्तद्गुरोरेव केवलम् ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ।।४।।

COLOPHON : इति श्रीमन्महायाज्ञिकपाठक श्रीरामचन्द्रसूरिसूनुमहायाज्ञिकपाठक श्रीगंगाधरकृतं कात्यायनशुल्वसूत्रभाष्यं समाप्तम् ।

Post-Colophonic : संवत् १९११ आषाढमासे सप्तमी शनिवारेण । शुभमस्तु ।

782/42 क्रतुरत्नमाला

OPENING : वंदे मुदा दारितविघ्नवृन्दकन्दे मुकुन्दीयपदारविन्दे ।
यं देवमिन्द्रोपि विदेव वन्दे, संदेहभेदे तमपीह वन्दे ।।१।।

कालिन्दीनीलनीलोत्तरलितलहरीसंगरिङ्गत्तरङ्गा-
गङ्गा सु (तु) ङ्गाङ्गसङ्गा दिशति दिविषदामङ्गनापाङ्गभङ्गान् ।
यासानङ्गारिसङ्गामृगसुभगदृशीदृक्तरङ्गप्रभङ्गा-
न्निङ्गदभृङ्गालितुङ्गान्वितरतु मयि तानङ्गसङ्गाद्यभङ्गान् ।।

न्यायाम्भोधिनिमग्नविप्रपटलीमुद्धर्तुमित्युद्भटाः,
सिद्धान्ताः भुवि जाग्रति प्रतिदिशं यस्य प्रसन्नोक्तयः ।
मीमांसाद्वयसारपारमगमद्यच्छेमुषीलीलया,
तद्वन्द्वे बलभद्रमिश्रचरणाम्भोजं जगन्मण्डनम् ।।३।।

यद्वक्त्राम्बुरुहाङ्गणक्षितितले वाणी नरी नृत्यति,
श्रुत्यर्थानुमहाद्भावरचनाचातुर्यलीलावती ।
यच्चेतो यदुनन्दनाम्बुजपदद्वन्द्वे द्विरेफायते ।
सेवे श्रीपतिशर्मणः पदकजद्वन्द्वं पितुस्तद्विदे ।।४।।

यद्वाक्तरङ्गा विविधार्थसङ्गा, गङ्गातरङ्गा (इव) ह्लत्पुनन्ति ।
वन्दे तदिन्दूज्ज्वलसद्गुणोत्थ, सत्कीर्तिगङ्गाधरपादयुग्मम् ।।५।।

अथ शांखायनसूत्रानुसारेणाग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य पद्धतिर्लिख्यते ।

CLOSING :

इति द्विवेदी श्रीश्रीपतिपुत्र विष्णुजीकविरचितायां शांखायन-सूत्रपद्धतौ क्रतुरत्नमालाभिधायामष्टमोऽध्यायः समाप्तः सूत्रपूर्वार्धञ्च समाप्तम् ।

COLOPHONIC :

आसीद्गुर्जरमण्डले शिवपुरी काशी यथाशी विषो
भूद्भूशेषेन विनिर्मिता गिरिसुतानन्दार्थमन्वर्थिनी ।
विद्वन्मण्डलमण्डिताखिलमही या पाटलाद्याभिदा ।
तस्यां वेदविचारभेदचतुरश्चण्डांशुनामा द्विजः ॥१॥

सम्राड्भासुरभूषणं समभवत्तस्यात्मजो वामनो,
विद्यासागरपारगस्त्रिभुवनप्रख्यातसत्कीर्तनः ।
यः पंचाधिकषष्टिहायनयुतोऽप्यागत्य देशान्तराद्
दृष्ट्वाऽनष्टवशादभीष्टजनताविष्टं विनष्टं कुलम् ॥२॥

कष्टाकृष्टमना विदर्भनगरे दृष्ट्वा विशिष्टं कुलं,
स्वाभीष्टामुद्वाहसन्ततिपथं द्रष्टु पुनः कन्यकाम् ।
आदित्यप्रमुखा बभूवुरचिरात्तस्यात्मजाः सप्त ये,
ख्याता वैदिककर्ममर्मकुशलाः साक्षान्मुनीन्द्रा इव ॥३॥

आदित्यस्य सुतो जनार्दन इति ख्यातो वरिष्ठो गुणै-
र्यस्यास्ये विललास वेदविहितांविद्यानवद्याऽखिला ।
तारुण्यावधिधर्मकर्मनिरतस्तस्योच्यते किं मया,
यस्याग्रायतने समार्द्धमवसद्रामः स्वयं भार्गवः ॥४॥

किं च श्रीभृगुनन्दनो निजमुखाम्भोजेन यस्यादिश-
द्विद्यामात्मनि गूढतत्वमननप्रख्यापिनीमात्मवित् ।
अब्दार्द्धेऽथ गते प्रयाणसमये रामेण यः सत्कृतः
स्वाभीष्टं वरमादिशेति वचसा वव्रे वरान्स्त्रीन् रहः ॥५॥

प्राप्तेऽन्ते यमकिंकरेऽतिबहुलेऽक्षेमंकरे शंकरं,
वीक्षेऽहं तव देवदेवपरमं वेदान्तवेद्यं महः ।
मद्वंशेऽविचलं स्ववेदसहितां विद्यामनिन्द्यां तथा
याचेहं भवतो ततो मम कुले वेदीमभेद्यां पुनः ॥६॥

जज्ञे तस्य जनार्दनस्य तनयः श्रीनीलकण्ठाभिधो,
येनार्येण तिलंगदेशवसते विप्रात्क्रमं दुष्क्रमम् ।
पूर्णं तूर्णमधीत्य वेद विदुषा पश्चान्महीमण्डले-
ऽखण्डेपि क्रमशः क्रमो निजगदे मेधाविषु ब्रह्मसु ॥७॥

तस्यासीत्तनयोऽविगीतविनयो भानुः कृशानूपमो,
यो विप्रान् श्रुतिकर्ममर्मजलधौ मग्नानपारेभृशम् ।
उद्धर्तुं विदधे श्रुति स्मृतिरहस्यार्थं पुमर्थप्रदं,
यश्चान्ते शिवभक्तिरक्तिवशतो युक्त्या विमुक्तं ययौ ॥८॥

जज्ञे तस्मात्सहजविलसद्वाग्विलासोर्मिसिन्धु-,
निष्ठाऽरिष्ठीकृतमुनिवसिष्ठादिशिष्टप्रतिष्ठः ।
यो मन्त्राणां फलमविकलं प्राप पाठार्थबोधा-
चारत्यागैः स दिशतु जगन्नाथनामा मतिं मे ॥९॥

सूनुस्तस्य सपक्षलक्षकमुदानन्दाय मन्दाकिनी-
नीरस्पर्शविधूतकायकलुषा जातो विधुस्पर्द्धनः ।
नाम्ना श्रीपतिरित्यसावभिहितः पित्रा तथापिक्षपा-
नाथस्याऽविकलं कलङ्करहिते सादृश्यमस्मिन्मुधा ॥१०॥

यद्वक्त्राम्बुरुहाङ्गणक्षितितले वाणी नरी नृत्यति,
श्रुत्यर्थानुगहावभावरचनाचातुर्यलीलावती ।
यच्चेतो यदुनन्दनाम्बुजपदद्वन्द्वे द्विरेफायते,
तस्य श्रीपतिशर्मणो विजयतामाकल्पमग्न्यातनूः ॥११

विष्णुना तत्तनूजेन यथामति विनिर्मिता ।
शांखायनसूत्रस्य पद्धतिः सौमिके क्रतौ ॥

Post-Colophonic ॥ संवत् १८१६ ॥

819/50 प्रयोगरत्नाकर

OPENING :

श्रीगणेशाय नमः ।

यस्यांघ्रिरेखासंस्पृष्टा विधिरेखा दुरक्षरा ।
शं तनोति ललाटस्था तं गुरुं समुपास्महे ।।१।।

तरुणतरणिकान्तिद्योतित प्राच्यभूभृ-
च्छिखरलसदशोकस्मेरपुष्पोपमानः ।
अभिनवशशिरेखां विभ्रदानन्दहेतुः,
करलसदरविन्दः श्रेयसे मे गजास्यः ।।२।।

कालिन्दी चिकुराली स्वं वाग्देवीत्रिदशधुनी कान्तिः ।
यदि मयि तनुते करुणां कस्तर्ह्यर्थः प्रयागेण ।।३।।

श्रीमान्दयाशंकरनामधेयोभिधेयमाधाय सुधेयमार्यैः ।
शांखायनोक्ते हृदि सोमसंस्था प्रयोगरत्नाकरमातनोति ।।४।।

संस्थार्थपीयूषपिपासया ये धावन्ति तत्तद्बुधसद्वचस्सुते ।
तेषामनायासकलापसंस्था प्रयोगरत्नाकर उद्यतोऽस्ति ।।५।।

CLOSING :

इति श्रीमद्व्यावहारिकोपाख्यधरणीधरसूनुना दयाशंकरेण विरचिते श्रीशांखायनसूत्रस्य सोमसंस्थाप्रयोगे प्रयोगरत्नाकराख्ये आप्तोर्यामः सम्पूर्णः ।। श्री ।।

लोके नागरजातिभूषणवरः काशीविकाशीकृत-
स्थानोऽयं द्विजराजभासुरवपुः सद्योगधामाश्रितः ।
यः शुद्धं वृषमाश्रितः श्रुतिनिरुक्तादिक्रमाभ्यासकः,
श्रीगङ्गाधरवद्बभूव भुवि यो गङ्गाधराख्यः पुरा ।।१।।

तत्सूनुर्वरणीधरः क्षितितले दृष्टः क्षमाभृद्वरः,
सद्वेदाध्ययने पटुः शिवपदध्यानावधूतान्तरः ।
ब्राह्मण्यो परमो नरः समतया विश्वस्य चेतोहरः,
संभिन्नप्रियहृद्वरः समभवद्वंशस्यभूषाकरः ॥२॥

तस्मादाविरभूदभूतसद्गुणः शीलेन यः शेमुषी
कोशीभूत इव प्रकाशितकुलः प्रेक्षावदीक्षाश्रयः ।
यस्योद्दामगुणैरमन्दधिषणा गांभीर्य विभ्राजित-
प्रस्फूर्जज्जजनमण्डली श्रुतियुगे यैर्कुण्डलीभूयते ॥३॥

यो व्यावहारिककुलाम्बुधिलब्धजन्मा,
सन्मानमानितमहीसुमनःसमूहः ।
सोऽयं श्रुतिस्मृतिविचारपरः समस्त-
विद्यानवद्यमतिसंमतिमादधानः ॥४॥

दयाशंकरः सर्वलोकेषु नाम्ना दयाशंकरः पूजया शंकरस्य ।
अनल्पोपलब्धिर्विकल्पोपहृत्यै सुकल्पः परं चारु जल्पेन नित्यम् ॥५॥

भुवि शांखायनमुनिना निजशाखीयद्विजजातिवर्याणाम् ।
कर्माचारविशुद्ध्यै समकारि श्रौतसूत्रमिदम् ॥६॥

नानाग्रन्थविलोकनविलोलमतिलोकभविकाय ।
तस्यानवद्यरूपं प्रयोगवर्यं प्रकाशितवान् ॥७॥

हुतवहलोचनधृतिमितवर्षगणे विक्रमेशितुर्याते ।
इषसितपञ्चमदिवसे ग्रन्थोऽयं पूर्णतामाप्तः ॥८॥

जयन्ति ते सुकृतिनः प्राञ्चो भाष्यकृदादयः ।
येषां कृतीः समालोक्य जायते मादृशः कृती ॥९॥

महतामपि मोहाय गूढार्था भाष्यभारती ।
भारतीह श्रमः सर्वो भारती करुणां विना ॥१०॥

एषोऽनल्पमनीषिभूसुरकृते रत्नाकरो निर्मित-
श्छिन्नं मे किमसूययाल्पमतिभिश्चेद्दृष्यते दूष्यताम् ।
हंसानामवगाहनाय रचितं तीर्थं परं मानसं,
काकश्यामलपक्षधूननवशात्कालुष्यमाप्नोति किम् ॥११॥

अनल्पेन श्रमेणायं मया रत्नाकरः कृतः
अव्याजकरूणामूर्तिस्तेन तुष्यतु शंकरः ॥१२॥

COLOPHON : इति श्रीमद्व्यावहारिकोपाख्यधरणीधरसूनुना दयाशंकरेण कृते श्रीशांखायनसूत्रस्य सोमसंस्थाप्रयोगे प्रयोगरत्नाकराख्यः समाप्तः ।

Post-Colophonic : मिती दुतिय अषाढ बदी १३ बुधवार संवत् १९१२ का शाके १७७६ श्री कृष्णः राम राम राम ।

x x x

520/420 प्रयोगसारज्योतिष्टोमप्रयोग

OPENING : श्रीगणेशाय नमः ।

श्रीविघ्नेशं याज्ञवल्क्यं मुनिं कात्यायनं गुरुम् ।
अस्मद्वृद्धजनानां सद्गुरुञ्च हरिशङ्करम् ॥१॥

गङ्गाधरम्पाठकञ्च यागकालविवेचकम् ।
भागीरथीं मातरञ्च पितरं बलभद्रकम् ॥२॥

पितृभूतिं भर्तृयज्ञं वासुदेवञ्च शङ्करम् ।
गर्गङ्कर्कमनन्तञ्च श्रीहरिस्वामिमाधवौ ॥३॥

संप्रदायप्रणेतॄंश्च रामं शुल्वप्रकाशकम् ।
महादेवं हरिहरमित्यादीन्पूर्वयाज्ञिकान् ॥५॥

प्रणम्य मनसा वाचा कर्म्मणापि च भक्तितः ।
सूत्रं कातीयं तद्भाष्यं कार्क्कं दैवं सपद्धतिम् ॥६॥

श्रीअनंतकृतां रामपद्धतिं याज्ञिकप्रियाम् ।
ग्रन्थयष्टिं पद्मनाभिं संप्रदायाख्यपद्धतिम् ॥७॥

ग्रन्थानेतांस्तु सङ्गृह्य निजबुद्ध्या विमृश्य च ।
ततोपि याज्ञिकानाञ्च संप्रदायो यथाऽधुना ॥८॥

तथा कर्कानुसारेण ज्योतिष्टोमक्रमोर्ह्जुः ।
प्रयोगसारनामासौ प्रयोगो रच्यते यतः ॥९॥

सूत्रवाक्यं समुल्लिख्य प्रयोगलेखनं न हि ।
कृतम्पूर्वैरतस्तस्य लेखनं क्रियते मया ॥१०॥

CLOSING: इति कात्यायनसूत्रप्रयोगसारे ज्योतिष्टोमप्रयोगे सुत्याख्यपञ्चमदिनकृत्यम् ।

विघ्नेशचरणद्वन्द्वमाधाय हृदि मङ्गलम् ।
बलभद्रतनूजेन देवभद्रेण धीमता ॥१॥

मया विरचितश्चायं प्रयोगः कर्कसम्मतः ।
कर्कोक्तं तदन्येभ्यः स्वीकृतञ्चाऽविरोधतः ॥२॥

कर्कानुसारिणीनाञ्च पद्धतीनाम्परस्परम् ।
विरोधे प्रौढभाष्यादिग्रन्थेभ्योद्धृतं वरम् ॥३॥

क्वचित्कुत्रापि दृष्टं न दृष्टं वृद्धस्य टिप्पणे ।
न्याय्यम्भाष्यार्थतत्वं यत्तदप्यङ्गीकृतं तथा ॥४॥

क्वचिद्भाष्यविरोधोपि याज्ञिकानाम्मतेऽस्ति च ।
तत्र सत्सम्प्रदायस्याऽविरोधस्स्वीकृतः पुनः ॥५॥

ज्ञानादज्ञानतो वापि यच्चेह लिखितम्मया ।
क्षन्तव्यं तच्च संशोध्यं याज्ञिया अयमञ्जलिः ॥६॥

न मदीया कृतिर्यस्मादेषा यज्ञस्य वै कृतिः ।
यथा प्रेरितवान्यज्ञस्तथा लिखितवानहम् ॥७॥

याज्ञिकानामपत्यानां नव्यानाञ्च हिताय तु ।
कृतोऽयं सरलस्तेन सञ्चरन्तु सुखेन ते ॥८॥

अब्दे धृतिशते काश्यां दुर्धविघ्नेशसन्निधौ ।
पित्रोर्गेहे वसन्नेव ग्रन्थोऽयं रचितस्ततः ॥९॥

ज्येष्ठभ्रातुः पृथग्भूत्वा स्वहर्म्ये भैरवायणे ।
गजाभ्रवसुभूवर्षे सितेसहंसि शीतगौ ॥१०॥

चतुर्थ्यां संस्थितिं कृत्वा ग्रन्थोऽयं सुपरिष्कृतः ।
ततो मे यः श्रमस्तेन प्रीयतां यज्ञभुग्विभुः ॥११॥

सोमप्रयोगसारेऽस्मिन्देवभद्रकृते वरे ।
पञ्चत्रिंशच्छती ग्रन्थसंख्येयं समुदीरिता ॥१२॥

अपरिष्कृतमेतस्य पुस्तकं याम्यदिग्गतम् ।
अस्त्यतोऽनेन साकन्तच्छोध्यमेष ममाञ्जलिः ॥१३॥

COLOPHON : इति श्रीमन्महायाज्ञिक नागरज्ञातीयपाठकश्रीरामचन्द्रसूनु-महायाज्ञिकश्रीगङ्गाधरपाठकवंशसंभूतपाठकश्रीबलभद्रात्मजदेवभद्रेण रचिते कात्यायनसूत्रप्रयोगसारेऽग्निष्टोमसंस्था-ज्योतिष्टोमप्रयोगस्समाप्तिमगमत् ।

Post-Colophonic : सम्वत् १९११ माघकृष्ण १० शनिवासरे शुभं भवतु ॥ श्रीरस्तु ॥ श्री ॥

x x x

887/4561 श्रौतसूत्र-व्याख्या (ज्योत्स्ना)

OPENING : श्रीगणेशायनमः ।

वात्सल्यात्पितरौ कपोलयुगलं स्वस्म्यागतौ चुम्बितुं,
दृष्ट्वा कुञ्चितमास्यपद्ममलं सेषत्स्मितं सत्वरम् ।
अन्योन्यं शिवयोस्ततः सुवदने युक्ते अभूतान्तयो
स्थितं येन विनोदितौ स भगवान्बालो गजास्योऽवतु ॥१॥

विद्यामहागणपतिं देवं व्याडीश्वरं तथा ।
योगेश्वरीं च वाग्देवीं लक्ष्मीनारायणौ रविम् ॥२॥

सत्याषाढां मुनिश्रेष्ठं, जातरूपशिरोरुहम् ।
गुरुन्श्च मातापितरौ, नत्वेदानीं यथामति ॥३॥

श्रीकोपाह्वेन कुतुकाद् गोपीनाथेन धीमता ।
सत्याषाढेन रचितं सूत्रं व्याख्यायते मया ॥४॥

सूत्रोदधिं मया ततुं मारब्धं मंदबुद्धिना ।
तत्रावलम्बो मम तु पारे गन्तुं गुरुस्मृतिः ॥५॥

COLOPHON : इति श्रीमदग्निष्टोमयाजिसाहस्त्राग्निचिद्वाजपेययाजिसर्वतोमुख-याजिद्विषाहस्ताग्निचित्पौण्डरीकयाजिश्रीमद्गणेशदीक्षिततनूजगोपीनाथदीक्षित विरचितायां श्रीमद्भगवन्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्ना-लाभकृतविद्वज्जनसन्तापशामिकायां ज्योत्स्नायां वृत्तौ नवमप्रश्नस्याष्टमः पटलः ॥८॥

Post-Colophonic : समाप्तो नवमः प्रश्नोऽयम् ।९। संवत् १८५४ अश्विनकृष्ण १४ अद्य शनी० ।

x x x

901/419 सुपर्णचितिदीपिका

OPENING : श्रीगणेशाय नमः ।

श्रीमातृचरणयुगलं, गुरु-पद-युग्मं विभाव्य नत्वाहम् ।
कातीयसूत्रशेषं कुतुकात्किमपि स्फुटीकुर्वे ।।१।।

नत्वा कात्यायनाचार्य्यं कल्पसूत्रन्तदीरितम् ।
दृष्ट्वोपेन्द्रः प्रतनुते सुपर्णचितिदीपिकाम् ।।२।।

आपस्तम्बीयसूत्रीयो भरद्वाजान्वयोद्भवः ।
कर्त्ता[illegible]सः काशिकायान्निवासी याजुषस्सुधीः ।।३।।

CLOSING : इति श्रीव्यंकुशात्मिशिष्येण रामभट्टसुतेन हि ।
कृतोपेन्द्रेण बोधाय सुपर्णचित्तिदीपिका ।।१।।

नागेशदीक्षिताख्येन काण्वद्विजवरेण वै ।
प्रार्थितोऽहं सतां तुष्ट्यै ग्रन्थारम्भन्तदाकरम् ।।२।।

अक्षयाब्दे माघशुक्लपञ्चम्यां सौम्यवासरे ।
सप्तर्ष्याख्ये जनपदे ग्रन्थोऽयं पूर्णतामगात् ।।३।।

COLOPHON : इति श्रीकात्यायनीयसुपर्णचितिदीपिकायामुपेन्द्ररचितायां पूर्णश्लोका समाप्ताः । श्री ।।

Post-Colophonic : संवत् १८१६ वर्षे पौषशुक्ल ६ दिने काश्यां समागतस्य ग्रन्थकारस्य गृहात्तद्धस्तात्लिखितपुस्तकं समानीय तत्पुस्तकोपरीदं पुस्तकं पाठक

बलभद्रसूनुना देवभद्रेण लिखितं ग्रन्थकर्त्रा सह शोधितं च। इदं व्याख्यानमुपेन्द्रशास्त्रिणा कात्यायनकल्पसूत्रं पद्मनाभपद्धतिं च दृष्ट्वा कृतं। कर्कदेवादिभाष्यानि तु व्याख्यानावसरे दक्षिणदेशे सप्तर्षिनगरे नैव दृष्टानि स्वबुध्याख्यातमस्ति। ...मूलपुस्तकं यादृशं लब्धं तदनुसारि पाठमवलम्ब्य व्याख्यातमस्ति, अतो बहुषु स्थलेषुकर्कदेवादिभाष्यविरुद्धमस्ति अत एतदनुसारेणेष्ट कोपधानमुपेक्ष्यमेव। कर्त्तुर्मुखाद्यच्छ्रुतन्तल्लिखितमस्ति अतः सर्वथैवैतदन्नादर्त्तव्यं याज्ञिकैः। इदानींन्तनानां मध्ये उपेन्द्रसामर्थ्यं तु ऋषितुल्यमेव न तत्र संदेहः, परन्त्वनुष्ठानमेत्तद्व्याख्यानुसारेण नैव कार्यं सर्वथा प्राचीन सर्वग्रन्थविरोधापत्तेरितिदिक्।

x x x

940/433 पारस्करगृह्यप्रकाशमंत्र-भाष्य

OPENING : श्रीगणेशाय नमः।

प्रणम्य पूर्वं पुरुषं पुराणं तथैव कात्यायनपादपद्मम्।
तनोमि पारस्करमंत्रभाष्यं मुरारिमिश्रकृतगृह्यभाष्यात् ॥१॥

गृह्यप्रकाशाभिधभाष्याच्छ्रीवेदमिश्रैर्विधिवत्प्रणीतात्।
आकृष्य बन्धुं विधिनानि [विदधाति मंत्रै] मुरारिमिश्रःश्रुतितो विविच्य ॥२॥

CLOPHON : इति श्रीवेदमिश्रप्रणीतगृह्यप्रकाशभाष्यादाकृष्य मंत्रभाष्यं पृथक्कृत्य तृतीयकाण्डस्य मुरारिमिश्रकृतं समाप्तिमगमत्॥

Post-Colophonic : सं. १९९० ॥

x x x

944/431 पारस्कर गृह्यसूत्रभाष्य

OPENING : ... ष धर्माश्च तत्र व्याख्यास्यामः । कामादितरं ... । ... तत्र वक्ष्यामः संस्काराश्च । गौतमादिभिर्गणिताः अष्टचत्वारिंशत् गर्भाधानपुंसिक्त्यासीमकरणं जातनामके १ अन्नाश ...। श्रौतव्रतचतुष्टयी ॥१॥

CLOSING : इति श्रीराघवेन्द्रारण्यश्रीचरणचरणाब्जचञ्जरीकैर्भास्करभट्टैः रचिते अर्थभास्कराभिधे पारस्करसूत्रभाष्ये तृतीयः काण्डः समाप्तः ॥ समाप्तं-चार्थभास्करभाष्यम् ॥

x x x

946/425 पारस्करगृह्यसूत्रव्याख्या

OPENING : श्रीगणेशाय नमः ।

गर्गसिद्धान्तपद्मानां प्रकाशोदयहेतवे ।
मार्तण्डाय नृसिंहाय पित्रे श्रीगुरवे नमः ॥१॥

गङ्गादेवीमहं वंदे ज्ञानदां मातृरूपिणीम् ।
जातं यस्या पयःपानात्सरस्वत्यवगाहनम् ॥२॥

पारं शास्त्रसमुद्रस्य तच्चैतल्लिख्यते यतः ।
स्वकल्पितत्वशङ्कात्र न कार्या विबुधैरतः ॥३॥

तर्कशास्त्रं च मीमांसा यद्रक्षायै प्रयोजिते ।
तातैस्तमपि वंदेऽत्र गर्गं वेदार्थवित्तमम् ॥४॥

अधीत्य सकलं शास्त्रं श्रीनृसिंहाज्जगद्गुरोः ।
तन्यते विश्वनाथेन गृह्यसूत्रप्रकाशिका ॥५॥

CLOSING : अभूदानंदपुरे मुञ्जो नागरो गोत्रकाश्यपे ।
लक्ष्मीधरोऽभवत्तस्मात्सूर्य्यदत्तस्तु तत्सुतः ॥१॥

तस्मादाशाधरो जातो नारसिंहाभिधस्ततः ।
तत्सुतेन कृतं भाष्यं विश्वनाथेन धीमता ॥२॥

पारस्करस्य गृह्यस्य पञ्चखण्डावशिष्टकम् ।
गरिष्ठं सर्वभाष्येषु बह्वर्थनिर्णयान्वितम् ॥३॥

महादेवजगन्नाथपुत्रपौत्रप्रपौत्रकैः ।
गोपनीयं निरीक्ष्यं च पठितव्यं समाहितैः ॥४॥

... ...
नारसिंहाग्रतोऽवन्तस्तस्य यो वै प्रपौत्रकः ॥५॥

लक्ष्मीधराभिधस्तम्भतीर्थात्काश्यां समागतः ।
उपहासं पुरस्कृत्य ह्रियङ् कृत्वा तु पृष्ठतः ॥६॥

भाष्याण्यन्यानि चालोक्य पञ्चखण्डान्यलीलिखत् ।
तेनैवात्रास्य भाष्यस्य पूर्तिर्ज्जाता यथा तथा ॥७॥

संवन्नेत्रग्रहत्तला १६६२ मितेऽब्दे चोत्तरायणे- ।
समाप्तिमगमद्भाष्यं माघे भूतेः १५ सिते कुजे ॥८॥

COLOPHON : इति श्रीमत्सर्वविद्याविशारदपण्डितश्रीनारसिंहसुतपण्डितश्री-विश्वनाथकृते पारस्करगृह्यसूत्रव्याख्याने तृतीयकाण्डं सभाष्यम् ।

x x x

865/41 शांखायनभाष्यप्रदीप गृह्यप्रदीप

OPENING : ॐ श्रीगणेशाय नमः ।

संसारभोगी रसयाविदष्ट-त्रिलोकसंरक्षकमेसाद्यभोगम् ।
...इभोगासनसन्निविष्टं, वन्दे नृसिंहं भुवनैकनाथम् ॥ १॥

उद्यद्भास्करकोटिचारुविलसत्पञ्चाननास्यं महा-
विद्युज्जिह्वमुदग्रदंष्ट्ररुचिरं रक्षोभिरक्षोभितम् ।
जानुस्थापितबाहुपङ्कजमुरुं केशच्छटाभूषितं,
वन्देऽहं नृहरेः स्वरुपममलं गीर्वाणवन्द्यं सदा ॥२॥

प्राणिपत्य गुरुं मूर्द्ध्ना श्रीपतिं विष्णुतेजसम् ।
करोम्यहं विशदार्थं गृह्यसूत्रप्रदीपकम् ॥३॥

COLOPHON : इति श्रीमत्सकलविद्वज्जनमण्डलीमण्डनद्विवेदी श्रीश्रीपतितत्सुत द्विवेदी श्रीकृष्णयाजी तत्तनय नारायणविरचित गृह्यप्रदीपकेभाष्ये षष्ठोऽध्यायः समाप्तः । समाप्तञ्च गृह्यप्रदीपकं भाष्यं सं. १६२९ ।

CLOSING : वर्षे नन्दकरर्तुचन्द्रसमिते माघे सिते पक्षके,
षष्ठयां सौरिदिनेऽपराह्णसमये त्वाष्ट्रे च नक्षत्रके ।
मार्तण्डे मकरस्थिते घटगते चन्द्रे वृषे लग्नके,
काष्णेंयेन विनिर्मिता कृतिरियं भूयाज्जगन्मोदिनी ॥१॥

देशे गुर्जरसंज्ञके सुरवकरे श्रीपाटलाख्या पुरी
तस्यां वेदविचारचञ्चुरमतिश्चण्डांशुनामा द्विजः ।
आसीन्नागरभूषणं क्षितितले श्रीराममक्तः कृती
यत्तेजः कमलापदेरिव समं वृत्तं महर्षेरिव ॥२।

तस्याभूद्विबुधेश्वरेण सदृशः ,..,
... ... ।
दृष्ट्वा मुद्गलनाशितं कुलमिदं याज्यस्य कन्यां तु यो,
... ...
वैदर्भेनगरे ह्युवाहविधिना द्रष्टुं पुनः सन्ततिम् ॥३॥

आदित्यादिसुता वसिष्ठसदृशास्तस्याचिरात्सप्त वै,
जाता वेदविशारदास्त्रिभुवने ख्याता गुणैरुद्भटाः ।
आचारैर्विमला मरवेषु सततं दीक्षापरा याज्ञिकाः
श्रीरामस्मरणे विशिष्टमनसो योगाब्धिपारङ्गताः ,।४॥

आदित्यादभवत्सुतो हरिनिभो वेदाङ्गपारङ्गतो
लोके सौख्यकरो जनार्दन इति ख्यातो गुणैरुग्रधीः ।
बाल्याद्धर्मपरः क्रियासु कुशलो वृत्तञ्च किं वर्ण्यते,
यस्याग्र्यायतने निवासमकरोद्रामोऽथ वर्षार्द्धकम् ॥५॥

श्रीरामो भृगुनन्दनो निजमुखेनाशिक्षयद्ब्रह्मविद्-
वेदाङ्गं परमूर्ध्वमार्गगमनप्रद्योतनं तस्य वै ।
षण्मासेऽथगते प्रयाणसमये धृत्वा स्वकीयां तनुं
ब्रूहिब्रूहि वरं तवेति वचसाऽभीष्टं च संस्मारितः ॥६॥

वव्रे त्रीन्सवरान् कुले ममविभो याचे च वेदी तथा,
वेदं साङ्गमथ प्रयाणसमये देयं त्वया दर्शनम् ।
यावद्वेदमिदं कुले द्विजबटोस्सम्पत्स्यते तेऽखिलं
श्रीरामः प्रणयात्तदैव भगवान् दध्रे स्वरुपं महत् ॥७॥

पाणौ स्वर्गतरङ्गिणीजलभृतं पात्रं दधानं नवं,
कोदण्डं परशुं दधानमसितं मूर्द्धा जटाधारिणम् ।
भक्ताढ्यं सनकादियोगिसहितं सूर्येन्दुकोटिप्रभं,
श्रीरामं भृगुवंशभूषणमथो दृष्ट्वा स चक्रे मतिम् ॥८॥

जातस्तस्य सुतो महेश्वरनिभः श्रीनीलकण्ठाभिधो,
येन ब्रह्मविदा क्रमादिनवधा विद्याप्रकारा द्विजात् ।
तैलङ्गादधिगम्य तूर्णमवनीदेवेषु विस्तारिताः
सोऽन्ते प्राप परात्परां रविपुरे गङ्गोद्भवे सद्गतिम् ॥९॥

तस्याभूत्तनयो महेशनिरतो भानुः कृपासागरः,
श्रीमान्भूसुरमण्डनः क्षितितले विद्यानिवासास्पदम् ।
वेदार्थैनिधिः क्रियासु कुशलो वृत्तो च वैयासकिः,
सोऽन्ते प्राप्य पुरीं शिवस्य महतीं मोक्षं जगामाक्षरम् ॥१०॥

तस्यास्तां तनयौ विनीतयशसौ ख्यातौ गुणैः सर्वतो,
वेदाब्धेः परपारगैः भुविदितौ देशे विदेशेपि तौ ।
आचारे विमलौ परावरविह जगन्नाथेति लोके श्रुतौ,
श्रेष्ठः श्रीजयदेव इत्यपि परे वंशस्य भूषास्पदम् ॥११॥

ज्येष्ठाद्वै कुलभूषणं समभवच्छ्रीश्रीपतिः श्रीपते
रुपेणाप्रतिमो रमेशभजको विद्यासमूहान्वितः ।
स्वर्धुन्यामृततोयपानरसिको भूदेवपूजापरो,
मुक्तिं प्राप्य महेश्वरस्य निकटे पुर्यां हरस्योत्तराम् ॥१२॥

कृष्णस्तस्य सुतो जितेन्द्रियचयो लक्ष्मीपतेः सेवको
मीमांसार्थविचारचञ्चुरमतिर्वैतानकर्माश्रयः ।
गाम्भीर्यादिगुणैर्विभूषिततनुर्बुद्धया समानो गुरो
स्तीर्थे प्राप परां गतिं शिवपुरे जह्नोः सुतायास्ततः ॥१३॥

नारायणेन कृतिना तत्तनूजेन निर्मितम्
शाङ्खायनस्य गृह्यस्य भाष्यं गृह्यप्रदीपकम् ।
कृतेनानेन ग्रन्थेन विश्वरूपी सदाश्रयः
यज्ञमुक्परमो देवो नृसिंहः प्रीयतां मम् ॥१४॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

Post-Colophonic : संवत् १९१२ वर्षे ज्येष्ठमासे शुक्लपक्षे द्वितीयायांतिथौ गुरुवासरेऽयं ग्रन्थः समाप्तः । रामगोपालेन भोजपुर मध्ये लिखितम् ॥ श्रीरस्तु ॥ श्री राधाकृष्ण ॥ दः रामगोपाल ।

x x x

1066/3369 गोविन्दार्णवः

OSENING: श्रीगणेशाय नमः ।

सन्मायावशतः प्रपञ्चितवपुश्चित्स्वप्रकाशात्मकं
श्रुत्यातद्व्यतिरेकगम्यमपरानन्दाद्वितीयात्मकम् ।
स्वाध्यासान्मनसा वृतस्य जगतोऽसत्यस्य यद्भासकं
भूत्यै तन्निखिलाघसंहृतिचणं स्यान्नारसिंहं महः ॥१॥

....

अस्ति स्वस्तिस्थितिरिह चतुर्वर्गसर्गैकभूमिः
स्वर्गङ्गायास्तटपरिसरे राजधानी शिवस्य ।
यस्यामीशः शमितविषमाशेषकीनाशपाशं
शश्वज्जन्तोरुपदिशति तत्तारकं ब्रह्म शान्तम् ॥१०॥

....

स्वे स्वे धर्मे निहितमतयो यत्र लोका विशोका,
नो काङ्क्षन्ति त्रिदशपतितां यक्षराजश्च साक्षात् ।
यामध्यास्ते विरचितशिवा सा शिवा काशिवासि-
प्राणत्राणावहितविहितानेककामा निकामम् ॥१८॥

....

दिल्लीपल्लीवयस्या विलसति पुरतः कालपी कालपीते-
वान्तः पीतेव चम्पा तदनु च मलिना ह्रीविशाला विशाला ।
रागागाढाभितापा परिपतदयशोमग्नदेहा विदेहा,
लङ्काऽऽतङ्काकुलासीदपि विशदयशाः सालका(काल) कान्तिः ॥२२॥

अस्ति स्वस्ति प्रशस्तिर्भुवि भुवनतलाभोगभूषायमाणो,
वंशः श्रीवास्तवाख्योऽमितविभवभरो हासिताशाविभागः ।
प्रत्यग्रोदग्रजाक्तन्निजभुजयुगलोद्दामदीप्यत्प्रताप-
ज्वालामालावलीढ़प्रतिनृपतिबलो धर्मकर्म्मैकधुर्य्यः ॥२३॥

तस्मिन्वंशेजनिषतशतं शूरवंशावतसाः
कंसारातेश्चरणयुगले दत्तचित्तावधानाः ।
सन्नीतिज्ञा द्विजसुरगुरुप्रापितार्था कृतार्थाः
पार्थप्रख्या विशदयशसो धर्मकर्म्मैकधुर्य्याः ॥२४॥

तत्रासीच्छुचिहासः शौर्यनिवासः कृतेन्द्रपरिहासः ।
परिहृतजगदायासो जनितत्रासः परेषु शिवदासः ॥२५॥

....

तस्मादाविरभूत्प्रभूतविभवो गाङ्गेयमेयोजितो,
गङ्गादास इति प्रसिद्धमहिमा गङ्गां समाराध्य सः ।
स्वामाख्यामकृतार्थयत्कुलमलं चक्रेऽन्य चक्रेश्वरा
नक्लेशादजयज्जयैकनिलयः शक्रेप्यवंज्ञाकरः ॥२८॥

तदनु दनुजवैरिपादपद्मप्रणतिपरः समभून्महेशदासः ।
इह हरिहरयोरभेदभावं भजनमुपादिशदेष योजनेषु ॥२९॥

यद्वाहोर्बलमाकलय्य बलिनः प्रत्यर्थिपृथ्वीभृतो,
भूभृत्कन्दरमन्दिरेषुनिभृताः स्त्रीपुत्रमित्रादिषु ।
हित्वा स्वेषु च पक्षपातमतुलं गाढानुरागं मृग-
व्यालव्याघ्रकिरातकेसरिपरिवारे समातन्यते ॥३०॥

अजनि नयनसिंहः पार्थिवोऽस्मादकस्मा-
त्समरभुवि यदीयं सिंहनादं निशम्य ।
परनरपतिमाद्यत्तुङ्गमातङ्गसङ्घा
सपदि विपदि मग्नास्ते दिगन्तान्भजन्ते ॥३१॥

क्रूराक्षीणविपक्षपक्षदलने दक्षेण यज्ञेश्वरा-
दन्यूनेन नयेन (येन) सकलं भूमण्डलं शासता ।
वैषम्यं न विरच्यतेऽत्रभुवने मित्रेष्व (मित्रेषु) वा
स्वस्त्रीकेलिपरेषु निर्मितचिरस्वास्थ्येषु नित्यार्थिषु ॥३२॥

तद्वंशे भूवतंसेऽजनि जननयनानन्दचन्द्रो नरेन्द्रो
माहेन्द्रलोकमेषा हसति वसुमती यं पतिं प्राप्य पुण्यैः ।
श्रीमानुत्सन्नशत्रुः परिचरितसदा माधवो माधवो यं
सम्प्राप्ताः साधवोऽमी गुणमणिविपणिर्गाधवोधर्मधुर्यः ॥३३॥

दाने माननिदाने विनये च नये च यशसि सौन्दर्ये ।
पार्थादेरयथार्थामप्रथयद्यः प्रथां ततः पुत्रात् ॥३४॥

आसन्नासन्नभूमीपतिततिनतिमत्कोटिकोटीरकोटि-
प्रोन्मीलन्नीलरत्नावलिवलितरुचिभ्रान्तभृङ्गाङ्गनाभिः ॥
पीत्वा यत्पादपद्मोदरदरगलितां साधुधूलीमधूली-
स्वैरं यत्कीर्तिगीतैः सपदि मुखरितास्ते दिगन्ताः समन्तात् ॥३५॥

स्वर्वाहिन्याः प्रवाहाः किमु किमुत सुरा ब्रह्मगोविन्दरुद्राः,
किं वा धर्मार्थकामा ननु किमु निगमा ऋग्यजुःसामरूपाः
स्वर्भूपातालालोकाः किमुत किमुदयाः साधुसिद्धित्रयोत्था-
स्तेषां ज्येष्ठस्त्रयाणामखिलगुणगणैर्भूपगोविन्द्रचन्द्रः ॥३६॥

....

यस्यासीदनुजोऽनुरक्तमनुजः श्रीकाशिराजोजग-
ज्जेता तार्ज्जित जैत्रशात्रवमिदं भूमण्डलं मण्डयन् ।
सर्वाशाः परिपूरयन्निजकरैः पद्मोदय भावय-
न्दिक्चक्रं किल लालयन्दिनकृता तेजोनिधिः स्पर्द्धते ॥४४॥

....

तदनु तदनुजोऽजनिष्ट तेजोविजितरविः स नरोत्तमाभिधानः ।
परपरिभविधामधामा कामावरणबोधकतानुरुप रुपः ॥५२॥

....

गोविन्दकाशिनृपभूपनरोत्तमानां,
सौभ्रात्रमत्र भुवने परिभाव्य भूयः ।
ते रामलक्ष्मणहरीन्द्रयुधिष्ठिराद्या,
वासानिलैर्मलिनयंति यशः स्वकीयम् ॥६४॥

तेषां ज्येष्ठो वरिष्ठः सकलगुणगणैरिष्टपूर्तादिधर्मा-
निर्माता कर्मनिष्ठः सहृदयहृदयानन्दनिष्यन्दकन्दः ।
श्रीमान्गोविन्दचन्द्रः सकलनृपशिरोवन्द्यपादारविन्दः,
सानन्दं ब्रह्मविान्यनरिपरिचरन्याति भूमीमखण्डः ॥६५॥

तरणिसरणिवेल्लच्चञ्चला चञ्चला श्रीः,
कमलदलगताम्भोबिन्दुलोलं किलायुः ।
इति मनसि विमृश्यानन्यसानान्यकीर्तिः,
स्थिरतरपरिपाकं कर्म निर्मातुमैच्छत् ॥६६॥

न खलु जगति जातु कर्मजातं ।
न यदि दमाय करोति कर्मजातम् ।
इह यदजनि साधुसन्निधीनां
पदमयमाजनि साधुसन्निधीनाम् ॥६७

अथ कलिकवलीकृतं कृतज्ञ-
स्मृतिनिगमानुगमात्समुद्धरिष्यत् ।
अनुदिनमनुतिष्ठताहितार्थी
स किल निबद्धुमियेष धर्मतत्त्वम् ॥६८॥

तदुचितचिरचिन्ताचुम्बिचेताः स नेता,
जगति मृगयमाणः पण्डिता (न्) क्षोददक्षान् ।
अपरचिद्भुरवृन्दमंदमन्दादरासत् (द्),
गुरुमथ सविशेषं शेषवंशं ददर्श ॥६९॥

विलसदुभयपक्षैर्भूषितः सद्द्विजेन्द्रैः,
उदधिरिव य आस्ते न्यस्तगम्भीरभावः ।
यदतिविमलदूरापातिसारस्वतौघो-
च्छलदमलपृषंति क्ष्मातलं प्लावयन्ति ॥७०॥

यस्मिन्नासन्नविरतमखप्रक्रिया काण्डशौण्डा-
दान्तास्तत्त्वं मरि....चयोन्मीलदद्वैततत्त्वाः ।
चातुर्योद्योदितहितसदाचार संचार चौरो-
-दंचच्चिन्ताचुलुकनचमत्कारिचातुर्यधुर्याः ॥७१

शाद्वीमर्थमयीं विधाय विविधां वेधा विधाय द्विधा,
सृष्टिं भोगिपतौ परां तदपरां यस्मिन्ननन्याश्रयाम् ।
तं सारस्वतभारधारणपटुं भूभारसारोद्धुरं,
दृष्ट्वा तं वसमावनस्य सदृशौ श्रीशेषनाम्नांचिकत् ॥७२॥

दृष्ट्वा शेषविशेषशेषविविधप्रख्याति सख्यस्पृशं,
यं श्रीमानधिशिश्रिये स्वयमहो विष्णुः पुराणः पुमान् ।
यत्प्रोक्ता किल शेषभाषितमहाभाष्या (ध्धि) पोतायिता,
व्याख्या काचिदुदंचितोचितनया जागर्त्ति लोकत्रये ॥७३

यस्यान्यानि निबंधनानि बहुशो न्यायेथ वैशेषिके,
मीमांसायुगले श्रुतिस्मृतिपथे ब्रह्मार्कसिद्धान्तयोः ।
नित्यं जैमिनिगौतमात्रिकणभुग्गार्गादिनामावलीं,
यत्पर्यायतया दिशन्ति विदुषां श्रोत्रं प्रविश्य स्फुटम् ॥७४॥

इति कति कति नासन्नीतिरीतिप्रतिष्ठाः,
क्षितियतिकुलपूज्याः सर्वशास्त्रप्रवीणाः ।
यदतिविमलकीर्तिस्पर्द्धयोल्लङ्घयिष्यन्,
जलनिधिमुडुपोपिं भ्रान्तिभ्यस्यतीव् (व) ॥७५॥

तत्राभूत्सकलकलाकलापकौतुहलावासः ।
श्रीरामभद्रविबुधः परममहापुरुषलक्ष्मणोपेतः ॥७६॥

तर्के कर्कशतां वहन्नतितरां भाट्टे तथात्युद्भटो
वेदान्तेषु पटुस्तथातिनिपुणः सांख्येपि विख्यातधीः ।
अष्टव्याकरणीप्रबन्धचतुरः साहित्यरत्नाकरः,
क्षोणीमण्डलमण्डनैकतिलकः श्रीरामचन्द्रो गुरुः ॥७७॥

आचारे चतुराननः श्रुतिवनीसंचारपञ्चाननः,
शाश्वद्यश्च षडाननः खलमिलन्मानादिनिर्भेदने ।
नानाशास्त्रवचोविचारणचमत्कारे सहस्राननः
केषामेष मनोविनोदमतनोन्नो रामभद्रो बुधः ॥७८॥

विद्यानामवनिर्गुणैकविपणिश्चातुर्यचिन्तामणिः,
साधूनां सरणिः खलद्विपशृणिः सत्सूक्तिमुक्तास्वनिः ।
निःश्रेणिशरदिन्दुकान्तयशसां श्रेणिःस्वयं श्रेयसां,
विद्याभिः समतां नयत्त्रिभुवनं यो रामसिंहः स्वयम् ॥७९॥

तत्तनयः प्रथितनयः कृतविनयः सृष्टदुष्कृतापनयः ।
अभवद्गुणैकनिलयः श्रीनरसिंहाभिधो विबुधः ॥८०॥

तं शेषामलवंशभूषणमणिं गोविन्दचन्द्रः स्वयं
विद्वन्मण्डलपुण्डरीकतरणिर्भूमण्डलीमण्डनम् ।
धर्मोद्धारविधौ समाहितमनाः प्रीत्यानुनीत्यामुना,
गोविन्दार्णवनामकं व्यरचयत् धर्मप्रबन्धं शुभम् ॥८१॥

अशेषविदुषामेष संतोषाय विशेषतः ।
करोति तदनुज्ञातो नृसिंहः सन्निबन्धनम् ॥८२॥

किं दुर्जनानामिह तर्जनाभि-
स्तुष्यन्ति सन्तो यदि मत्कृतेन ।
शम्भोः शिरःशेखरतां प्रयातं
विधुं धुनीते न विधुंतुदोपि ॥८३॥

श्रुतिस्मृतिपुराणानि निबन्धान्विविधानपि ।
दृष्ट्वा सम्यक्समासेन सारोद्धाराय मे श्रमः ॥८४॥

तत्रादौ सुखबोधार्थं ब्रूमः प्रकरणक्रमम् ।
संस्कार आह्निकं श्राद्धं शुद्धिः काल इति क्रमात् ॥८५॥
वीचयः पञ्च विज्ञेयाः सर्वशास्त्रार्थदीपिकाः ॥(८५)॥

निबन्धमतिभेदेन धर्मतत्त्वं यदस्फुटम् ।
विविच्यते सहृदयप्रीत्यै तन्न्यायलेशतः ॥८६॥

CLOSING : कामभक्षापर्युषितभोजनादिः प्राग्विवाहात्स्त्रीणामप्येष कामचारः तासां विवाहोपनयस्थानीयत्वात् ।

विष्णुपुराणे ।

भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ।
अस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते ॥

इति ।

वसिष्ठोपितहर्यस्य विद्यते कर्म किञ्चिदामो....।
(समाप्तम्) ।

1107/3731 धर्मविवेकः

OPENING :

कनकं च तिला नागा दासीरथमहीगृहाः ।
कन्या च कपिला धेनुर्महादानानि वै दश ॥१॥

COLOPHON :

इति धर्मविवेकः सम्पूर्णः ।
दानखण्डपदार्थानामनुक्रमोऽत्र कथ्यते ।
तत्र योजनिकाक्लेशैः श्लोकैर्ज्ञानं विलंबते ॥

....

उद्धवोदीच्यविप्रेण नर्मदातीरवासिना ।
निबन्धो लिखितः कृत्स्नो धर्मविवेकसंज्ञकः ॥१॥

शुभमस्तु । श्रीदुर्गाचरणे (युगलम्) ॥

क्षयकृद्वत्सरे याम्येयनेनाद्रे [भाद्रे] सिते तिथौ ।
कामे बुधे कृतो ग्रन्थो बुधेन विश्वकर्मणा ॥१॥

अभ्यस्य विद्या [:स्व] गुरुप्रसादा-
ज्ज्ञात्वा तथा देशविशेषरीतीः ।
विश्वेश्वरं भावनया विचिन्त्य,
ग्रन्थः कृतो धर्मविवेकसंज्ञः ॥२॥

आलोक्य कल्पद्रुमपारिजात-
स्मृत्यर्थसारान्समितीक्षरांश्च ।
हेमाद्रिरत्नस्मृतिदर्पणादी-
न्ग्रन्थः कृतो धर्मविवेकसंज्ञः ॥३॥

स्थानं मया वैषयिकं सदैव
त्यक्त्वा तथा लोकविशेषयात्राः ।
हित्वा च वित्तार्जनकार्यजातं,
ग्रन्थः कृतो धर्मविवेकसंज्ञः ॥४॥

मे मे कुले सर्वसमृद्ध युपेते,
विद्यावदाते यशसा सभेते ।
लब्ध्वा मया जन्म कथंचिदत्र
ग्रन्थः कृतो धर्मविवेकसंज्ञः ॥५॥

शब्दतश्चार्थतश्चापि यत्र शुद्धं भवेदिह ।
तच्छुद्धं क्रियतां विज्ञैरुपकारपरैः सदा ॥६॥

यावद्गंगादयो नद्यो यावत्सूर्यश्च चन्द्रमा ।
तावत्कालमियं जीयाद्विश्वकर्मकवेः कृतिः ॥७॥

विद्वन्नयनपालंश्च [मालंब्य] सौभाग्यं भजतामियम् ।
सर्वरथ्योदकं गाङ्गसलिलान्त्वर्गं यथा इति ॥

इति धर्मविवेकः सम्पूर्णः ॥

Post-Colophonic : संवत् १५८३ ।

x x x

1108/3919 धर्मसंग्रह

OPENING : श्रीगणेशाय नमः ।

प्रणम्य जगतामीशं पार्वतीवल्लभं शिवम् ।
भवानीमातरं देवीं तत्सुतं विघ्नहारकम् ॥१॥

वासुदेवं जगन्नाथं ब्रह्माणं च सुरस्वतीम् ।
महालक्ष्मीं गुरुञ्चैव ध्यात्वा वाल्मीकिजां गिरम् ॥२॥

ऋषीन्सर्वान्नमस्कृत्य कवीन्सर्वान्विशेषतः ।
वक्ष्ये सनातनं.....धर्मस्य संग्रहम् ॥३॥

यो धुर्य्येणगमो ग्रहेउडुपगो युग्मो विनाषादभी:
कृष्णम्वर्यशुचि: शिवारतरसीनाभ्यब्रुहासीन भू: ।
द्यौ सच्चम्बन-अयत्सलिलज: शेषस्वयोष्टार्द्ध दो-
राद्य: शूल्यशिवाडच्य (?) दमृतदो बाहु: सन: कुंदभ: ॥४॥

श्रीमान् धर्मपर: परोपकृंतिक: श्रीसज्जनानन्ददो,
लाला-लालबहादुरो विजयते कायस्थकल्पद्रुम: ।
गङ्गासूर्यसुतान्तरालरमणे देशे जहानादिगे-
वादाख्येषु पुरे पुरारिचरणाम्भोजानुरागी कृती ॥५॥

तेनैव प्रेरितोऽहं सकलगुणनिधि(सत्)कवीनां कवीनां,
पादे पादुकात्माविमलतरमतीनां गणेशाभिधान: ।
कर्त्तुं धर्म्मस्य मार्गं सकलजनकृतौ को विधि:? को निषेध-?
इत्येवं ग्रन्थपूतान् बहुलमुनिकृतान् संविलोक्यार्थगूढान् ॥६॥

नानापुराणनिगमागमसंमतं यत्,
श्रीयाज्ञवल्क्यमुनिवाक्यमथान्यवाक्यम् ।
श्रीनागदेवकमलाकरवाक्यजातं-
सर्वं विलोक्य कथने न ममात्र दोष: ॥७॥

न चमत्कृतं चात्र न बुद्ध्या प्रतिपादितम् ।
परप्रणीतवाक्येन वर्ण्यते धर्मसंग्रह: ॥८॥

सर्वर्षिवाक्यभेदेन पण्डितानां तथोक्तिषु ।
क्वचित् क्वचिन्मदीयात्र संदेहे संस्कृतावली ॥९॥

धर्मसम्यक्प्रकारेण सदा संदेहसङ्कटे ।
ग्रहासीत्यर्थमालोक्य कृतोऽयं धर्मसंग्रह: ॥१०॥

श्रीमल्लालाभिध: कर्त्ता ग्रन्थस्यास्य प्रयोजक: ।
द्वितीयं नाम तेनास्य कृतोऽयं लालसंग्रह: ॥११॥

धर्मसंग्रहनामायं यस्य दृग्गोचरो भवेत् ।
तस्मै कृता गणेशेन ललाटाञ्जलिसंपुटा ॥१२॥

क्षमध्वं ममदौरात्म्यं, भवतां चरणे शिरः ।
कृतं मे सज्जनाः सर्वे सहन्ते बालभाषितम् ॥१३॥

धर्मग्रन्थमतानां तु, बह्वृषिवचसां तथा ।
एकत्रीकरणे चैव केवलं मे परिश्रमः ॥१४॥

इति धर्मसंग्रहनाम्नोऽस्य त्वाचाराध्याय उत्तमः ।
समाप्तिमगमच्छम्भोः प्रसादात्तत्सुतस्य च ॥१॥

सज्जना दुर्जनाश्चैवं दृष्ट्वेमं धर्मसंग्रहम् ।
हसंतस्तोषमेष्यन्ति सुबोधाच्चाप्यऽबोधतः ॥२॥

श्रीमल्लालबहादुरेण कथितः श्रीसज्जनानंददम्,
चक्रे धर्ममयं सुसंग्रहमिमं नाम्ना गणेशः कृती ।
त्रिव्योमाङ्कमृगाङ्कवत्सरगते श्रीविक्रमादित्यभू-
पालाधिष्ठित राज्यतः सितदले पौषे द्वितीया रवौ ॥३॥

.... ॥४॥

COLOPHON : इति श्रीमल्लालबहादुरप्रेरितपण्डितगणेशेनान्वेषितनीलकण्ठ-कमलाकरमतानुसारेण मन्वादिवाक्यसमुदाये धर्मसंग्रहे आचाराध्याये गृहस्थ-प्रकरणे कलियुगवर्ज्यकथनं नाम ॥

रवेन्दुभाग्यमृगाङ्कब्दे विक्रमादित्यराज्यतः ।
श्रावणे कृष्णपक्षे तु द्वादश्यां चन्द्रवासरे ॥१॥

कालीचरणहस्तेन लिखिते धर्मसंग्रहे ।
समाप्तिमगमच्चासावाचाराध्याय उत्तमः ॥२॥

असदुल्लापणे यत्स्यादश्मङ्कांकितवर्णकम् ।
पण्डिताः शोधयिष्यन्ति शब्दसद्व्यक्तिहेतवः ॥३॥

दानाध्यक्षो द्विवेदीविमलतरमती राजते दानकाले,
दीर्घायुस्सोपि भूयाद्धनकइति समाख्यापितो धर्ममूर्त्तिः ।
लालाज्ञामधिगम्य येन सकला छायाधिकारे जनाः,
तृणाद्रव्यसमुच्चयैः प्रतिदिनं वस्त्रैस्तथा भोजनैः ॥४॥

श्रीमल्लालबहादुरः स्वसदनद्वारे गुरोराज्ञया
देवीदीनधिया (?) विनिश्चितमथो छायाश्मनोदङ्कितम् ।
आद्यं खण्डमिदं स्वसंग्रहकृते पूर्णं चकाराङ्कितं,
सोऽयं यावदिलातलं विलसतात् विद्वज्जनानां पुरः ॥५॥

शुद्धमञ्जरीव्याख्या छायाश्मन्यङ्कितास्तथा,
तुर्य्योत्तराश्चैव चतुःशताः (स्तत्र विनिर्मिता)

....

प्रेषिता मे चतुर्दिक्षुधर्मसंग्रहकुट्टिका ॥६॥

तेषां तु शुद्धकरणे दृष्ट्वा कालस्य दीर्घताम् ।
प्रेषिता तैः सहेयं मे निर्मिता शुद्धमञ्जरी ॥७॥

आदौ तु पत्रनामाङ्कं पङ्क्तिनामततः परम् ।
अशुद्धवर्णस्थाने तु शुद्धो वर्णोऽत्र दृश्यताम् ॥८॥

शुद्धेपि शोधयंत्वार्य्याः कृपां कृत्वा ममोपरि ।
न हि दृष्टिपथं प्राप्य विदुषां शब्ददुष्टता ॥९॥

अथ सूची पत्र-व्याख्या

यत्कार्यं दृष्टुमिच्छा स्यात् संदेहे धर्मसंग्रहे ।
तस्यैव अन्वेषणं शीघ्रं सूचीपत्रे प्रदर्शितम् ॥१०॥

तत्कार्यं पत्रके यस्मिन् तत्कार्यं प्रकटीकृतम् ॥
प्रथमं पत्रनामाङ्कं कार्यं नाम ततः परम् ॥११॥

नमस्तस्मै भगवते सर्वमङ्गलहेतवे ।
यत्कृपालवलेशेन ग्रन्थोऽयं पूर्णतामगात् ॥१२॥

श्रीमल्लालबहादुरेण विनयैर्नीतः स्वकीयां भुवं ।
चक्रे धर्म्मविदाम्मुदेऽखिलगुणैर्युक्तो गणेशः कविः ॥

ग्रन्थं सद्गुरुधर्मशास्त्रविषयं नानाविधोनिर्णयः ।
यत्रादर्श इवावभाति परमः सर्वस्मृतीनामयम् ॥

गोभूग्रामहिरण्ययानपटभूषाद्यैः समामानितः ।
कृत्वा ग्रन्थममुं समर्प्य यदलं यत्रास्ति सर्वाः क्रिया ॥

श्रीमल्लालबहादुरोऽथ कृतवान् श्रीगोकुलस्थाच्छ्रुतिं ।
श्रीमद्भट्टगणेशतोखिलममुं श्रुत्वाथ तस्मात् पुरा ॥

गोभूहिरण्यपटयानसमूहरत्न-
भूषासुपात्रविभवान् परितोष्य भूयः ।
श्रीमच्चतुर्भुजकृपां बहुलां सलब्ध्वा,
कीर्तिं यशोधनगजाश्वसुतादिदात्रीम् ॥

मुद्राङ्कितानि ललितान्यथ पुस्तकानि,
विद्वज्जनैश्चबहुशः परितो विशोध्य ।
संप्रैषयत् सबहुदेशविदेशकेषु
विद्वज्जनेभ्य इह लब्धमहासुकीर्तिः ॥

Post-Colophonic : अथ ग्रन्थपत्राङ्कसंख्या 246; अथ पत्रसंख्या 129; अथ पुस्तक-संख्या 404; अथ श्लोकसंख्या 4060 ।

श्रीरामचन्द्राय नमः ।

x x x

1117/3616 निर्णयश्लोकसंग्रहनिवृति

OPENING: श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।
चेतः प्राङ्गणरवातहुङ्कृतिदृढालानप्रबद्धाकिल-
प्राण्यज्ञानमतंगजप्रमथनव्यासङ्गपञ्चाननात् ।
रामानंदसरस्वतीपरिलसत्पद्माकरालम्बना-
दाविर्भूततनुं प्रभाकरगुरोः शार्दूलविक्रीडितम् ॥१॥

पद्मकौस्तुभभूषणं सदा चरणाक्रान्तफणीन्द्रमण्डनम् ।
कवितावदनालयोद्भवं हृदि नारायणतातमाश्रये ॥२॥

नत्वा राधाम्बां गङ्गारामो जडीति यः ख्यातः ।
तस्य स्मृतिप्रबन्धः संग्रहसुश्लोकितैः पूर्वैः ॥३॥

CLOSING & COLOPHON :

वर्षे वर्षाकाले शीतलकरकरबसुवसुधामिलिते ।
व्यलिखद्गङ्गारामो गङ्गारामोभयप्रीत्यै ॥

इति श्रीमज्जड्चुपनामकगङ्गारामविरचिता संग्रहश्लोकविवृत्तिः सम्पूर्णमस्तु ॥ श्रीकृष्णार्पणमस्तु ॥ शुभमस्तु ॥

x x x

1119/3649 निर्णयसार

OPENING :

नमस्कृत्य प्रवक्ष्यामि नरनारायणावृषी ।
बालबोधाय संक्षेपात्तिथिकालविनिर्णयम् ॥१॥

तत्र तिथिः प्रतिपदादिः सा च प्रायो वैष्णवव्रतव्यतिरिक्तविषये कर्मकालव्यापिनी ग्राह्याः ।

CLOSING & COLOPHON :

श्राद्धनिर्णयसमुद्रमपारं को लभेदनृषिरस्य च पारम् ।
तेन सर्वमुनिसम्मतसारं क्लृप्तमेतदनवोक्त्यनुसारम् ॥

'इति श्रीमिश्रनंदरामकृते निर्णयसारे श्राद्धनिर्णयो नाम षष्ठः परिच्छेदः ॥'

एषो निर्णयसारः सुलघुपरिच्छेदषट्केन ।
ग्रथितोत्रानुष्टुब्जासंख्याभवियत्क्रमाब्जमिता ॥१॥

बालबोधाय संक्षिप्तस्थितिकालविनिर्णयम् ।
अतो ग्रन्थांतरेभ्योपि विशेषस्तु विलोक्यताम् ॥२॥

यः श्रीकामवने व्रजे निवसति श्रीदीपचन्द्रात्मजो,
मिश्रोनंद इति प्रथामतिगतस्तेनादितिर्थाब्धितः ।
सारंसारमिहोद्धृतं तिथिकृते स्वीयात्मनां ज्ञप्तये,
यत्त्वत्राधिकमूनमुक्तमपि तच्छोध्यं दयार्द्रैर्बुधैः ॥३॥

रसगुणधृतिमिति १८३६ विक्रम, संवत्सरबोधनीदिवसे ।
पूर्त्तिमगाद्ग्रन्थोयं निर्णयसारेति संक्षिप्तः ॥४॥

Post-Colophonic : इति श्रीमिश्रदीपचन्द्रात्मजमिश्रनंदरामविरचितो निर्णयसारः सम्पूर्णः ॥

x x x

1128/3635 प्रतापार्क

OPENING : अङ्गरङ्गपरिनृत्यदनङ्गं, सीतया रहसि कल्पितसङ्गम् ।
सन्नमामि कृतभार्गवभङ्गं राघवं कलितरङ्ग [तरङ्गम्] ॥१॥

स्वस्ति श्रीमनुजातिराजितमहावंशावतंसोखिल-
क्षोणीपालविशालसद्गुणगणैर्भूमण्डले विश्रुतः ।
आसिन्धुस्फुरदुज्ज्वलोज्ज्वलयशाः सश्रीभृतो भूभृतां
भूषा श्रीजयसिंहभूपतिपतिर्भूमण्डलाखण्डलः ॥२॥

येन श्रीश्रुतिमार्गपङ्कजवनीसूर्येण धर्मादरा-
ल्लुप्तप्राय इहाखिलः श्रुतिपथः प्राकाशि धर्मावहः ।
येनाकारि तुरङ्गमेध उदिताच्छास्त्रोक्तमार्गात्पुनः,
भूदेवामरशाखिना सुकृतिना कालै कलावप्यहो ॥३॥

तस्यासीत्तनयः प्रसिद्धविनयः श्री माधवोमाधव-
श्रीपादाब्जरतिर्धरासुरनतिर्भूमीपतिः सन्मतिः ।
यत्सौंदर्यकला विलोक्य विमलः कामोपि कामं मुदा
लोकैराकलि कल्पनापटुतरैः शोभाभरान्निर्भरम् ॥४॥

तत्सूनुर्विलसत्प्रतापमहिमा श्रीमत्प्रतापाभिधो,
भूयो भूपतिभूषणाखिलगुणग्रामाभिरामोत्सवः ।
वैरिव्रातविघातको बहुकलावैदग्ध्यविद्यानिधि-
र्भूविख्यातयशाः क्षितौ विजयते युद्धोद्भटो जिष्णुवत् ॥५॥

सद्गीतागमशुद्धमुग्धरमणीनृत्यद्बल्लासको,
रासोल्लासविलासकृष्णकलितानंददधरावंबरः ।
राज्यश्रीशुभचिंतकः क्षितिसुराभीष्टैककल्पद्रुमः,
चातुर्योच्चयचुंचुचारुचरितो रामाभिरामाकृतिः ॥६॥

श्रीशाण्डिल्यमुनेः कुले किल महाशब्दोपनामाजनि,
श्रौतस्मार्तसमस्तकर्मनिपुणः श्रीदेवभट्टो महान् ।
रामाङ्घ्रिप्रवणस्ततोजनि सुधीः सम्राट् स रत्नाकरः
काशीस्थो बहुविश्रुतो निजकुलालङ्कारचूडामणिः ॥७॥

कृत्वा येन सतां मतेन विधिवत्सद्वाजपेयं पुनः,
चक्रे वैदिकसत्कृतेन कृतिना श्रीपुण्डरीकः क्रतुः ।
विप्रेभ्यो विधिवत्प्रदाप्य बहुशो ग्रामान्निकामार्थदान्,
कीर्तिर्येन च संविधाय विमलां ब्रह्मास्पदं प्रापिता ॥८॥

स्वस्तिश्रीजयसिंहनामनृपतेर्नामाङ्कितो भूतले,
ग्रन्थः पण्डितसम्मतोऽतिललितः कल्पद्रुमाख्यः कृतः ।
विद्याविश्रुतसत्कुशाग्रमतिना तत्तद्गुणाम्भोधिना,
श्रीरत्नाकरशर्मणा जयति स क्षोदक्षमो धीमताम् ॥९॥

तत्सूनुः सुकृती कृकृती समभवद्भूदेवदेवद्रुमो,
गङ्गाराम इति प्रथामधिगतः श्रीमान्महायाजकः ।
येन क्षोणिपतिप्रपूजितपदाम्भोजेन काश्यां मुदा,
दत्ता ब्रह्मपुरी विधाय विधिवद्भूमीसुरेभ्योऽचिरात् ॥१०॥

आसीत्तत्तनुजो निजान्वयगुणावासीतिशान्तो मही-
भूषा भूसुरमण्डनं मुनिरिव ख्यातः स रामेश्वरः ।
येनालं परकामिनीपरधनाकाङ्क्षापि नाराधिता,
स्वप्नेऽपि स्फुटकीर्तिता कलयता श्रीशम्भुना तुल्यताम् ॥११॥

जातस्तत्तनयो द्विजातिविनयो विश्वेश्वरः सन्मतिः,
स्वस्तिश्रीसुमतिप्रतापधरणीपालाज्ञया धर्मधीः ।
आदाय प्रपितामहेन रचितात्कल्पद्रुमाद्विस्तृतात्,
CLOSING : सारं संतनुते बुधोपकृतये सोकं प्रतापादिकम् ॥१२॥

प्रीयतां जानकीजानिरनेन सुकृतेन मे ।
सर्वान्तरात्मा सर्वज्ञो रामो नोभीष्टदैवतम् ॥१॥

इति विश्वेश्वररचिते प्रतापभूपाज्ञया प्रतापार्के ।
विद्वद्विनोदकंदे गतो मयूखः कलासंख्यः ॥

COLOPHON : इति श्रीमद्वाजपेयपौण्डरीकाद्यनेकक्रतुयाजिमहाशब्दोपाख्यरत्नाकर-भट्टात्मजश्रीगङ्गारामभट्टसूनुनाश्रीरामेश्वरभट्टपुत्रेण विश्वेश्वरेण रचितः प्रतापार्कः समाप्तः ।

x x x

1189/3828 वेगराजसंहिता

OPENING : श्रीगणेशाय नमः ।

यद्दन्तोद्गतमानवो विदधते प्रत्यूहतूलाहुतिं,
तत्कुम्भोद्भववर्चसाविघटितं, दु....।
यद्भालोद्गतपावकः क्षपयते दुष्कर्मवैषद्रुमा,
(भू) न्नूयाद्भूतिसमुच्चयाय भगवान् श्रीवेगराजस्य सः ॥१॥

श्रीमत्परशुहस्ता....गाङ्गदाय च ।
अच्छसिन्दूरवर्णाय गणानां पतये नमः ॥२॥

यस्मिन् प्रसन्ने किल निर्गुणोऽपि,
वचोभिकाशं लभते चिरेण ॥
तं ज्ञानरुपं.....देहं,
शिवं शिवायैव नमामि नित्यम् ॥३॥

नत्वा हरं हरिमथो जगतामधीशं,
संषक्तनिर्मलतनुं सितकृष्णरूपम् ।
श्रीवेगराजनृपतेः [शुभ] कीर्तिहेतो-
स्तद्वंशवर्णनमतः क्रियतेऽधुना च ॥४॥

जातः पूर्व्वमुदारकीर्त्तिरमरप्रख्यश्च साधुः शुचिः
दानध्वस्तदरिद्रकुत्सिततरः [संह्-] ष्टकल्पद्रुमः ।
येनामान्ययशो युगं निजहृदा मेरुर्नदत्तो मया,
सिन्धुश्चापि 'निरम्बुतां नहि गतो यद्दानतोपव्ययैः ॥५॥

उद्यद्वैश्यकु.....जनिभूः कुल्याब्जभानुः सदा ।
विप्रव्रातविनिद्रकैरवगणे चन्द्रः कलानां निधिः ॥
येनाकारि जगत्त्रयं निजयशः शुद्धप्रवाहैः सितं-
गाङ्गे .....रथेन शुचिनापावित्र्यहेतो रविः ॥६॥

तस्मादभून्मदनपाल इति प्रसिद्धः
यः कीर्तिकर्मगगनोस्फुटशंखपद्मः ।
यो वा यशोभिरनिशं सहसा चकार,
क्षीरोदसिन्धुसदृशान् खलु खड्गसिन्धून् ॥७॥

प्रमुदितवरपक्षः पातितासद्विपक्षः
द्विजगणकृतरक्षः प्रार्थिनां कल्पवृक्षः ।
नृपति सदसि दक्षः क्षोभिताशेषरक्षः,
युवतिषु दृढकक्षः श्रीभ्रुवासौ सदृक्षः ॥८॥

सुधारसाभूषणमण्डलाग्र्यः
सर्वज्ञचूडामणितां प्रपन्नः ।
शरण्यमुख्यः शरणागतानां,
क्षीरोदधेरिन्दुरिवाविरासीत् ॥९॥

अयं विचित्राकृतिकल्पनासु,
गुरोः कृतः कौतलम (कौतुकम) व्यगीष्ट ।
यमः सपत्नैर्मदनो विधूभि-
र्विधुः सुहृद्भिर्यदबोधिसर्वैः ॥१०॥

कर्णः सवर्णो न सुवर्णदाने,
पार्थः समर्थो न धनुर्विधाने ।
का-तिरामो नरलाभिमाने,
येन क्षितिपालयता चिरेण ॥११॥

तत्पुत्रोजनि लाहडः सुरपति प्रख्योऽथ भूरिप्रदो
विद्यामन्दिरमंदिराकुलगृहं पुण्यैरमण्यैः किल ।
ग्रोऽसौनिर्जितमीनकेतनतनुल्लावण्यलीलारसैः,
सद्वैश्यधिपतिः स्वधर्मनिरतः केनोपमाभाजनम् ॥१२॥

तस्मादमूदधितुल्यगुणाद्गुणज्ञः
क्षीरोदधेः किल शशीव समग्रभूतिः ।
श्रीमत्कुलेकुलपतिः कुलचन्द्रभूप-
श्चञ्चत्करोरुचिरदानमहोत्सवेन ॥१८॥

तस्मात्सर्वगुणाधिकाः समभवन्पुत्राश्च वीरव्रता,
पञ्चाग्र्याः वरमौजस.....यैर्भूषिता मेदिनी ।
प्रत्येकं तु न शक्यते प्रकथितुं तत्तद्गुणो मानवैः,
शेषो वा यदि शक्यते प्रविलसज्जिह्वासहस्रद्वयः ॥२२॥

आ.....भद्यद्राज गुणैरुदारो,
राजा रजन्यामिव विप्रराजः ।
आमोदिता येन यशो महिम्ना,
दिशामधीशादशशुक्लवर्णाः ॥२३॥

ततोनुजो नल्ह इति प्रसिद्धः
संतोषिताशेषगुणप्रसिद्धः ।
यः सर्वशास्त्रेषु मनोविशुद्धो,
रणाङ्गणे निर्जितशत्रुसङ्घः ॥२८॥

उदार वारिद्रहरः परेषां,
स्ववीर्यसंपादितभूतिभिर्यः ।
स क्षेमसिंहोजनि तत्तृतीयः
स्वकर्मसम्पादितदेवदेहः ॥२५॥

निसर्गसंस्कारसुतत्वनिष्ठो,
जातः कनिष्ठः किल देविदासः ।
यः शौर्यवीर्यादिगुणैरुदारैः,
सैकः सपत्नानजयत्समग्रान् ॥२६॥

तेषामष्टदिगीशभूतिमहसां मात्रात्मदेहः पुन-
र्ज्जातः कृष्ण इव प्रसिद्धमहिमाभूत्राणकामः किल ।
सत्तोयाम्बुदनीलनीरजरुचिः फुल्लाब्जनेत्रः स्फुर-
द्बाहुद्वन्द्वलसत्कलेवरवरः, श्रीवेगराजः क्षितौ ॥२७॥

श्रीमत्कृष्णपदारविन्दविलसन्माध्वीकलोभभ्रम-
च्चेतोभृङ्गशिशुर्महाकविरयं श्रीवेगराजाङ्कितम् ।
काव्यं सद्गुणशालिवर्णनमिदं संचिन्त्य शास्त्रान्तरं,
श्रीमन्मिश्रमहेश्वरो व्यरचयद्वैदग्ध्यभाजाम्मुदे ॥४१॥

विलोक्य मन्वादिमुनिप्रणीताः,
स्मृतीः पुराणानि निबन्धमुख्यान् ।
धर्मप्रकाशाय सतां निबन्धः
संलिख्यते बुद्धिबलानुसारम् ॥४२॥

CLOSING:

रंध्रेषुबाणशशि संयुतवत्सरेऽस्मिन्,
श्रीविक्रमेन्द्रनृपतेर्गणितामिते च ।
श्रीमत्सिकन्दरमृपे किलभुज्यमाने,
राज्ये च केगमृपतिर्व्यदधन्निबन्धम् ॥२७॥

मासे च कार्त्तिकशुभे किल कृष्णपक्षे,
वारे रवौ दशतिथौ खलु पुष्यधिष्णे ।
ढिल्यां (?) महाश्रयवरः कृतवान्निबन्धं,
वेगेन्द्रभूपतिमणिः श्रुतकृष्णभक्तिः ॥२८॥

COLOPHON : अथशुभसम्वत्सरेऽस्मिन् श्रीनृपतिविक्रमादित्यराज्ये सम्वत् १९०२ वर्षाऋतौ श्रावणे मासे कृष्णपक्षे १३ तिथौ भृगुवासरे पुनर्वसुनक्षत्रे..... ता दिने वेगराजसंहिता समाप्तम् ॥

Post-Colophonic : लिखितं शुभचिन्तकब्राह्मणबलदेववासी आभानेरी लिखायतं महाराज श्रीराबराजा श्रीसवाईविनयसिंहजी ।

x x x

1195/3788 शान्तिविवेक

OPENING : यत्तत्सुरासुरशिरोमणिघृष्टपीठ-
मुत्सङ्गभूषणमुमाहरयोरुदारम् ।
धामस्तमंधपसुधाकरधाम नौमि,
वक्त्रेण वारणमनीश्वितवारणं तत् ॥१॥

अत्रोपसर्गनिवहेन निपीडितस्य,
शान्त्यै जनस्य करुणावरुणालयोऽयम् ।
श्रीशक्तिसिंहतनयो विनयोदितः श्री-
राजा विवेचयति शान्तिकपौष्टिकानि ॥२॥

अत्राणं वा पृथुमपि गुणं पर्वतीकृत्य दोषा-
न्प्रेम्णा नम्रे मयि सुमनसः सन्ति सन्तो दयार्द्राः ।
तैन्ये दूरात् प्रकृतिकुटिला वंदिता प्रोझ्यसारं
ये स्युर्दोषग्रहणकुशलाश्चालनीतोलनीयाः ॥३॥

CLOSING : महाराजाधिराजस्य मदनेन्द्रस्य शासनात् ।
श्रीमल्लिनाथगूर्जरेण भट्टपूज्यात्मकेन वा ।

भट्टश्रीविश्वनाथेन काशीतीर्थनिवासिना ।
शान्तिकं पौष्टिकं वापि यथाशास्त्रं प्रकाशितम् ।
उर्वी यावत् [भाति] सुमेरुदण्डशिखरासा [स्थानां] नां तपः श्रूयते,
यावत्तत्कनकांबुकुंभसुखमां पुष्णाति हेमाचलः ।
यावद्याति मृगाङ्कमञ्जुलकला मौलौ मृडानी शिवे,
तावत्त्वं [द्वै] सुखशान्तिकर्मविधिषु [भिः] पुष्णातु नूनं जनान् ॥

COLOPHON : इति श्रीराजाधिराजशक्तिसिंहजीदेवस्यात्मजमदनदेवविरचितायां शांतिकपौष्टिविधिनिरूपणं समाप्तम् ॥

समाप्तोयं शान्तिविवेकग्रन्थः ॥

x x x

1201/445 संस्काररत्नावली

OPENING : श्रीगणेशाय नमः ।

अथावसथ्याधाने पूर्वोक्ताधानकालस्य दैववशादतिक्रमे प्रायश्चित्तं कुर्यात् । तत्र कात्यायनः—'कृतदारो गृहे ज्येष्ठो योनादध्यादुपासनम् । चान्द्रायणं चरेद्वर्षं प्रतिमासमहोपि वा ।' तथा 'कालेत्वाधायकर्माणि कुर्याद्विप्रोह्यनापदि । तदकुर्वंस्त्रिरात्रेणमासि मासि विशुद्धयति । यावत्स्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः । तावन्ति कृच्छ्राणि चरे धौम्यं दद्यादथाविधिः ।' तथा 'यावत्कालमहोभीस्यात्तावद्द्रव्यमशेषतः ।' तद्वानं चैव विप्रेभ्यो यथा होमस्तथैव तत् । तद्यथा अभ्रातृमतश्चतुर्थी कर्मोत्तरकालं.....।

CLOSING : विश्वेदेवार्थे महानसेऽग्निमुद्धृत्य पाकानन्तरसंसर्गे कृते सति तत्क्षेपाग्निर्लौकिको भवेत् लौकिकाग्निपाके न दोषः, तदग्निपचितान्नभोजनेन दोषो न प्रायश्चित्तम् । तद्भोजनं किञ्चिन्न्यूनफलदं भवेत् । तदग्निपचितान्न भोजनेन बलिदाने प्राणाग्निहोत्रवैश्वदेवशेषेण कुर्यादिति कारिकादिष्वनुकल्प उक्तं मुख्यकत्वाभावे अनुकल्पो ग्राह्यः ।

COLOPHON : इति प्रवासविधिः ॥

श्रीकृष्णचरणाद्वन्द्वमाधाय हृदयाम्बुजे ।।
सिद्धभट्टतनूजेन काशीपुरनिवासिना ।।
रचितं श्रीनृसिंहेन प्रवासविधिनिर्णयः ।।

x x x

1238/3440 आचार-तत्वम्

OPENING :

श्रीगणेशाय नमः ।

नत्वा हेरंबमातुः पदकमलयुगं प्रातरुत्थाय पुण्य-
श्लोकान्स्मृत्वाथ र[द]क्षो दिशि पटपिहितं कं विधायेषु मात्रम् ।
गत्वा ग्रामादयज्ञैस्तृणदलनिचयैरावृतायामभस्म-
क्षेत्राम्भः पर्वतायां भुवि विगतवचाः कर्म मैत्रं विदध्यात् ।।१।।

CLOSING :

पूर्वस्यां दक्षिणस्यां दिशि विहितमुदग्नोशिरः स्थानमाहु-
र्दण्डं वा लोहजं वा युग्मविहितं पार्श्वतः साम्बुपात्रम् ।
वेदाभ्यासेन यामद्वयमपरमुगं निद्रया ग्राम्यधर्मैः,
केचिद्रात्रौ विभग्नं जगुरिति गदितं प्रातरारभ्यकृत्यम् ।।६१।।

मंत्रात्मा किल देवतेति निगमाद्यैर्नादृतो याञ्चया,
यायातो भगवान् श्रुतो विधिमुखो यज्ञः समाराधितः ।
तत्तुष्टेन निजेत्तमू भगवता दत्ते चतुर्वेदिता,
सारूप्यं च कथं गताः श्रुतिपथं तेऽमी द्विजाः माथुराः । ६२।

मकरंदः प्रथमोऽभून्माथुरकुल पुण्डरीकमकरन्दः ।
देवपुरोहितमपियो पुरोहितेनात्मना जहास सुखम् ।।६३।।

नित्यं पद्मनि पद्मजस्य मधुरालापैर्यदभ्यस्यते,
वाग्देवीकरवर्तिपञ्जरशुकैस्तन्नामदिव्यं यशः ।
तच्चौदार्यमखण्डितं द्विजकुलं यत्राप्तकामं प्रियो,
नाम्नैं वाग्मिमतः सतां द्विजवरस्सोयं कथं कथ्यते ।।६४।।

आवासो वदनाम्बुजं गुणगणो यत्रानिशं सेवकः,
शीतांशुद्युति सोदरासहचरीकीर्तिर्विभूषायणः ।
इत्यालोच्य विहाय नाकिनिलयान् वाग्देवतासादरं,
यस्मिन्वा समरो च यद्विजयतां सोयं गुरुर्नः सदा ॥६५॥

पाण्डवा इव तस्यासन् पञ्चपुत्रा महौजसः ।
प्रकाशन्ते धरावेद्यांतेप्यग्नय इव त्रयः ॥६६॥

श्रीविद्यानंदरूपेशश्रीगङ्गेशेन सा त्रयी ।
मुख्येन राजते भूमौ रुद्रेणैव सुखत्रयी ॥६७॥

हरिप्रसादेन कृतं तत्पुत्रेणेदमाह्निकम् ।
आकल्पमाकल्पमिव कण्ठे धार्यं द्विजातिभिः ॥६८॥

COLOPHON : इति हरिप्रसादकृतं आचारतत्त्वं समाप्तम् ।

x x x

1328/3719 जीवितपितृकविभागव्यवस्थासार

OPENING : श्रीव्रजराजं पितरं नत्वा मधुसूदनेन या पूर्वम् ।
जीवित्पितृकविभागे धर्म्या रीतिर्यथाशास्त्रम् ॥१॥

संक्षेपेण निबद्धा तस्या अपि सारसंग्रहः क्रियते ।
सुखबोधाय नराणामधुना मधुसूदनेनैव ॥२॥

तत्र प्रमाणयुक्तीनां जिज्ञासा स्याद्यदा तदा ।
जीवित्पितृविभागे द्रष्टव्यं मत्कृते सर्वम् ॥३॥

COLOPHON : इति श्रीलवपुरवासिसारस्वतवंशावतंससकलशास्त्ररहस्याभिज्ञ श्रीगोस्वामिव्रजराजात्मजेन गोस्वामिमधुसूदनशर्मणा विरचितो जीवित्पितृकविभागव्यवस्थासारसंग्रहः ।

Post-Colophonic : समाप्तश्चायं जीवित्पितृकविभागव्यवस्थासारसंग्रहः ॥ संवत् १८१२ ॥

x x x

1356/3659 दर्शनिर्णयः

OPENING : तावज्जयन्ती निर्णीयते सर्वत्र निर्णये शास्त्रमेव हि प्रमाणं न युक्तयः; यदगादि—

तस्माच्छास्त्रं प्रमाणं ते, कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं, कर्म कर्तुमिहार्हसि ॥

COLOPHON : इति श्रीधरीयज्योतिषार्णवकालनिर्णयादिषु तन्निर्णीयते । किमर्थमयमितिचेन्मैवम् तेषु साकल्येनानुक्तेः ।

CLOSING : यथाशक्ति नित्यमेवानुष्ठेयम् । पाद्मे च ।

हरिदिवसमुपोष्य प्रोक्तमार्गेण जन्तु-
र्व्रजति न पुनरंतर्वर्त्तिगोलं जनन्याः ।
बहुव्रजिनसमेतः कामबाणान्वितोऽपि,
व्रजति पदमनंतं लोकनाथस्य विष्णोः ॥

Post-Colophonic : इति श्रीहरितकुलतिलकस्य सरस्वतीवल्लभस्य पुत्रस्य श्री रङ्गनाथसूनोर्वैदिक सार्वभौमापरनामधेयस्य श्रीवेङ्कटनाथस्य कृतिषु दर्शनिर्णये एकादशीनिर्णयः समाप्तः ॥

1379/3409 मांस-मीमांसा

OPENING :

श्रीगणेशाय नमः ।

श्रीगोपीप्रियचरणं नरकादिविभेदि[दकं]हरिप्रहितम् ।
रामाराधनतृप्तं मङ्गलजनकं सुकामदं वन्दे ॥१॥

श्रीकवीन्द्रं नमस्कृत्य पुरस्कृत्य श्रुतेश्मतम् ।
तिरस्कृत्य नवीनोक्ति दर्भगर्भाग्रतीक्ष्णचित् ॥२॥

धीरप्रवीरभूपाललहनासिहनोदितः,
मुनीन्द्रो मांसमीमांसात्तत्त्वं निर्णेतुमुद्यतः ॥३॥

CLOSING :

आसीद्रत्नपतिर्हिमाङ्गदसुतो विद्यावतामग्रणीः,
श्रीमान्राजपतीन्द्र.....पदस्तस्यात्मजास्ते त्रयः ।
जाताः श्रीहरदत्तनामकसुधीः श्रीमान्हरीन्द्राभिधः,
ज्येष्ठः सर्वगुणै रमामणको धीरः कनिष्ठो बुधः ॥१॥

श्रुतौपद्मे वने तर्के वक्तव्ये कुमुदकेवरे ।
श्रीहरीन्द्राच्छ्रीहरीन्द्रात्कवीन्द्रोऽभूद्बुधाग्रणीः ॥२॥

यो रामानुजवंञ्चनोत्पथगतान्निर्जित्य वादे मृगान्,
माध्वाञ्छङ्करतुल्यकानथ च यो जित्वा परान्वाल्लभान् ।
नैग्बार्कान्सुगतादिनास्तिककुलं जित्वान्यपाखण्डिनो,
वेदान्सिन्धुगतानिवोर्ध्वमनयच्छ्रीमान्कवीन्द्राभिधः ॥३॥

सर्वत्रैव ततं विनाशरहितं जन्यं यदीयं यशो,
दृष्ट्वा न्यायविदो विलक्षणमिदं भावादभावादपि ।
भ्रांता वेदविदो द्वितीयघटनापत्तेर्भ्रमं सङ्गता,
भग्नां तामुपमां विलोक्य कवयो मोहं ययुः केवलम् ॥४॥

शौर्य्ये सूर्य्य इव प्रचण्डभुजको भीमो बले कार्मुके,
पार्थः शत्रुनिषूदने व्यवहृतौ धर्म्मोऽथ कर्णो नृपः ।
औदार्येथ कविः कवित्वरचने वाचासु वाचस्पति-
र्जीयाच्छ्रीलहणामृगेन्द्रनृपतिः सर्वैर्गुणैः संयुतः ॥५॥

तेनोदितः सुकविधीरकवीन्द्रसूनुः,
दृष्ट्वा श्रुतिस्मृतिपुराण वचांसिभूयः ।
श्रीमान्मुनीन्द्रविबुधः कृतवान् पवित्रां,
मांसामृतामरनदीं हरितुष्टये सा ॥६॥

भूयो मांसविचाराद्रम्यैषा मांसमीमांसा ।
राधाङ्कवसुनिशेशे विक्रमरचितो दिने सूर्य्ये ॥७॥

COLOPHON :

इति श्रीमहामहोपाध्यायरत्नपतिसुतहरीन्द्रात्मजकवीन्द्रपुत्रमुनीन्द्र-कृतामांसमीमांसा समाप्ता ॥

Post-Colophonic :

सम्वत् १९०६ ॥ श्रावणकृष्णा १२ भौमवासरे पुस्तकं लिखितम् । समाप्तोऽयम् शुभंभूयात् ॥ श्रीरस्तु ।

x x x

1382/3959 विधवाविवाहखण्डन

OPENING :

श्रीगणेशाय नमः । श्रीमत्काशीनाथशर्मशास्त्रिभ्यो गुरुभ्यो नमः ।

बङ्गदेशीयैः कैश्चिन्महाधीभिस्स्वकृतव्यवस्थापत्रे विधवानां विवाहः कलियुगे धर्म इति व्यवस्थापितम् तदिह सदसद्वेति विविच्यते । तथाहि परिवेदनपर्य्याधानयोरिवस्त्रीणाम्पुनरुद्वाहस्यापि प्रसङ्गात्क्वाचिदभ्य-नुज्ञान्दर्शयति-

नष्टे मृते ब्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ।।

इति नष्टे-देशान्तरगमनेनापरिज्ञातवृत्तान्तः । अयं च पुनरुद्वाहो-युगान्तरविषयः । तथा चादि पुराणम्-

ऊढायाः पुनरुद्वाहं ज्येष्ठाक्षङ्गो बन्धनस्तथाः ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ।। इति ।

CLOSING : इह तु अस्य विषयस्याद्यापि अश्रुता दृष्टपूर्वतया परमेश्वरोपदिष्टा-त्रत्यधर्मशास्त्राप्राप्तस्य तस्य करणे सर्वधर्मनियमोल्लङ्घनसाहसं लोकानामुप-दिष्टमिव भवेत् । तथा च स्मृतिवाक्यानां विपरीतार्थबोधेनाभिवसं प्रदायस्य स्थापने सर्वधर्मोप्लवप्रसङ्गाल्लौकिकानुपपत्तीनां च देशान्तरीयाचारदृष्टान्तानां च धर्माधर्मस्वरूपाकल्पकत्वाद्वरमस्मदीयसर्वव्यवहारनियामकतयासिद्धेष्वदुष्टेष्व-नर्थबोधकेषु मनुपराशरादि प्रणीतधर्मशास्त्रेषु सकलैकवाक्यतासिद्धतदर्थभा-वनयासुविचारपूर्वकं शिष्टस्यास्थितिरित्यलम्प्रासङ्गिकेनेतिशिवम् ।

मृतं शरीरमुत्सृज्यकाष्ठलोष्टसपङ्क्षतौ ।
विमुखा बान्धवा यान्ति, धर्मस्तत्रानुगच्छतीति ।।

धर्मशास्त्रानुसृते सूक्ष्मविचारमार्गेणाधर्मभीरुणाधर्मविचारः कर्त्तव्यः ।

मान्यान्प्रणम्य विहिताञ्जलिरेष भूयो,
भूयो निवेद्य विनयं विनिवेदयामि ।

दूष्यं वचो मम परन्निपुणं विभाव्य,
भावावबोधविहितो न दुनोति दोषः ।।

गुरुवरबुधकाशीनाथशास्त्र्यङ्घ्रिसेवा,
प्रबलधिषण राजारामशास्त्री करोति ।

मुनिवचनसुदृष्ट्या लब्धवर्णाति विद्व-
दभिनवविधवीयोद्वाहशंकासमाधिम् ।।

द्विकुनवकुमित्यायां, विक्रमार्कस्य राज्ञः
प्रभवशरदि पौषे पूर्णिमायां प्रपूर्णः ।

अभिनव विघ्नवीयोद्वाह शङ्कासमाधि-
र्गुरुपदनत राजारामशास्त्री प्रणीतः ॥

COLOPHON : संवत् १९१२ पौष सुदि पूर्णिमायां सममान्ययमर्थो भट्टोपनामक वैजनाथ शर्म्मणा ।

x x x

1386/3717 विवादार्णव-भञ्जन

OPENING : विश्वेषां शरणं नवाम्बुदरुचिः सद्भक्तचिन्तामणिः,
यः प्रत्यूहतमोविनाशमिहिरः कीनाशमीनाशनः ।
संसारैकमहार्णवे निपततां निस्तारबीजं नृणां,
गोविन्दः कृपया सुरासुरनमैर्वन्द्यश्चिरं पातु वः ॥१॥

चण्डेशधारेश्वर विश्वरूपा,
मिताक्षराकारहलायुधौ च ।
श्रीकृष्णवाचस्पतिधर्मरत्न-
कृतस्तथा श्रीकरशूलपाणी ॥२॥

गोविन्दलक्ष्मीधरतत्त्वकारा,
आचार्य चूडामणिना च भट्टः ।
वाक्यानि चैषां सुविमृश्य कुर्मः,
ग्रन्थं विवादार्णवभञ्जनाख्यम् ॥३॥

CLOSING : उदितो विस्तरेणायं मिथो विवदमानयोः ।
अष्टादश सुमार्गेषु व्यवहारविनिर्णयः ॥

एवं कार्याणि सर्वाणि सर्वान्सम्यक्महीपतिः ।
देशानुलङ्घानिच्छेत लङ्घाश्च परिपालयेत् ॥

बालेश्वर-कृपाराम-रामगोपाल-कृष्णजीवनाख्यैः ।।
वीरेश्वर-कृष्णचन्द्र-श्रीगौरीकान्ताभिधानैः ।

सद्भिः कालीशङ्कर-श्यामसुन्दर-कृष्णकेशवसङ्ज्ञैः ।
सीतारामसङ्ज्ञैश्च कृतो ग्रन्थः स्फुरतु सभायम् ।

इत्यनेकविषयवासि विद्वद्वृन्दोपवर्णितः ।
विवादार्णवभञ्जनाख्यो ग्रन्थः सम्पूर्णतां गतः ।।

COLOPHON : संवत् १९०५ फाल्गुण शुक्ला १५ गुरुवासरे समाप्तम् । शुभं श्रीरस्तु ।

Post-Colophonic : लिखायतं श्रीमन्महाराजाधिराजराजेन्द्रश्रीसवाईविनयसिंहजीबहादुर शुभम् ।

कल्याणमस्तु । लिखितं भगवानेन मौजपुरमध्ये ।

x x x

1407/3691 श्राद्धाङ्गभास्कर-प्रयोगपद्धतिः ।

OPENING : साध्यसाधनयोगेषु साधके च निजेच्छया ।
अन्तर्यामितया तिष्ठन्फलदोस्तु स्मृतो हरिः ।।१।।

अथ पार्वणश्राद्धप्रयोगः ततश्च श्राद्धमिति निश्चित्य पूर्वेद्युर्वस्त्र-क्षालनस्थानोपलेपनभूमिकरणं च विधाय द्विजान्निमंत्रयीत ।

CLOSING: इतिकर्त्तव्यता सूत्रकर्कभाष्यानुसारिणी ।
श्रीमाध्यंदिनशाखीयैर्गृह्यतां विष्णुनोद्धृता ।।
श्राद्धरत्नानि हि मया श्राद्धरत्नमहोदधेः ।
संगृह्यात्र पिनद्धानि रंजतां दूयेसृताम् [हृदयं सताम्]

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमदनुभूतिस्वरूपदीक्षितयज्ञ-
दत्तात्मजाग्निहोत्रिविष्णुशर्मविरचिते श्राद्धाङ्गभास्करे प्रयोगपद्धतिः समाप्ताः ।।

x x x

1434/3475 सामगाह्निक :

OPENING : श्रीगणेशाय नमः ।

गुरुं नत्वा गणेशं च शातदां सामगाह्निकम् ।
क्रियते क्षेमरामेण सामशाखामतान्वितम् ।।१।।

मनु :—

ब्राह्मे मुहूर्त्तेबुध्येत धर्मार्थावभिचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान्वेदतत्स्वार्थमेव च ।।

CLOSING : विश्वेश्वरो विशालाक्षीं भवानीविन्दु माधवः ।
भैरवो दण्डपाणिश्च रक्षां कुर्वन्तु मे सदा ।।

इति निशिकृत्यम् ।

ततः समीक्षा न त्वं—

चित्रकर्मयथानेकैरागैरुन्मील्यते शनैः,
ब्रह्मायमपि तद्वत्स्यादाह्निकप्रक्रियागणैः ।
माता श्रीपद्मिनी यस्य पिताश्च भवमण्डनः,
तेन श्रीक्षेमरामेण कृतोयं सामगाह्निकः ।।

COLOPHON : इति क्रियादक्षदीक्षितक्षेमरामकृतः सामगाह्निकः समाप्तः ।

Post-Colophonic : सं० १९१० लिखितं माधोब्राह्मणेन ।

1534/3553 पवित्रार्चन पद्धतिः

OPENING : श्रीगणेशाय नमः ।

अथ सद्योधिवासनपूर्वकश्रीशिवपवित्रार्चन प्रयोगः । तदादौ पवित्रकर्त्तव्यता, यथा मन्त्रमहोदधौ ।

हेम दुर्गर्णतान्नोत्थतन्तुभिः पदसूत्रतः ।
यद्वा कर्पाससूत्रैस्तु निर्मितैर्विप्रभार्यया ।।१।।

अन्यया वा सधवयासदाचारप्रयुक्तया ।
कार्तितैस्तानिकुर्वंति न पुंश्चल्यादिनिर्मितैः ।।२।।

त्रिगुणं त्रिगुणीकृत्य निर्माय नवसूत्रिकाम् ।
तां प्रोक्ष्य पञ्चगव्येन क्षालयेदुष्णवारिणा ।।३।।

प्रणवेनाभिषिंचेत्तां मूलेनाष्टोत्तरं शतम् ।
मंत्रयेन्मूलगायत्र्या तावदेव ततः सुधीः ।।४।।

CLOSING : इत्थमभिषिक्तो यजमानो, बन्धुभिस्सहभुंजीयात् । इयं पवित्रार्चा श्रावणशुक्लचतुर्दश्यां यदि न संपद्यते तदा श्रावणासितपक्ष-भाद्राश्विनपक्षद्वयाष्टमी चतुर्दश्यन्यतमतिथौ कार्यातोऽलम्बबहुलेखनायेति शिवम् ।।

COLOPHON : श्रीमद्भूभीशविनयसिंहदेवाज्ञया कृता मिश्रपृथ्वीधरेणेयं पवित्रार्चन पद्धतिः ।।१।।

Post-Colophonic : इति सौभाग्यरत्नाकरे मंत्रमहोदधि-ताराभक्तिसुधार्णव-दक्षिणामूर्त्तिसंहितामतानुसारेणपृथ्वीधरमिश्रकृतः श्रीशिवपवित्रार्चन विधिः ।

लिपिकृतः सुखदेवेन । चैत्र शुक्ल । संवत् १९११ ।

1546/5300 पुण्याहवाचन पद्धतिः

श्रीगणेशाय नमः ।

OPENING : उदीच्या द्विजवर्य्यश्च हरिःशंकरसेवलः ।
तज्ज्ञोगणपतिः कुर्वे स्वस्तिवाचनसंग्रहम् ।।

CLOSING : विश्वानिदेव सवितेति वाश्वऋषिः सवितादेवता गायत्री छन्दः आशिषः ग्रहणे विनियोगः ।।

विश्वानि देव सवितुर्दुरितानि परासुव यद्भद्रं तन्न आसुव ।।

मन्त्रार्थास्सफलास्सन्तु पूर्णास्सन्तु मनोरथाः ।।
शत्रूणां बुद्धिनाशोऽस्तु मन्त्राणामुदयो मम ।।
ऋग्वेदो यजुर्वेदः सामवेदो ह्यथर्वणः ।।
ब्रह्मवक्त्रे स्थिता नित्यं निर्घ्नन्तु मम शात्रवान् ।।

समृद्धिरस्तु पुण्याहं दीर्घमायुरस्तु । अस्य कृतोस्य दानखण्डोक्त समृद्ध्या हिरण्यनिष्क्रयं यथा दास्यमानं द्रव्यं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्योऽहं प्रदास्ये ।।

COLOPHON : इति श्रीदानखण्डोक्तं स्वस्तिवाचनं सम्पूर्णम् ।।

Post-colophonic : सवत् १९६७ मिति मार्गशीर्ष शुक्ल ३ रवि दिने । लिखितं व्यास-दुर्गाशंकर अम्बापुरीमध्ये ।।

x x x

1562/3767 प्रायश्चित्तसारः

OPENING : अनन्तदेवेशकिरीटकोटि-रत्नत्विषा रंजितपादपद्मम् ।
कारुण्यनेत्रं कमलाकलत्रं लक्ष्मीनृसिंहं हृदि भावयामि ।।१।।

नैमित्तिकं धर्मजातं दलाधिपमहीभुजा ।
तत्प्रायश्चित्तसारेण प्रोच्यते लोकतुष्टये ।।२।।

CLOSING :

प्रौढश्रीद्विजराजवंशतिलकाऽलंकार हरिः प्रभुः,
भारद्वाजकुलानुगः प्रथमया यः शाखयालङ्कृतः
श्रीमद्वल्लभसूनुरात्मनिरतः सत्सम्मतां प्रक्रियां,
सारेस्मिन्व्रतमर्थसंज्ञक इह श्रीमान्दलाधीश्वरः ॥
निजामसाहसाम्राज्यधुरन्धर महीपतिः ।
श्रीनृसिंहप्रसादेऽस्मिन्सम्पूर्णं क्रियते शुभम् ॥

COLOPHON :

इति श्रीमल्लक्ष्मीनृसिंहचरणयुगलसरोरुहभ्रमरसकलभूमण्डल समस्त-यवनाधीश्वरश्रीनिजामसाहसमस्तसाम्राज्यधुरन्धरश्रीमन्मम्महाराजाधिराजश्री-दलपतिराजविरचिते श्रीनृसिंहप्रसादे प्रायश्चित्तसारे प्रायश्चित्तानुष्ठाने कर्मविपाक-निरूपणाच्छम् ॥

व्यग्रं सिन्धुहृदुत्तमां दृगपुरीं कुर्वन्नपि श्रेयसः,
कारुण्यादभयप्रदाननिपुणैरालीकनानाक्रमैः ।
आह्लादं निजपादपङ्कजजुषां यः कल्पयत्यन्वहं,
प्रह्लादप्रणयी स नो वितनुतां भद्रं परः पूरुषः ॥१॥

यो लोकस्य गुरुर्विशारदजना यं भावयन्ते गुरुं,
येनैतद्गुरुणोदहारि गुरवे तस्मै नमः सर्वदा ।
यस्माद्वेदपथस्थिरोऽजनि जने यस्य प्रसादा इति,
यस्मिन्सर्वगुणागुरौ हृदि सदा तं त्वां नृसिंहं भजे ॥२॥

Post-colophonic:

इति श्रीमच्चतुर्दशभुवनैकनाथमहेन्द्रदिदेवगणपूजितचरणकमल स्वाडम्बरव्याप्यभुवनत्रय-भक्तानुग्रहकारिसप्तवदनप्रह्लादप्रणयवरदकरभावकर दानैकराजाभयकरजगदेकसुंदरश्रीलक्ष्मीनृसिंहचरणयुगलसरोसहभ्रमरसूर्यवंशति-लकश्रौत्कलतैरभुक्त–गौडगूर्जर-मालवमागधपाञ्चालकर्णाटाङ्गानप्रौढराजस्पृह-णीय कीर्ति-सकलभूमण्डलाखण्डलदिङ्भ्रमण्डलीमण्डनायमानानैकभुजार्जित-प्रतापादिसकलसाम्राज्यपरभवैतवरवपहस्वियुतसत्यातानैक मण्डलाधीश्वर सकसामंतचक्रचूडामणिकिरणरंजितचरणारविंदसकल भूमण्डलमण्डनयवनाधी-श्रीमत्प्रौढ़प्रतापमहाराजाधिराज श्रीसर्वसुंदरीदेवगिरिपुरी वराधीश्वर-समस्तश्वर श्रीमन्निजामसाहसमस्तकरुणाधीश्वरसकलवि.....

-यायवल्कीय-लुप्तशा [स्त्र] प्रवर्तकद्विजराजकुलाङ्कारहरिवंण्णवधर्मप्रवर्तकश्रीवल्लभात्मजश्रीवल्लभपण्डितप्रसादाच्छ्रीसाहिश्रीसूर्यपण्डिताभिधागुरुमत्त्वादिप्रणीत-नीतिशास्त्राभिज्ञमहाप्रभुस्वकार्यावेक्षणप्रतिनिधीकृतश्रीमहाराज-श्रीदलपतिराजविरचिते श्री नृसिंहप्रसादे प्रायश्चित्तसारः सम्पूर्णः ।।

x x x

1599/3403 रुद्रानुष्ठानपद्धतिः

OPENING : श्रीगणेशाय नमः ।

नत्वा विनायकं देवं शङ्करं रेणुकां तथा ।
मोरेश्वराख्यपितरं श्रौतस्मार्तविशारदम् ।।१।।

याज्ञिकानां सौकर्याय सारमुद्धृत्य ग्रन्थतः ।
रुद्रानुष्ठानप्रयोगः संक्षिप्तो रच्यते मया ।।२।।

अथ देवयाज्ञिककाशीदीक्षितरुद्रकल्पद्रुमरुद्रानुष्ठान प्रयोगो रच्यते ।

श्रृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते ।
रुद्राः पञ्चविधाः प्रोक्ता दैशिकैरुत्तरं ।।

COLOPHON : इति अयाचितोपनामकमोरेश्वरभट्टसुतखण्डभट्टविरचितसनवग्रहमुखहोमात्मकरुद्रानुष्ठानप्रयोगः समाप्तिमगमत् ।

x x x

1601/3404 रुद्रार्चन मञ्जरी

OPENING: नत्वा विघ्नविनाशनाय च गुरुं विघ्नेशपादाम्बुजं,
हृत्पद्मान्तरसंस्थवृत्तिजडतानाशाय विद्याप्रदम् ।
विप्राणामुपकारकाय तिथलां भट्टात्मजो मालजी,
नामाहं प्रकरोमि पद्धतिमिमां रुद्रार्चनामञ्जरीम् ।।१।।

पूर्वं तावत् ज्योतिर्विदुक्त रुद्रानुष्ठानयोग्यं समयं निश्चित्य अनन्तरं धर्मानुष्ठानयोग्यं तडागारामसद्मादिदेशं विचिन्त्योक्तस्थलाभेगृहस्योत्तरे देशे पूर्वदेशे वा भूमिशोधनादिविधाय मण्डपादिरचयेत् ।

CLOSING :

आसीद्गुर्जरमण्डले क्षितितलालङ्कारभूते पुरे,
स्वच्छे श्रीस्थानसंज्ञके गुणनिधिः श्रीभट्टरत्नाभिधः ।
तज्जः श्रीतिगलाह्वयः प्रवरधीर्वेदाङ्गरायस्तु यो
नाम्ना मल्लजिदिष्टदेवकृपयेमां पद्धतिं चाकरोत् ।

COLOPHON :

इति विद्वन्मुकुटमाणिक्यभट्टश्रीरत्नात्मजमद्श्रीत्यगलासूनुना मालजिना वेदाङ्गरायोपनाम्नाकृतेयंमहारुद्रपद्धतिः ।। अलवर, सं० १९११

x x x

1975/1759 भागवत पुराण चूर्णिका टीका (प्रथम स्कन्धः)

OPENING :

श्रीगणेशाय नमः । श्रीकुलदेवतायै नमः । श्रीगोपीजनवल्लभाय नमः ।

मूकं करोति वाचालं,
पंङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे,
परमानन्द-माधवम् ।।१।।

COLOPHON :

अथार्थभागवतं लिख्यते । अथ नानापुराणशास्त्रप्रबन्धैः कृत्वा चित्तप्रसत्तिमलभमानः तत्र तत्रापरितुष्यन् नारदोपदेशतः । श्रीमद्भगवद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासः तत्प्रतिपाद्य देवतानुस्मरणलक्षणं मङ्गलमाचरति ।

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्,
तेने ब्रह्महृदाय आदि कवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा,
धाम्ना स्वेन सदानिरस्तकुहकं सत्यं परं धीमहि ।।

ClosingColophon : इति श्रीभागवते महापुराणे प्रथमस्कन्धे चूर्णिकायामेकोनविंशोध्यायः ॥१९॥ अयं स्कन्धः समाप्तः ॥

x x x

1987/1771 भागवत-पुराण द्वादश-स्कन्धः

OPENING : श्रीगणेशाय नमः । श्रीमत्कुलदेवतायै नमः । अथद्वादशस्कन्धो व्याख्यायते ।

COLOPHON : श्री सुम्बय्याख्यापुरे द्विजवर्यसञ्जारामसूनुना सुधिया ।
स्वीय शिलायन्त्रोपरि विट्ठल नाम्नाग्निहोत्रेण ॥१॥....

Post-Colophonic : द्वि तुरगसप्त भूमितशातके साधारणाब्दकाश्वयुजि ।
....ग्रन्थोऽयं-विद्वज्जन सहायतः पूर्णतां नीतः ॥

x x x

2065/1818 भागवत सर्ववेदार्थ प्रकाशिका टीका सह

OPENING : श्रीगणेशाय नमः । श्री श्रीगणेशसरस्वतीगुरुद्विजहरितत्वविद्वत्क्रिमद्भ्यो नमः ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धि साक्षिणे ॥१॥

यो ब्रह्माणं विदधाति पूर्वं, यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवात्म बुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥२॥

रामसिंहं गुरुं वन्दे ब्रह्मात्मैक्य प्रबोधदम् ।
सदासुखं गुरुं वन्दे सच्छास्त्रार्थानुदेशिकम् ॥३॥

हरिमन्त्रप्रदातारं हरिनाथं गुरुं भजे ।
यन्मंत्रोद्भूतसद्भक्त्या लब्धबोधो हरिं गतः ॥४॥

भवं न नयति दासात् भवानीदास ईश्वरः ।
सावित्र्याहृत्तमोहनन्तम् तं वन्दे वर्णदं गुरुम् ॥५॥

राजा सुचेतरामाख्यं, तातं सन्मार्गदर्शकम् ।
पुत्रवात्सल्यतो योऽदात्, गुरुलब्धं हरेर्मनुम् ॥६॥

गणेशं च गिरंवन्दे ब्रजं शम्भुं शिवां सुरान् ।
विदोभक्तान् द्विजान् विश्वं हरिरूपं चराचरम् ॥७॥

CLOSING :

सर्ववेदार्थ सन्मेय कृष्णचन्द्रमुखप्रभा ।
जयत्यग्निकणाभेयरत्नावलिभ्रमापहा ॥१॥

तत्सखी चन्द्रभागाऽहं सर्ववेदार्थसत्प्रभाम् ।
नीराजनतयादाय राधाकृष्णपदेऽर्पये ॥२॥

वैष्णवैः सा सदालोक्य बहुमेयभ्रमापहा ।
सर्ववेदार्थसन्मेय कृष्णे चित्तप्रसादिनीम् ॥३॥

राधां हरिं तत्सखींश्च प्रणमामि गुरून् द्विजान् ।
तत्स्वरूपविदोभक्तान् वैष्णवांनश्च हरिप्रियान् ॥४॥

रामसिंहं गुरुं वन्दे हरिनाथं सदासुखम् ।
भवानीदासकं तातं सुचेतोरामकं नृपम् ॥५॥

भक्तियोगाङ्गयोगाङ्गब्रह्मवर्षे तु कार्तिके ।
शुक्लपक्षे बुधाष्टम्यां जाता वेदार्थदीपिका ॥६॥

COLOPHON इति श्रीमद्भागवते एकादशस्कन्धे श्रीकृष्णचन्द्रनिर्मित-सर्ववेदार्थ प्रकाशिकाभागाख्य-श्रीविष्णुसख्यापन्नैश्रीरामनारायणदासेन निर्मिता समाप्ता ॥

x x x

2067/1838 भागवत-विचार

OPENING ओं श्रीगणेशाय नमः । एवं हि श्रूयते,-

यैर्न श्रुतं भागवतं पुराणं,
नाराधितो यैः पुरुषः पुराणः ।
प्राप्तं न तत्त्वं गुरुवक्त्रतो यै-
स्तेषां वृथा जन्मगतं नराणाम् ॥

इति तत्र किमिदं भागवतं नाम यच्छ्रवणव्यतिरेकेण वैयर्थ्यं जन्मन आपद्यते नन्वयुक्तः संशयो यतः शुक-परीक्षित-संवाद-लक्षणभागवतस्यागोपालाङ्गनामामणितं च प्रसिद्धतरत्वादिति । चेन्मैवं इदमेवन्यद्वेति विप्रतिपत्त्यवरुद्धत्वात् । शुकप्रोक्तत्वं भागवतत्वमित्येके, सारस्वतकल्पवृत्तान्तबोधकत्वं तत्वमित्यपरे, परस्पर-विरुद्धं चैतदुभयमिति भागवतलक्षणाभावेन तन्निर्णयासंभवादिति ।

CLOSING : ततश्च सात्विकान्येव सेवेतेति विधिना राजसतामसानामसेव्यत्वबोधनात् । कुतस्तादृशवचनबलेन सात्विकोपासनं बाध्यते । किंच 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज,' इत्यनेन तदितरसर्वधर्माणां त्याज्यत्वोपदेशात् । येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेपि मामेव कौन्तेय परं त्वविधिपूर्वकमित्यनेन तदितरविधीनामप्रसक्तत्वावगमात् । परं त्वविधिपूर्वकमित्युक्तेरप्राशस्त्यमवगम्यमानं दुर्निवारमिति संक्षेपः ।

COLOPHON : इति भागवतविचारो धरणीधरपंथकूर्माञ्चलीयकृतः ।
Post-Colophonic : सम्वत् १९१३ ॥

2069/1826 भागवत व्यवस्था क्रोडपत्र

OPENING : श्रीगणेशाय नमः ।

श्रीदुर्गाशङ्करं धीरं श्रीरामस्नेहिनं तथा ।
मायेश्वरावहं वन्दे हेतू विश्वस्य भावनौ ॥१॥

अष्टादशपुराणस्थं श्रीमद्भागवतं तथा ।
देवीभागवतं वेति विचिकित्सा मनीषिणाम् ॥२॥

आस्तिकः केशवः कोपि तत्राहं सुधियाम्मुदे ।
राद्धान्तं विदुषां बुद्ध्वा जगत्कारणनोदितः ॥३॥

CLOSING : षड्रन्ध्रनागचन्द्राब्दे (१८९६) चन्द्रषट्सप्त चन्द्रके ।
शके तु (१७६१) श्रावणे मासेऽकारि ग्रन्थको मया ॥२॥

केशवप्रेरितेनाशु केशवेन कुयोगिना ।
वाराणस्याऽसिती [वाराणस्यामसितीर्थ] गङ्गापुष्करसन्निधौ ॥

मननायात्मनः पुण्यः सेव्योभागवतैः सदा ॥

इत्यास्तिककुलोद्भव-गोकुलचन्द्रात्मज-केशवरामविरचितभागवत-व्यवस्थायां क्रोडपत्रराजे गद्यरूपा पञ्चमी पंक्तिः ॥ अगाच्चायं क्रोडपत्रराजोनामग्रन्थश्चरमताम् ॥

श्रीरस्तु ॥ श्रीहरिः ॥

x x x

2096/1828 भागवत-हरिलीलाविवेक

OPENING : ओं स्वस्ति । श्रीगणेशायनमः

नमः कृष्णाय नित्यैकसच्चिदानन्दरूपिणे ।
जगत्सर्गाविसर्गादिसाक्षिणेऽचिन्त्यशक्तये ॥१॥

जयन्ति वोपदेवस्य वाचो विबुधसंस्तुताः ।
घनसारोज्वलाभासा, क्षीरोदस्येव वीचयः ॥२॥

श्रीमद्भागवतस्यानुक्रमणीतद्विनिर्मिता ।
हरिलीलाभिधानेयं यथाबुद्धि विविच्यते ॥३॥

CLOSING : इति भागवतस्यानुक्रमणी रमणीकृता ।
विदुषा वोपदेवेन विद्वत्केशवसूनुना ॥१८॥

हरिलीलेति नामेयं हरिभक्तैर्विलोक्यताम् ।
अस्या विलोकनादेव हरौ भक्तिर्विवर्द्धते ॥१९॥

COLOPHON : इति श्रीभागवते महापुराणे वोपदेवविरचिता हरिलीलानुक्रमणी समाप्ता ।

COLOPHON : हरिलीला विवेकोऽयं कामराजस्य वेश्मनि ।
कटके रचयाञ्चक्रे तुष्ट्यै हेमाद्रिणा सताम् ॥

इति श्रीहरिलीलाविवेकः समाप्तः ।

x x

2362/1493 तर्कभाषा-टीका

श्रीगणेशाय नमः ।

OPENING : यस्य निश्वसितं वेदा,
यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे,
विद्यातीर्थमहेश्वरम् ॥१॥

सकृन्नत्वापि यं लोको,
लभते शान्तिसम्पदम् ।
स नः पायादपायेभ्यो,
यो मानं दत्तकेसरी ॥

भवसंचितपापौघ,
विध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं,
विघ्नराजमहं भजे ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय शिष्टाचारपरिप्राप्तं विशिष्टेष्टदेवताप्रणामं मनसा विधाय य-प्रेक्षावतां प्रवृत्तिसिद्धये विषयम्प्रयोजयते । निदर्शन-चिकीर्षितं प्रतिजानीते ।

CLOSING रूपभेदज्ञानग्रन्थांतरपरिशीलनेन भविष्यति इह तु अनुपयुक्तं रूपभेदनिरूपणं बालव्युत्पादनार्थप्रवृत्तत्वाद्बालव्युत्पादनं सामान्यनिरूपणे नैव जातमिति रूपभेदाश्च निरूपण-सामर्थ्येन चिकीर्षितानि इति सर्वमवदाता ।

COLOPHON : इति श्रीहरिहरमहाराजपरिपालितेन सहर्कजसर्वज्ञेन विष्णुदेवाराध्यतेषु जनसर्वज्ञानुजेन वेत्रभट्टेन विरचितायां तर्के परिभाषा व्याक्रि० ।

Post-Colophonic : पुस्तकशाला सरकार अलवर सं. १९१२ । यथाप्रतिकृतं भवानीदत्त शर्मणा ।

x x x

2665/956 योग सूत्र-विवरण

OPENING : श्रीगणेशाय नमः ।

चण्डीश्वरं गुरुमनंतगुणं प्रणम्य,
स्मृत्वा च तातमनघं हृदि ढुण्ढिराजम् ।
वन्द्यां प्रणम्य जननीं कमलाञ्च पुण्याम्,
सूत्रं पतञ्जलिकृतं विवृणोमि युक्त्या ॥१॥

यो योगिभिः सकलवृत्तिनिरोधपूर्वं-
माहूत एव नियतं प्रणवेन नाम्ना ।
व्यक्तं प्रकाशयति योगमयोगहेतुं,
श्रेयः करोतु सततं सदयं स देवः ॥२॥

CLOSING : भाष्यवृत्तिर्न यस्यास्ति तस्य वृत्तिरियं स्थिरा,
सूत्रवृत्तिर्यथा पञ्च तया वृत्तिरुपेक्षिता ।
सूत्रेणैव तु मालेयं कृत्वा कृष्णपदे धृता,
तत्कुर्वन्तु स्वयं सन्तः सौमनस्येन गूहनम् ॥

COLOPHON : इति महामहोपाध्याय श्रीमन्मिश्रगोपालविरचिते पातञ्जल-सूत्रविवरणे कैवल्यपादः सम्पूर्णः ॥ विश्वेश्वरायनमः ।

Post-Colophonic : सम्वत् शत अष्टादश पंचाशत् सप्त १८५७ ।
अघन सुदि पंचमीवार शुक्र समाप्तम् ।

x x x

2846/1610 अनुमिति-निरूपणसटीक

OPENING : टी० श्रीगणेशाय नमः । ॐ श्री श्रीश गणेश-सरस्वती-गुरुद्विज-हरितत्वविद्भक्तिमद्भ्यो नमः ॥ भगवद्रूपनिखिलचराचरप्रपञ्चाय नमः ॥

यो ब्रह्माणं विदधाति पूर्वं,
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं,
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥१॥

श्रीरामसिंहाख्यगुरुं प्रणम्य सदासुखं श्रीहरिनाथदेवम् ।
सावित्रिदं चैव भवानिदासं सुचेतरामाख्यनृपं स्वतातम् ॥२॥

क्षमाद्रीं मातरं नत्वा तद्राज्ञीं विष्णुतत्पराम् ।
ग्रन्थानुमितिसद्व्याख्यां कुर्वे कृष्णप्रणोदितः ॥३॥

गणेशं च गिरं वन्दे ह्यजं शम्भुं शिवां सुरान् ।
वन्दे ब्रह्मविदो विप्रान् वैष्णवान् तद्वतान् सतः ॥४॥

सर्वात्मकं हरिं वन्दे विश्वं चैव तदात्मकं ।
तत्कृपामाश्रितः कुर्वे तद्व्याख्यां बुधमोददाम् ॥५॥

मूलग्रन्थेऽपि जगन्मङ्गलमङ्गलबोधिकाश्रीगोपालतापनीयश्रुतिरेव मङ्गलत्वेनानुसन्धीयते ।

मू० सच्चिदानन्दरूपाय कृष्णायाक्लीष्टकर्मणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥१॥

रामसिंहगुरुं नत्वा हरिनाथं सदासुखम् ।
वर्णिदं पितरं बालबोधायानुमितिं ब्रुवे ॥२॥

CLOSING : मू०-अयमात्मा ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, तत्त्वमेव तत्, आत्मैव नृसिंहोदेवो ब्रह्मभवति, नान्यतोद्रष्टा, अतोन्यदातम्, नेहनानास्ति किञ्चनेत्यादिश्रुतिभिः अहमात्मा गुडाकेश ।

कृष्णमेनमवैहि त्वामात्मानमखिलात्मनाम् ।
अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ।
अत्र प्रमाणं वेदान्तो गुरुः स्वानुभवस्तथा ।
इत्यादिस्मृतिभिश्च बाधितानि ।

इति श्रीविष्णुसख्यापन्नश्रीरामनारायणविरचितमनुमितिनिरूपणं सम्पूर्णम् । शुभमस्तु ॥

टी०—नत्वा गुरून् हरिं भक्त्या व्याख्यां हि बुधमोददाम् ।
तत्कृपालेशतः कृत्वा तत्पादाब्जे समर्पये ॥१॥

Post-colophonic : मासे श्रावणाकृष्णा सम्वत् १९११ का लिखितं कृष्णरामद्विजेन ।

COLOPHON : इति श्रीविष्णुसख्यापन्न-श्रीरामनारायणविरचिता स्वकृतानुमिति-निरूपणव्याख्या बुधमोददा समाप्ता । तया हरिगुरु प्रीतिरस्तु ।

x x x

3012/1082 वेदान्त-सिद्धान्त रत्नावली

॥ श्री हयग्रीवाय नमः ॥

निखिलनिगमवाच्यं श्रीहयास्यं प्रपद्ये-
ऽगणितगुणनिकेतं हेयशून्यं मुकुन्दम् ।
विधिशिवसुरराजैः सेव्यमानांघ्रिपद्मं,
रमयितुमिदमाद्यं सच्चिदानंददेहम् ॥१॥

कृतनिगमविभागं योगिभिः सेवितांघ्रि,
धृतमुनिवरवेषं वासुदेवांशमीड्यम् ।
यतिगुरूमरुदंशं श्रीमदानंदतीर्थं,
मतिनिधिजयतीर्थं व्यासतीर्थं च वन्दे ॥२॥

संग्रहो ब्रह्मवाक्यानां सत्तर्काः परिधीकृताः ।
यत्राभिधीयते दुर्गं प्रागुक्तिर्वनमालिना ॥३॥

प्राचीनोक्तिगुणान्विता श्रुतिशिखासिद्धान्तरत्नावली,
वाजिग्रीवभुजान्तरेब्धितनयाक्रीडास्पदे चार्पिता ।
नित्यानंतगुणालयस्य दनुजा भूतीर्न मर्षन्ति ये;
तेषां चेतसि सा दधातु दहनं चित्ते सतां मोदनम् ॥४॥

श्रीविष्णोः सदनन्तभूतिनिचयं वेदान्तगीर्भिर्नुतं,
योऽकाण्डे प्रलयततथ्यमिति शिष्यः सौगतस्याधमः ।
वैरं संदधदासुरोखिलसमे वक्तुं च तस्योत्तरं,
को विद्वाननुरौति किं मृगपतिः फेरो रुतं क्वापि वा ॥१॥

वन्दे श्रीहयकन्धरं श्रुतिशिखाभिर्गीतकीर्त्ति हरिं,
योगीन्द्रैः परिभावितं मनसि नित्यानन्ददेहं समम् ।
हेषाभिः परिकम्पयन्तमसुरान्श्चानन्दयन्तं सुरान्,
स्वांघ्री चिन्तयते गिरोऽमलतरा विश्राणयन्तं मुदा ॥२॥

श्रीव्यासमरुदंशं चाक्षोभ्यजयमुखान्मुनीन् ॥
व्यासतीर्थांश्च विष्णुस्तुविद्यागुरुन्नतोस्मि तान् ॥३॥

श्रीभगवतोंघ्रिपंकंजस्य श्रीगोपालस्य रेणवः ।
क्रियासु वैभवं वाचामघराशेश्च शोधनम् ॥४॥

भुक्त्वा श्यामाकमुष्टिं विपदमदमयद्धीनबन्धुद्विजातेः,
दत्वा भूतीःपराः स्वा धृतकर इति मा देहि मां पद्मजापः ।
द्रौपद्याः शाकलेशात्त्रिभुवनमपुषद्यज्वनां दुष्प्रसाद्यः,
स्थित्वान्तः कारिताद्वै मम [तु] यदुवरः संग्रहात् प्रीयतां सः ॥५॥

श्रीगोविन्दविहारभूषितभुवो वृन्दावनात्प्राग्दिशि,
क्रोशानां त्रियुगे पुरे मुनि भरद्वाजान्वया ये द्विजाः ।
श्रीसन्ताहमुचोवसन्ति वनमाली तत्कुलेऽभूद्बुधः,
सम्पूर्णः श्रुतिसंग्रहे ननु परिच्छेदोंतिमस्तत्कृतेः ॥६॥

COLOPHON : इति श्रीवेदान्तसिद्धान्तरत्नावल्यां वनमालिविरचितायां चतुर्थ परिच्छेदः समाप्तः ।

x x x

3026/1250 सिद्धान्तसुधाकरः ।

OPENING : श्रीगणेशाय नमः ।

वन्दे महेश्वरं विष्णुं गौर्या लक्ष्म्या समन्वितम् ।
जगज्जन्मादिकं यस्मात्सच्चिदानन्दलक्षणात् ॥१॥

सिद्धिनाथं गणेशानं वागधीशां सरस्वतीम् ।
गुरून्नत्वोपदेष्टारं प्रणमामि पुनः पुनः ॥२॥

वाक्यार्थे च पदार्थे च वादिविप्रतिपत्तयः ।
महावाक्येषु वार्यन्ते तदर्थदृढबुद्धये ॥३॥

CLOSING :

तत्र तावद्धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः,
उद्धर्त्तुं च जगद्यदेव कृपया द्वैपायनोभून्मुनि..... ।
तत्सूत्रार्थविनिर्णयाय च तथा श्रीशंङ्करोभूद्यतिः,
तं वंदे गुरुमूर्तिकं च सततं श्रीनीलकण्ठं हरिम् ॥४॥

या देवी सुरशत्रुनाशनिपुणा यासीत्पुरास्मात्सती,
या श्रीशङ्करविष्णुधातृमुखकैर्देवैः सदा वन्दिता ।
याचिच्छक्तिरशेषलोकजननी सोमा सरस्वत्यभू,
तां वन्दे श्रुतिरूपिणीं श्रुतिशिरोगम्यां च वाग्देवताम् ॥५॥

अहमेव हरोऽस्म्यहमेव हरिरहमेव जगत्त्रयकृच्च विधिः ।
चिति सत्यसुखाद्वय एव सदा विनिवृत्त जगत्परमात्मवपुः ॥६॥

अर्पयामि महेशाय नीलकण्ठाय शम्भवे ।
सुधाकरमहं भक्त्या ओं तत्सद्धरये नमः ॥१॥

Colophon :
Post-colophonic

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभगवत्स्वरूपानन्दगिरिपाद-शिष्यश्रीसदानन्दगिरिविरचिते सिद्धान्तसुधाकरे मोक्षनिरूपणं नाम चतुर्थः परिच्छेदः । संवत् १९०९ ।

x x x

3180/4468 उत्सवबोध वैष्णवरञ्जनी टीका सह

श्रीगणेशाय नमः

श्रीराधाकृष्णपदाम्बुजमखिलनिजाभीष्टसंसिद्धिहेतुं,
स्वाचार्यकृष्णवंशीहरिरतिमतिदं....चादरेण प्रणम्य ।
कुर्वेऽहं वैष्णवानांविविधिषूरूग्रन्थपर्येषणार्ति,
हर्तुं सद्ग्रन्थमेतत्स्मृतिकृदभिमतं धर्मशास्त्रार्थसारम् ॥१॥

उद्दिशितानां प्रतिवर्षकार्यव्रतोत्सवानां सहनिर्णयेन ।
विधेः प्रबोधाय विरच्यतेयमात्मप्रणीतोत्सवबोधदीपः ।।२।।

पूर्वाचार्यैर्यदप्येष बहुधास्ति प्रकाशितः ।
तदप्यल्पमतीनां स दुर्बोधास्तीत्यसश्रमः ।।३।।

CLOSING : श्रीराधावल्लभाङ्घ्रियकतानोऽत्रासीज्जगद्गुरुः ।
श्रीहरिवंशवंशे श्रीगोस्वाम्यानन्दलालजी ।।३१।।

तत् सूनुरङ्गीलालेन सर्ववैष्णवतुष्टये ।
कृत उत्सवबोधाख्यो ग्रन्थः सम्पूर्णतामगात् ।।३२।।

COLOPHON: इति श्रीमद्धरिवंशाचार्यवंशविभूषणश्रीमदानन्दलालजीसुतश्रीरङ्गी-लालगोस्वामिविरचितास्वकृतोत्सवबोधटीकावैष्णवरञ्जनीसमाप्तिमगमत् ।

Post-Colophonic : सम्वत् १९०४ भाद्रसुदि रविवार लिखितं श्रीगोपालदासेन ।।

x x x

3314/4006 दुर्गासप्तशती टीका पुष्पाञ्जलिः

OPENING : श्रीमङ्गलमूर्त्तये नमः ।। श्री शिलामय्यै नमः ।। ॐ नमश्चण्डिकायै ।।

या श्रीर्वक्षसि शार्ङ्गिणो हरतनौ गौरी विधेः प्रेयसी,
वाणी याति निहन्ति संवितनुते विश्वं गुणैरुज्वलम् ।।
आत्माप्येष न यां विना प्रभवति श्रेयस्करी देवता,
तां मूलप्रकृतिं प्रपञ्चभयतो मुक्त्यै सदोपास्महे ।।१।।

या देवी मधुकैटभप्रमथिनी सानीकमिन्द्रद्विषं,
जघ्ने कासरमीडिता हरिमुखैः संवद्य दूतेन वा ।।
धूम्राक्षं विनिपात्य चण्डमतुलं मुण्डंत्वसृग्बीजभुक्,
शुंभभ्रातृयुतं हतं सुरनुता सा पार्वती पातु वः ।।२।।

ग्रन्थकर्तृ प्रस्तावना

पुरा हि जनमेजयो भवदिकीर्षुरादौ द्विजान्,
अयाचिषुवरान्कुरूनथ तदात्मना गौतमः ॥
चतुर्दशशतीमदाद् विविधशासनानां तदा,
तदागमनहर्षितो मुनिकुलाय तस्मै नृपः ॥३॥

स्वर्णं भूर्यपि दीयमानमसुना नो गृह्णतेस्म प्रभू-
र्ग्रामाख्यात उदस्तदानमिशुनं पत्रं विलिख्य स्वयम् ।
ताम्बूलान्तरतो निधाय च ततस्ताम्बूलमग्र्यं ददौ,
प्रत्याख्येयमिदं न हीति जगृहुर्विप्राः स्मृतिज्ञा यतः ॥४॥

आत्मानं परिवञ्चितं द्विजकुलं मत्वा निजग्रामभू,
भागे तिष्ठदहर्निशं सुनिगमव्याख्यानदक्षं ततः ।
उत्पन्नास्तनयाः स्वशासनजुषस्तेषां कुलान्यद्भु ते-
न्द्रप्रस्थादिसमाश्रितानि कुरुषु भ्राजन्ति गौडाख्यया ॥५॥

महीरंगग्रामो जयति कुरुभूभागतिलकं,
षडङ्गानां साम्नां कुथुमकठशाखाप्रणयिनाम् ॥
सदैवाध्येतारो विदधति निवासं तदभिधा,
द्विजा यत्र क्षोणीपरिवृढपरीक्षित्सुतहिताः ॥६॥

कुले तेषां जातो मनुरिव मनुर्नाम सुकृती,
ततः श्रीमान्विद्वानजनि जगदीशो द्विजवरः ॥
सुतस्तस्य व्याख्यातपसि बलभद्रः सुविदितो,
नये तर्कैर्जेतुं धिषणमपियोऽवाञ्छदनघः ॥७॥

शिवरामसदारतिस्ततः
शिवरामोऽजनि शास्त्रपारगः ॥
यदुनाथपदाम्बुजे निलीन-
स्तनयस्तस्य बभूव नंदनः ॥८॥

विद्यारत्नसमुद्रकः सुजनतासद्धैर्य्यरत्नाकरः,
पीयूषद्रववाक्सुरेज्यधिषणः पाश्चात्यगौडाग्रणीः ।
या [प्रा] ज्ञः सामसु पाणिनीयमतविद्वेदान्तवेत्ताहरे-
र्भक्तो लालमणिश्चकास्ति तनयस्तस्य क्षमासागरः ॥९॥

दृष्ट्वा शास्त्रपुराणसंघमखिलं वेदोपवेदांस्तथा,
यो गोविन्ददयावशंवदतया चक्रे निबन्धान्बहून् ॥
सोऽहं लालमणिर्गिरीशदयितापत्कंजपुष्पन्धयः,
कुर्वेसप्तशतीस्तवस्य विवृत्तिं पुष्पाञ्जलिं नामतः ॥१०॥

CLOSING : एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥१।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये सुरथवैश्ययोर्वरलाभोनामाध्यायः मनुर्भविता भविष्यतीत्यन्वयः । सावर्णिर्भविता-मनुरित्येतावद्वारद्वयंकेचि·····तत्समाप्तिद्योतनार्थम् । श्रौतसूक्तसमता-द्योतनार्थं च उपनिषत्सु समाप्तिभाषास्थितानिव·····यं च मन्त्रपर्याय-त्वादेतस्यस्तोत्रस्य मंत्रत्व सूचयति । मंगलार्थञ्च मनु पदम् ॥१७॥

COLOPHON : इति कुरुदेशोद्भव गौडवर्यमहारंगकुलोद्भव-शिवरामसूरिप्रियतनय-विद्यारण्यविहारिकण्ठीरव-श्रीनंदशर्मज्येष्ठपुत्रेण विद्वद्वरेणलालमणिसूरिण गोविन्दनाम्नः स्वकनिष्ठभ्रातुः सुखबोधाय कृतायां सप्तशतीटीकायां पुष्पाञ्जलिसमाख्यायां देवीमाहात्म्य-पठन-श्रवण-वैश्यसुरथवरलाभोनाम-त्रयोदशाध्यायविवेचनं नाम कुसुमावचयः ॥१३॥

Post-Colophonic : श्रीरस्तुकल्याणमस्तु । सं. १९१२ मी.भा.कृ. दशनौ श्रीकृष्णाय नमः ॥

x x x

3316/4012 दुर्गासप्तशती टीका-दंशोद्धारः

OPENING : श्रीगणेशाय नमः ॥

मदोन्माद्यदुद्दामदिग्दन्तितुण्डो-
न्मदोमाद्यदिन्दीवरालीविराजन् ॥
अनायासमायासमायासपत्नः
स पायादपायादुमायास्तनूजः ॥१॥

विद्वत्कुलशिरोरत्नं नत्वा तातं समासतः ॥
दंशोद्धारं सप्तशत्यास्तनोमि विदुषां मुदे ॥२॥

CLOSING सप्तशत्यामया यस्तु दंशोद्धारे यथामति ॥
निबद्धस्तेन गिरिजा प्रीयान्नः कुलदैवतम् ॥१॥

COLOPHON : इति श्रीमत्समस्तग·····नेकानवद्यविद्योद्योतितदिक्चक्र-श्रीमद् घुल्लोपनामदुण्ढिराजभट्टसूरिसूनुराजारामेण विरचिते सप्तशती दंशोद्धारे त्रयोदशोध्यायः॥

Post-Colophonic : मितिपौषकृष्णा ८ सोमवासरे अपराह्णे समाप्तम् संवत् १९१२ शुभम् ।

x x x

3445/4436 अष्टश्लोकीव्याख्या

॥ श्रीमते रामानुजाय नमः ॥

OPENING : श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ॥
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेस्तु भूयसे ॥१॥

अखिलचिदचिद्दोषः श्रीनिवासोदयालुः,
स्वपदकमलयुग्मप्रापकसंश्रितानाम् ॥

निगमशिखरिगम्यो नित्यमव्याजबन्धु-
र्विलसतु मम चित्ते व्यङ्कटेशो मुकुन्दः ॥२॥

प्रणम्य देशिकान्सर्वानिष्टश्लोक्या यथाश्रुतम् ॥
अर्थो वैष्णववंशेन बालबोधाय वर्ण्यते ॥३॥

CLOSING : इत्थं हि बालबोधार्थमष्टश्लोक्या यथोचितम् ॥
वर्णितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसम् ॥४॥

COLOPHON : इति श्रीअष्टश्लोकीव्याख्यानं समाप्तिमगात् ॥

x x x

3462/4503 क्षमाषोडशी

OPENING : श्रीगणेशाय नमः ।

श्री रङ्गेश यया करोति जगतां, सृष्टि-प्रतिष्ठाश्रमा-
नत्रामुत्र च भोगमक्षयसुखं मोक्षं च तत्तत्तृषाम् ।
त्वत्सर्वान्तर्यमणोह्य कल्पितजगत् क्षेमातिहृद्या स्वतः,
क्षान्तिस्ते करुणा सखी विजयतां क्षेमाय सर्वात्मनाम् ॥१॥

CLOSING : श्री रङ्गेश्वर पुण्यपापफलयो, स्वाधीनतां कुर्वतः,
सर्वेषां सुखदुःखयो स्वयमहं, भग्नाशयो मामपि ।
स्मर्तुं न प्रभवामि किं पुनरहो त्वामन्तरन्तः स्थितं,
तत्त्वैतत् क्षमया विरम्य कुरु मय्यङ्घ्रानयोर्यां दशाम् ॥१५॥

अलं चेदनपेक्षणीयमरणावारोप्यतां मत्कृतं,
किञ्चिद्भूरिभवेदिदं यदि गुरुन्संप्रेक्ष्य मे त्यज्यताम् ।
यद्वानन्तमनन्तवैभवगुणो रङ्गक्षमावल्लभं,
त्वत्क्षान्त्याः खलु लक्ष्यतामनुगुणामानीयतां तत्वया ॥१६॥

COLOPHON : इति श्रीक्षमापीडशी संपूर्णम् ।।

Post-Colophonic : मुरलीधरेण ।

x x x

3508/4121 चण्डीकुचपंचाशती

OPENING : ।। श्रीगणेशाय नमः ।। श्रीचण्डीचरणौ वन्दे ।।

श्रियं नौमि देवीं परां पारिजातां,
पदाम्भोजरेणुप्रसेवापराणाम् ।।
यदापाक्षरस्याभिधेयेन शूली,
प्रलीढोऽपि मृत्युप्रजेता गरेण ।।१।।

आशादासीनिरुर्व्वं करविधृतचतुष्कोण भागामखडैः
खण्डैरास्यापटानां विधुरविघटितः शुष्कतावाप्तये या ।।
स्वात्मनाथः पतन्ती सजवमसलल्दाकर्षणक्लान्ति पंक्ति-
श्वासोच्छ्वासौघपूर्णा हिमगिरि दुहितुः पातु वो पूर्वकंथा ।।२।।

CLOSING : वाक्कायचित्त करणप्रकृतिस्वभाव-
बुद्ध्यात्मभिः सदसतोरपि संगमेन ।।
यद्यत्कृतं यदपिभाव्यमशेषमात-
र्यद्यत्करोम्यखिलमस्तु तवार्पणं तत् ।।१।।

COLOPHON : इति श्रीसामगोपनामक-वेपीमाधवाचार्यसूनू-रसालङ्कारधुरीश-लक्ष्मणाचार्यकृता चण्डीकुचपञ्चाशती समाप्त ।।

x x x

3627/4171 वैद्यनाथपञ्चक

OPENING : श्रीगणेशाय नमः ।

श्रीतारकब्रह्मानन्द सरस्वतीश्रीचरणकमलेभ्यो नमः ।
विश्वेशं भवनं भवाब्धितरणिं मुग्यं परं योगिनां,
भूतानां जनिमादधानमभयं श्रीवैद्यनाथाह्वयम् ।
वन्दे विश्वलयं प्रसन्नहृदयं श्रीपार्वतीशं विभुं,
विद्येशं विविधैः प्रवादवचनैर्वेद्यं सुखं धीमताम् ।।१।।

CLOSING :

आद्या विद्या प्रभवजनितक्लेशराशिप्रमत्ता,
दीना हीना निगमशरणास्त्वां प्रपन्ना परेशम् ।
क्लेशास्तेषां यदि न विलय प्राप्नुवन्ति प्रमाणं,
किं दौर्भाग्यं भवति च तदाभाति नेहप्रमाणम् ॥७॥

वैद्यनाथः स्वयं शम्भुः कृतेनानेन तुष्यताम् ।
पठितेनान्यसौ प्राप्तः क्लिश्नातु क्लेशराशिताम् ॥८॥

COLOPHON : इति तारकब्रह्मानन्दसरस्वती विरचिते (वैजनाथ) पञ्चकं समाप्तम् ॥

x x x

3806/4266 (3) नामामृतस्तोत्र

OPENING :

यदास्यजलजालोकाज्जनानां प्रेमपूरितम् ।
भवत्यहर्निशं चित्तं तन्नामानि भजे सदा ॥१॥

छन्दोस्यानुष्टुभमूषी रघुनाथसुतात्मजः ।
विनियोगोस्य भक्त्यर्थं देवो विट्ठलसूनुजः ॥२॥

रघुनाथात्मजः श्रीमद्द्वारकानाथनामकः ।
स्वभक्तहृदयाम्भोजमार्त्तण्डोऽतिप्रतापवान् ॥३॥

CLOSING :

द्वारिकानाथकस्येदं नाम्नामष्टोत्तरं शतम् ।
यः पतेच्छ्रद्धया मर्त्यं स गोविन्दपदं व्रजेत् ॥१॥

श्री विट्ठलपदाम्भोज मकरन्दार्थिना मुदा ।
नामामृतमिदंस्तोत्रं रचितं सर्वसौख्यदम् ॥२॥

पठेद्यैश्रद्धया नित्यं यो नामामृतनामकम् ।
मानवोनन्याभाग्राद्यायतौ स्नेहं समाप्नुयात् ॥३॥

आनन्दलिप्सुभिः स्तोत्रं पाठ्यमेतदहर्निशम्।
किमन्यत्साधनायासैस्तेषामिति मतिर्मम ॥४॥

COLOPHON : इति श्रीगोपीजनवल्लभचरणैकतानश्रीगोकुलचन्द्रविरचितं नामामृताभिधं स्तोत्रं सम्पूर्णम् ॥ ॥

x x x

3855/4103 महाविद्यामहिम्न स्तोत्रम्

OPENING : श्रीगुरुभ्यो नमः

कालीतारा छिन्नमस्ता षोडशी भुवनेश्वरी ।
भैरवी श्रीमतङ्गी च बगला धूमवत्यपि ॥१॥

चिदानन्दे विन्दौ चिदजलमपूर्वादरचरीं,
हरीशानब्रह्मेश्वरघटितमंचेकृतपदाम् ।
प्रपञ्चं सिञ्चानाममृतरसलावण्यलहरी,
गभीराभिर्दिग्भिर्जननि तव वन्दे महिकलाम् ॥२॥

CLOSING : इति श्रीमद्गंगेश्वरतनुजवर्येण हरिणा,
प्रसादो यातारव्यो न मधपुरी वासि विदुषा ।
महाविद्यायन्त्रोद्धृति सकलरूपोद्धृतियुतं,
कृतं स्तोत्रं पुण्यं गगनवसुशैलेन्दुसमये ॥२॥

COLOPHON : इति श्रीमन्मिश्रगंगेशस्यापरतनुज हरिप्रसादमिश्रविरचितं महाविद्यामहिम्नं समाप्तम् ।

x x x

3883/4120 लावण्यलहरी

श्रीगणेशाय नमः ॥ श्रीभवानीशङ्कराभ्यां नमः ॥ श्रीसाम्बसदाशिवाय नमः ॥

OPENING : भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः,
प्रजानामीशानस्त्रिपुरमथनः पंचभिरपि ।

कुमारःषड्भिर्वा दशशतमुखैरप्यहिपति-
स्तदन्येषां केषां कथय कथमस्मिन्नवसरः ॥१॥

CLOSING :

श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनाम्नायवि-
न्मीमांसायुगतर्कतत्त्वचतुरः साहित्यरत्नाकरः ।
गौरीसंस्तुतिमाततान सुकृती गोदातटप्रोल्लस-
त्पुण्यस्तम्भनिवासिकेशवसुतानन्तात्मजः केशवः ॥१॥

संसारसिन्धुलहरी दूरीकरणचातुरी ।
गौरीलावण्यलहरीमुररीकुरुतामिमाम् ॥२॥

COLOPHON :

इति माध्यन्दिनीयलौगाक्षिगोत्रसम्भूतसकलपडितमण्डलाकारचूडामणि श्रीमद्भट्टकेशवसुतानन्तभट्टसुतकेशवरचितालावण्यलहरीसम्पूर्णा ॥शुभं भूयात् ॥ साम्बसदाशिवर्पणमस्तु ॥

Post-Colophonic :

संवत् १७८३ ज्येष्ठवदि त्रयोदशी सौम्यवासरे लिखितमिदं पुस्तकं शास्त्रीकृष्णभट्टस्य अवलोकनार्थं तत्सत् शंभुनाथेन ॥

x x x

3985/4240 सुन्दरबाहुस्तोत्रसटीक

॥ श्रीमते रामानुजाय नमः ॥

OPENING : (Ct.)

यो विष्णुरेव परतत्वमिति प्रतिज्ञां,
प्रत्यर्थिसंसदि समर्थयते स्म सत्याम् ।
वेदान्तवाक्यगतिभिर्विविधैश्च तर्कैः,
श्रीवत्सचिह्नगुरुमेनमुपाश्रयामि ॥१॥

अथ श्रीमद्भागवतभाष्यकारसकाशाल्लब्धपरावरतत्त्वयाथात्म्यावबोधः श्रीवत्साङ्कमिश्रः कावेरीमध्यगता श्रीरंगक्षेत्राद्दक्षिणस्यां दिशि वनगिरिवृषगिरिसिंहगिरिप्रभृतीनामपि प्रसिद्धे महापर्वते कृतावतारं सुन्दरबाहुं सुन्दरालंकारादिनामभिर्व्यवह्रियमाणदिव्यप्रबन्धवैभवं महाविष्णुं स्वजीवनार्थं सकलप्राणिहितार्थं च स्तोतुकामः प्रथमं स्तोत्रारम्भं प्रतिजानीते—

OPENING : श्रीमन्तौ हरिचरणौ समाश्रितोहं, श्रीरामानुजमुनीन्द्रलब्धबोधः ।
निर्भीकस्तत इह सुन्दरोरुबाहुं, स्तोष्ये तच्चरणविलोकनाभिलाषी ॥१॥

CLOSING : इदं भूयो भूयः पुनरपि च भूमः पुनरपि,
स्फुटं विज्ञप्स्यामीत्यगतिरबुधोऽनन्यशरणः ।
कृतापोदुष्टात्मा कलुषमतिरस्मीत्यत वद,
दयायास्ते पात्रं वनगिरिपते सुन्दरभुजः ॥१३३॥

CLOSING : (Ct.) पुनः पुनः विज्ञप्स्यामि अबुधोनन्यशरणः कृतपापो दुष्टमनाः कलुषबुद्धिरस्मीति च हेतोः ते दयायाः पात्रमिति सर्वं समंजसम् ॥१३८॥

COLOPHON : इति श्रीमद्रामानुजाचार्यशिष्य श्रीवत्साङ्कमिश्रविरचितं श्रीसुन्दरबाहुस्तवं सम्पूर्णम् । शुभम् शुभम् शुभम् ॥

x x x

4073/4360 तन्त्रराज-मनोरमा टीका सह

OPENING : श्रीगणेशाय नमः । श्रीमहात्रिपुरसुन्दर्यै नमः ।

आद्य श्लोकेन प्रबन्धवाक्यार्थगर्भविनायकस्तुतिः क्रियते । तत्र अनाद्यन्तःकालस्याद्यन्तरहितत्वात् । अपराधीनः इतरप्रेरणाविधुरः स्वाधीनभुवनत्रयः स्वायत्तज्ञातृज्ञानने त्रया भुवनत्रयः जयति; विश्वोत्कृष्टो भवतीत्यर्थः ।

Closing & Colophon : 'इति श्रीषोडशनित्यातन्त्रेषु श्रीकादिमताख्यस्य परिपूर्णस्य तन्त्रस्य प्रपञ्चसारसिंहराजप्रकाशाभिधानेन सुभगानन्दनाथेन विरचितायां मनोरमाख्यायां व्याख्यायां देवतादेशिकशिष्यप्रपञ्चादीनां परमार्थस्वरूपप्रकाशनपरं षट्त्रिंशं पटलं परिपूर्णम् ।

काश्मीरराजस्य गुरुः श्रीकण्ठेशो द्विजेश्वरः ।
दक्षिणापथपुण्यौघ परिणाह्ययोदधिः ॥१॥

कदाचिदागतो द्रष्टुं रामसेतुं स्वलीलया ।
तेनैवानुगृहीतोऽभून्मध्ये मार्गं तु सिंहराट् ॥२॥

तन्त्राण्यधीतवांस्तस्मान्नित्यानां तेषु निर्मिताम् ।
व्याख्यामनोरमाभिख्यां तेन कादिमतस्य तु ॥३॥

सुभगानन्दनाथेन द्वाविंशपटलावधि ।
तदाज्ञयावशिष्टानां पटलानां विनिर्ममे ॥४॥

चतुर्दशानां तच्छिष्यः प्रकाशानन्ददेशिकः ।
तां सुन्दरवरक्ष्मास्तैभृद्व्याख्यां प्राक्सम्प्रदायतः ॥५॥

Post-Colophonic : समाप्तां चेयं तन्त्रराजटीका मनोरमाख्या । । श्रीगुरुभ्यो नमः ।

आकाशवसुतर्केन्दु मितेब्दे कार्तिके सिते ।
तन्त्रराजस्य टीकेयं पूर्णायां पूर्णतामगात् ॥

सम्वत् १९११ (प्रतिलिपि-समय)

x x x

4151/4241 पञ्चरत्नमाला

OPENING : शर्वाणीतनयं देवं सर्वाभीष्टप्रदायकम् ।
वंदेमंदेतरप्रज्ञाकारणं वारणाननम् ॥१॥

कायाकल्पलतिकेव कवीनां,
या मतिं वितरतीह नवीनाम् ।
राजहंसविहितां सतां सतीं,
तां भजामि वरदां सरस्वतीम् ॥२॥

नागीणि नाम्नि कुलदेवताया,
राज्ञां विरंच्याद्यखिलस्य मातरम् ।

यस्याश्चरित्रं परमं विचित्रं,
वंदे धिया तां मनसा सुवाण्या ॥३॥

मोचनं सर्वपापानां शशिसूर्यविलोचनम् ।
करुणावरुणावासं लक्ष्मीनारायणं नमः॥४॥

विस्फूर्जच्चन्द्रहासप्रतिहतरिपुणा प्राज्यसाम्राज्यभाजा-
ख्यातं जोधापुरं तद्गुरुमरुविषये येन धात्रेव सृष्टम् ।
वीराणामग्रगण्यः प्रबलभुजबलाक्रान्तभूमण्डलः स-
श्रीमान्सूर्यान्वयेभून्नयमुकुटमणी रावयोधाभिधानः ॥५॥

तत्सूनुः प्रथितोऽभवत्पृथुसमो बीकाख्यया विक्रमी,
राजाजानुभुजोखिलक्षितिभुजां मान्यो वदान्योत्तमः ।
पित्र्यं मानभरादुपेक्ष्य नगरं यः स्वीयनाम्नाकरो-
द्बीकानेरमिति प्रतीतमपरं वासं महाजाङ्गले ॥६॥

तस्माच्छ्रीलोनकर्णः समजनि विजयीशस्त्रशास्त्रप्रवीणो,
ज्ञाता दाता दयालुर्दिशि दिशि कविभिर्गीयमानोरुकीर्तिः ।
छत्राधीशैरसह्यान् दहत इव तनुं मंत्रवन्नामवर्णा-
.....नाकरणेप्रतिभटभुजगैस्तंभ एवावृतोभूत् ॥७॥

जयत्सिहस्तस्मादभवदवनीपालतिलको,
न कोपि स्थातुं यत्पुरत इह शक्तः किल रणे ।
यदीये तेजोग्नौ ज्वलति परितो वैरिसुदृशां,
व्यवर्द्धन्ताश्चर्यं नयनकमलेभ्यो जलझराः ॥८॥

रणोद्भटद्वेषिनिस्वातशल्यः,
कल्याणमल्लः क्षितिपस्ततोऽभूत् ।
कल्याणवान्येन समस्तधन्वा-
यो जागरूकोऽनिशमात्तधन्वा ॥९॥

ततो रायसिंहोभवद्भूमिपालः,
प्रतिस्पर्द्धिकालः प्रतापी करालः ।

मतौ यो विश....किलास्मुच्चभालः,
सदंतमरालः स्फुरत्कीर्त्तिजालः ॥१०॥

आसीत्तस्माद्विलासी प्रतिबलदलनः साहसीशूरसिंहः,
शूरः क्रूरस्वभावः किल सकलकलाकौशलं संदधानः ।
पुण्यागण्यप्रभावात्सुरसरिदिव यत्कीर्त्तिरच्छस्वरूपा-
कूपारं संप्रयाता ह्यपरिमितमुखैर्व्याभुवानाधरित्रीम् ॥११॥

तत एष महानन्नूपसिंहो मरुदेशाधिपतिः स्फुरत्प्रतापः ।
अभवन्मतिमान् प्रभुर्मनस्वी यशसाव्याप्तजगत्त्रयोतिशूरः ॥१४॥

पात्रेभ्यो यःसमस्तान्यपि कनकतुलादीनिदानानि नित्यं,
प्रादायोत्तिप्रतापी जगदिदममुञ्च (?) किं च दारिदावात् (?) ।
तेन क्षोणीश चूडामणिखचितपदानूपसिंहेन राज्ञा,
ग्रन्थोयं रत्नमालाभिध इति सुधिया तन्यते यत्नपूर्वः ॥१६॥

मीमांसाद्वयपारगः श्रुतिषु यः साङ्गासु च ज्ञानवान्,
न्यायोद्भावनतीक्ष्णधीः किलतरन्यो धर्मशास्त्राम्बुधौ ।
होसिगान्वयभूषणं द्विजवरं तं रामभट्टाभिधं,
सत्कृत्यप्रणयायुतं च सुधियं ग्रंथेऽत्र सोऽयं नयः ॥१७॥

तदाज्ञयासौ बुधरामभट्टो (भद्रो) विचार्य तत्वेन महानिबन्धान् ।
नवीनयुक्तिग्रथनप्रकारैरेतं प्रबंधं विशदी करोति ॥१८॥

षट्कृताश्च मया पूर्वं ग्रन्थाराजनियोगतः ।
चमत्कार करास्ते च यथा बुद्धयतिसोज्ज्वला ॥१९॥

Closing & Colophon

इति पञ्चरत्नमालायां पाठान्तरेण गृहगोधा विचारः । अथ प्रसङ्गादङ्गस्फुरणविचारः—शिरसास्पंदने राज्यस्य दानलाभो.....
.....कंठस्य भूषणं कण्ठे ग्रीवायां मृत्युतो भयं । पृष्ठोपरो.....

x x x

4156/4373 प्रपञ्चसारविवरणम् ।।

OPENING : श्रीगणेशाय नमः ।। श्रीमङ्गलमूर्त्तये नमः ।।

अवर्णविग्रहं देवं वर्णविग्रहवर्ज्जितम् ।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ।।१।।

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शंकराचार्यः परोक्षीभूतदेवतात्मतत्वः परमां विभूतिकाष्ठां प्राप्तः स्वयमेकाकी सम्पदा लज्जमानो दुःखिजनकारुण्याक्रान्तमानसश्च सन् तदनुग्रहाय समस्तागमसारसंग्रह प्रपञ्चागमसारसंग्रहरूपं ग्रन्थं चिकीर्षुरभिमतसकलप्रयोजनसिद्धये प्रथमतः परदेवतातत्त्वानुस्मरणलक्षणमाशीर्लक्षणं च मंगलमाचरन् ग्रन्थारम्भौपयिकं विषयादिकमप्यर्थात् सूचयति ।

CLOSING : ॐ नमः शिवाय स्वाहा, ॐ नं नमः शिवाय स्वाहेत्यादिक्रमेणाक्षरैर्हुत्वा ॐ नमः शिवायेत्यपि पञ्चवारं जुहुयादित्यर्थः । हुत्वा हुतीनां संख्यामाह पक्वाहुतीनामिति । वर्णसंख्यमेकपञ्चाशत्संख्यकमित्यर्थः । अवदानद्वितीयं विभागद्वयादपि आमलप्रमाणं हविरादाय मिश्रीकृत्यावदानद्वयं स्त्रीपुंसयोः ।।

इति प्रपञ्चसारविवरणे षट्त्रिंशः पटलः ।।३६।। सम्पूर्णम्.....

x x x

4157/4374 प्रपञ्चसारसंग्रहः

OPENING : नत्वा श्रीशङ्कराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसंग्रहमुत्तमम् ।।१।।

CLOSING : "ह्रीं सिद्धयै नमः" इति मन्त्रस्वरूपम् । इत्यक्षमालाजपविधिः ।।

COLOPHON : इति सदमरेन्द्रसरस्वतीशिष्यश्रीविश्वेश्वरसरस्वत्याः प्रियशिष्येण गीर्वाणेन्द्रसरस्वत्या संगृहीतः प्रपञ्चसारसंग्रहः समाप्तः ।।

शङ्करश्चामरेन्द्रश्च विश्वेश्वर इति त्रयः ॥
पुनन्तु मामकीं बुद्धिमाचार्याः कृपया मुदा ॥१॥

अमरेन्द्रयतिः शिष्यो गीर्वाणेन्द्रस्य योगिनः ॥
तस्य विश्वेश्वरः शिष्यो गीर्वाणेन्द्रोहमस्य नु ॥२॥

शिष्यः प्रपञ्चसारस्य व्यदधां सारसंग्रहम् ॥
एतदृष्ट्वाखिलाः सन्तः सन्तु गीर्वाणयोगिनः ॥३॥

भुवं परीतः पतिते तमोधे निर्वाणमाप गुरुभूतगुणानुरागः ॥
सर्वापराधकृतमप्यवनीतलेऽस्मिन् स्वर्वाहिनीसदृशमाकलये कटाक्षैः ॥४॥

स्वर्वाहिनी हरशिरो मुकुटे तटेस्मिन् मन्ये वसत्यखिलपातकनाशकृत्यः ।
गीर्वाणयोगिपदपल्लवमाश्रिता ये लोकान्पुनाति खलु दर्शन संगकृत्यै ॥५॥

x x x

4158/4023 बालात्रिपुरार्चनचन्द्रिका

OPENING :

॥ श्रीनर्मदायै नमः ॥

श्रीबालात्रिपुरापूजनपद्धतिः लिख्यते ।

प्रातरुत्थाय आवश्यकीं क्रियां कृत्वा रात्रिवासः परित्यज्यान्यद्वासः परिधायोपविश्य निजगुरुं ध्यात्वा सवामांकं शिरसि ध्यात्वा मानसैरुपचारैरभ्यर्च्य ततः स्नानं कृत्वा ततो वैदिकीं सन्ध्यामभिवाद्य ततः तान्त्रिकां संध्यामभिवाद्य ततोयागमंडपद्वार्यागत्य ॐ ह्रीं श्रीं द्वारश्रियै नमः । ऊर्ध्वद्वारे मध्ये गणेशाय नमः । वामांगे सरस्वत्यै नमः ।.....

CLOSING : गुरवे दक्षिणां दत्त्वा समापयेत् । संहारमुद्रां प्रदर्श्य पश्चाद्यथासुखं विहरेदिति श्रीनर्मदायै नमः श्रीकृष्णमूर्त्तिः शरणं शिवशिवमिति किमधिकम् ।

मंगलं लेखकानां च पाठकानां च मङ्गलम् ।
श्रीमुकुन्दाभिधाये च गुरुचरणाः शरणं मम ॥

Post-Colophonic : इति श्रीबालात्रिपुरार्चनचन्द्रिका समाप्ता ।

x x

4166/4411 मंत्राराधन-दीपिका

OPENING : श्रीगणेशाय नमः ।

यन्नामस्मरणेन पातकमलप्रक्षालनं जायते,
यस्मिन्कर्णपथं गते तु सुमहत्पुण्योदयं प्राप्यते ।
यत्र न्यस्तमतिः प्रयाति पुरुषो मोक्षं महादुर्ल्लभं,
वन्दे तं परमेश्वरं त्रिजगतामाद्यन्तमध्येश्वरम् ॥१॥

पाणौ पायसपिण्डमाहितरसं बिभ्रन्मुदा दक्षिणे,
सव्ये शारदचन्द्रमण्डलनिभं हैयंगचीनं दधत् ।
कण्ठे कल्पितपुण्डरीकनखमयुद्दामदीप्ति वहन्,
देवो दिव्यदिगंबरो दिशतु वः सौख्यं यशोदाशिशुः ॥२॥

मखाहान्वये जातो राजन्यकुलदीपकः ।
बभूव नथमल्लो वै नृपो भूमिपुरन्दरः ॥३॥

स्वपक्षपरिपोषकः सकलशत्रुदावानलः,
समस्तनृपसेवितो विविधदानविद्यारतः ।
प्रभूतधनवाहनो धरणिदेवदुःखापहो,
बभूव तदनन्तरं जगति कालिदासो नृपः ॥४॥

तस्माद्राजारजानीः सकलनृपयुतः शत्रुपक्षस्य हन्ता,
वक्ता भोगी वदान्यः सुरपतिसदृशः सर्वलोकैकजेता ।
संग्रामे स्कन्दतुल्यो हरिचरणरतः पुत्रपौत्रप्रपौत्रैः,
संयुक्तो बन्धुवर्गैस्तुरगगजयुतो राज्यमुर्व्यां करोति ।।५।।

....

CLOSING : तस्याज्ञामुपलभ्य वीक्ष्य च महामोहान्धकारेजग-
न्मग्नं तस्यकृते दयांचितमनाः सारं समुद्धृत्य वै ।
मन्त्राणान्नितरां द्विजातिहृदयानन्दैकसंदायिनीं,
मन्त्राराधनदीपिकां वितनुते कंसारिसूनुः कृती ।।१०।।

लक्ष्मीकान्तं नमस्कृत्य भवानीं तदनंतरम् ।
यशोधरेण क्रियते मन्त्राराधनदीपिका ।।११।।

शाके नागगजाब्धि (१४८८) चन्द्रप्रमिते पक्षे च कृष्णेतरे,
मासे चाश्विन संज्ञके शशिदिने विष्णौ दशम्यां तिथौ ।
आदेशाद्वरजानिदेवनृपतेरानन्दसंदायिनी,
मन्त्राराधनदीपिकां रचितवान्कंसारिमिश्रात्मजः ।।

COLOPHON : इति श्रीराजन्यकुलकमलप्रकाशनैकभास्करश्रीमन्महाराजकालिदा-सात्मजमहाराजाधिराज-वरजानीदेवकारितायां कंसारिमिश्रात्मज मिश्रयशोधर विरचितायां मन्त्राराधनदीपिकायां षोड़शः प्रकाशः समाप्तः ।।१६।।

समाप्तोऽयं ग्रन्थः ।

Post-Colophonic : संवत् १९१३ । मिती ज्येष्ठा कृष्णा ।५। भौमवासरे । लिखितं श्रीवृन्दावनमध्ये ब्रह्मकुण्डसमीपे हस्ताक्षरशुकदेवब्राह्मणस्य ।

x x x

4169/4414 मुद्राप्रकाशः

श्रीगणेशाय नमः ।

OPENING :

हृहिरण्यहरिहयाद्यैर्देवैर्वन्द्यैर्नमस्यं,
ददर्दभिमतमर्थं भक्तिभाजां जनानाम् ।
परिहृतसकलार्थैर्योगिभिर्ध्यायमानं,
हरचरणसरोजं क्षेमकामा भजध्वम् ॥१॥

नत्वा गुरुपदं रामकिशोरेणेष्टसिद्धिदम् ।
साधकानां मुदे मुद्राप्रकाशोऽयं विरच्यते ॥२॥

देवानां, मुदं, हर्षं ददातीति मुद्रा ॥

CLOSING :

मुष्टिरुर्ध्वो कृताङ्गुष्ठा दक्षिणानाममुद्रिका ।
तर्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ॥

सम्पूर्णोऽयं परिच्छेदः ॥६॥

यो जज्ञे सुकृती धरासुरवराद्धीरोत्तमाद्राघव–
स्तस्माद्रामकिशोरईश्वरसमाद्यो रुद्रनारायणात् ।
जातो युग्मशरस्थिराधरधरामाने शकाब्दे गते,
तेनासौ त्रिपुरारिराजनगरे मुद्राप्रकाशःकृतः ॥

Colophon :

इति श्रीरामकिशोरशर्मविरचितःमुद्राप्रकाशः समाप्तः ।

Post-colophonic:

इति रामकिशोररचिते ग्रन्थे मुद्राप्रकाशसंज्ञके ।

मथुरादत्तशर्मणा प्रतिकृतं यथा ।

x x x

4176/4431 विद्यारत्नसूत्रदीपिका भाष्यसह

OPENING :

श्रीगणेशाय नमः ।

बालार्कमण्डलाभामिति ध्यायेत् ।
श्रीविद्यारत्नसूत्राणां वाक्यार्थप्रतिपादने ।
भगवत्याः प्रसादेन क्रियते दीपिका मया ॥१॥

सा भगवती जगसृष्ट्वेदं तस्मिन्देवादीनुत्पाद्य तेषामनुग्रहाय स्वभक्तानां पुरुषार्थाय भद्रासुरहरणायापि च या ब्रह्मणः सा प्राणचिद्देवीरूपेणाभिव्यक्तासतीधर्मसंस्थापनार्थाय ततश्चानेकरूपेण पश्चान्मरीच्यादयस्तासां ज्ञानैश्वर्यबलवीर्यतेजोभिः सदासंपन्नत्वं यावत् तस्य तारतम्ये सं धौविश्वकर्मणा दुग्धोदधिमध्यस्थितमणिद्वीपस्थं चतुर्विंशति च प्रविष्टचिन्तामणिमंदिरं कल्पयिता ततस्ते चित्प्रकाशैश्च तां देवीं प्रतिष्ठाप्य पश्चादनेक शक्तयः पुरोवर्तिभ्यः स्थिताःस्ताः आम्नायत्व संज्ञयातन्मंदिरस्थऋचादिमयचतुर्द्वारि वक्ष्यमाणे स्थापिताश्च नियमितास्ततो देवा वक्ष्यमाणमन्त्रपारम्पर्यदेशिकरूपेण तत्वत्रय सम्बन्धत्वावच्छिन्नावच्छेदकरूपेण पारम्पर्यमिति कामराजपारम्पर्यमिति लोपामुद्रापारम्पर्यमिति च । तत्तत्संज्ञाभिन्नतन्नामभिः अभिव्यक्ताः संतः तदीयमंत्रयंत्रतंत्राणिभगवत्याः प्रसादेन कल्पयित्वा प्रकल्पय ततो दिव्यौघसिद्धौघ मानवौघरूपेण मुनिवेदनागसंख्याक्रमेणदेवताभिः पूज्यतया तत्प्रसादमनुसृत्य स्थिताः तदीयशास्त्रप्रकटनार्थं तदुपासकानां ज्ञात्वानुष्ठानतयापुरुषार्थाय भगवता गौडपादेन तद्रहस्यं सर्वमंत्ररत्नसूत्रैः सूत्रितमिति । शाक्तमंत्रागमजिज्ञासुः तेन सूत्रार्था वर्ण्यते प्रसादेन तस्याः अल्पाक्षरमसंदिग्धं सारतद्विश्वतोमुखमिति सूत्रलक्षणं वेदान्तसम्बन्धभेदे यावदस्य शास्त्रस्य ।

COLOPHON :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्शंकरभगवत्पादाचार्यशिष्यश्रीमद्विद्यारण्यमुनिकृतौ श्रीविद्यारत्नसूत्रदीपिकाभाष्यं समाप्तिमगमत् ॥

Post-Colophonic :

रा०(ज) पुस्तकशाला सरकार अलवर सं० १९१२ ।

x x x

4189/4410 गणेशमन्त्रसंग्रह-दीपिका

OPENING :

श्रीवक्रतुण्डाय नमः ।
अथ मंत्रसंग्रहदीपिका लिख्यते ॥

भारद्वाजकुलोत्पन्नं दिवाकरतनूद्भवम् ।
रामरामं गुरून्नत्वा देवं गणपतिं तथा ॥

आटलेकरोपनामकृष्णशर्मसुतः सुधीः ।
महादेवः प्रकुरुते गणेशार्चनदीपिकाम् ॥

CLOSING :

एतानि दिव्य नामानि गणेशस्य महात्मनः ।
पठनीयानि यत्नेन सर्वदैहि ..... ।

दूर्वायुग्मानि संगृह्य पूजयान्येपि यत्नतः ।
पूजयित्वा गणाध्यक्षं नाम्नामेकैकसंख्यया ॥

आज्येन वा तिलेनापि सार्द्धलक्षत्रयाहुतिः ।
हुत्वैतन्नामभिः सक्तून् सर्वविद्याधिपो भवेत् ॥

नाम्नामेकैकमेतेषां सर्वसिद्धिप्रदायकम् ।
तस्मात्सर्वप्रयत्नेन पठनीयं सदा बुधैः ॥

COLOPHON :

इति श्रीशिवरहस्ये महादेवोक्तं गणपति-अष्टोत्तरशतनामस्तोत्रं-आटलेकरोपनामकमहादेवभट्टविरचितायां गणपतिमन्त्रसंग्रहदीपिकायांत्रयो विंशतिप्रकाशः ।

Post-Colophonic :

समाप्तोऽयं ग्रन्थ ।

श्रीगणेशो जयति । मिती श्रावणकृष्णा अमावास्या रविवासरे लिपिकृतं लालारामशर्मणा संवत् १९१२ का ।

x x x

4205/4384 मन्त्रकोशः

OPENING: श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ श्रीसरस्वत्यै नमः ॥

प्रणम्य सूर्यविघ्नेशं शिवं दुर्गां हरेः कलाः ॥
प्रकटीकृत्य सन्मन्त्रान् वक्ष्ये साङ्गान् सुगोपितान् ॥१॥

आगमेषु मया ज्ञाताः प्रयोगा गुर्व्वनुग्रहात् ॥
पूजामंत्रं तथाप्यत्र लिख्यते ग्रन्थगौरवात् ॥२॥

CLOSING: भो सज्जना मम नतिः सततं भवत्सु,
कार्ये न जातु खलु सर्वजनीनमेतत् ।
व्यक्तीकृतं यदिहमुक्ततमास्तु मन्त्राः,
सौकर्यतोऽत्रभवतां कतिचित्तदेव ॥१॥

COLOPHON : ॥ इति श्रीमदाशादित्यत्रिपाठिसंगृहीते मंत्रकोशे विंशतितमः परिच्छेदः ॥

Post-Colophonic : संवत् १९०५ शाके १७७० फाल्गुणकृष्णा ६ भृगुवासरे ॥ लिखितं बलदेवदावदपुरीयो ॥ लिखायतं महाराजाजी श्री १०८ विनयसिंहजी धर्ममूर्ति-धर्मात्मा हरिभक्तिदिने गौब्राह्मणप्रतिपालकलिखतं बलदेवब्राह्मणदावदपुरीयो पुस्तग लिखी अलवर नगरमध्ये ॥ शुभंभवतु ॥

x x x

4205/4385 मन्त्रकोशः

OPENING : ॥ श्रीगणेशाय नमः ॥

अथ वक्ष्ये मंत्रकोशं यदुक्तं भूतडामरे ॥
क्रमाद्बीजविधानञ्च श्रुत्यर्थज्ञानसम्भवम् ॥१॥

शिव उवाच

विद्युज्जिह्वा कालवज्री गर्ज्जिनी धूम्रभैरवी ॥
कालकूटा विदारी च महारौद्री भयङ्करी ॥२॥

CLOSING : मूलार्णं मासमाख्यातं हृदयं स्वरशक्तयः ।।
भवस्थित्यवसानेषु विज्ञातव्यं यथोत्तरम् ।।३।।

आदिदेवेन निर्दिष्टं जम्बूद्वीपे कलौ युगे ।।
मन्त्रकोशमिदं भूतयक्षडामरतन्त्रयोः ।।४।।

भक्तानामुपकाराय त्रिषु लोकेषु दुर्लभम् ।।

COLOPHON : ।। इति श्रीभैरवविरचितो मन्त्रकोशः समाप्तः ।।

x x x

4357/2154 किरातार्जुनीय-विनयसुन्दरीटीका

(तृतीयसर्गः)

OPENING : ।। श्रीगणेशाय नमः ।।

(Ct.)

कथं भूतं मुनिमंशुजालैर्मरीचिसमूहैः प्रांशुमिव उन्नतमिव । कथं भूतैः अंशुजालैः उत्सर्पिभिः कथं भूतैरंशुजालैः शरदि योसौ चन्द्रस्तस्यकराकिरणास्ते इव अभिरामा आह्लादकरास्ते तैः कथं भूतं मुनिं जटाः बिभ्राणं दधतं । कथं भूतं मुनिमानी नीलाकृष्णारुक्कान्तिर्यस्यस्तं ।। कथं भूतं मुनिमिवोत्प्रेक्षितडित्वतं क्षणरुचिवंतमम्बुवाहं मेघमिव ।।१।।

COLOPHON : इति श्रीविनयसुन्दरविरचितायां किरातटीकायां इन्द्रागमनं भारविकृतौ एकादशः सर्गः ।

x x x

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ मूक-दानवबधो-नाम त्रयोदश सर्गः ।

4377/2134 नैषधीयटीका "अन्वयबोधिका"

OPENING :

श्रीगणेशाय नमः ।

या काङ्क्षतामलपदा नियतं जनानां,
शक्तार्थसञ्चयसमन्वयने च योग्या ।
व्यक्तीकरोति निखिलं हृदि भावजातं,
वाग्देवतामभिमताहृदमाश्रयेताम् ॥१॥

अन्यासु भावबहुलासु सदर्थिकासु,
टीकासु चेदिहभवेद्विफलः प्रयत्नः ।
सद्भिस्तथापिमृदुबोधविबोधनार्थं,
जातोद्यमोऽहमिह सम्प्रति नावबुध्ये ॥२॥

अस्य ग्रन्थस्य महाकाव्यतया वर्णनीयप्रसिद्धनायकत्वेन सहृदयानां झटिति साभिनिवेश शुश्रूषाप्रवर्तकतया च प्रथमं सन्नायकनामकीर्तनरूपं वस्तु-निर्दिशति निपीयेति बुधाः पण्डिताः यस्यक्षितिरक्षिणः क्षिति पृथिवीं साधुरक्षि-तवान् इति तस्य न्यायेन पृथिवीपालयितुरित्यर्थः । कथागुणनुवादं निपीय सादरं श्रुत्वा सुधामपि अमृतमपि तथा कथावत् न आद्रियन्ते न बहुमन्यन्ते सुधातोऽपि तत्कथायाः अतीवाह्लादकत्वात् ।

Colophon :

इति श्रीप्रेमचन्द्रन्यायरत्नविरचितायामन्वयबोधिका समाख्यायां नैषधटीकायाम् एकादशः सर्गः समाप्तः ॥

राढेगाढप्रतिष्ठः प्रथितपृथुयशः शाकराढा निवासी ॥ विप्रः श्रीराम-नारायण इति विदितः सत्यवाक् संयतात्मा ॥ तत्सूनुः सूनृतेनाखिलजनदयितः श्रीयुतः प्रेमचन्द्रश्चक्रे चक्रिप्रसादान्नल-चरित महाकाव्य पूर्वार्द्ध टीकाम् ॥९॥

x x x

4369/2173 गोविन्दलीलामृत

OPENING :

श्रीगोविन्दं व्रजानन्दसंदोहामन्दमन्दिरम् ।
वन्दे वृन्दावनानन्दं श्रीराधासङ्गनन्दिनम् ॥१॥

योऽज्ञानमत्तं भुवनं कृपालु-
रुल्लाघयन्नप्यकरोत्प्रमत्तम् ।
स्वप्रेमसम्पत्सुधयाऽद्भुतं तं,
श्रीकृष्णचैतन्यममुं प्रपद्ये ॥२॥

श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या,
या साध्या प्रेमसेवा व्रजचरितपरैर्गाढलौल्लैकलभ्या ।
सा स्यात्प्राप्ताय यातां प्रथयितुमधुना मानसीमस्य सेवां,
भव्यां रागाध्वपान्थैर्व्रजमनुचरितं नैत्यिकं तस्य नौमि ॥३॥

कुञ्जं गोष्ठं निशान्ते प्रविशति कुरुते दोहनान्नाशनाद्यां
प्रातः सायं च लीलां विहरति सखिभिः सङ्गवे चारयन्गाः ।
मध्याह्ने चाथ नक्तं विलसति विपिने राधयाढापराह्णे,
गोष्ठं याति प्रदोषे रमयति सुहृदो यः स कृष्णोऽवतान्नः ॥४॥

संसारामयहार्यपि प्रणयजोन्मादान्ध्यमोहादिकृ-
दोषच्चर्वितमप्यनल्परसदं देहादिहृत्पुष्टिदम् ।
यत्पीतं श्रुतिवाङ्मनोभिरनिशं तृष्णाप्रदं चाद्भुतं,
तज्जीयादमृतस्पृहाहरमिदं गोविन्दलीलामृतम् ॥५॥

CLOSING :

श्रीरूपदर्शितदिशा लिखिताष्टकाल्या,
श्रीराधिकेशकृतकेलिततिर्मयेयम् ।
सेवास्य योग्यवपुषा निशमन्नचास्या,
रागाध्वसाधकजनैर्मनसा विधेया ॥९४॥

पादारविन्दभृङ्गेण श्रीरूपरघुनाथयोः ।
कृष्णदासेन गोविन्दलीलामृतमिदं चितम् ॥९५॥

मैरेतत्परिपीयते हृदि लसत्तृष्णातिरेकान्मुहु-
र्ब्रह्माद्यैरपि दुर्गमं व्रजविधोर्लीलामृतं राधया ।
वृन्दारण्यविलासिनी कुमुदिनीवृन्दस्य बन्धुव्रजे,
कारुण्यादचिरेण वाञ्छिततमं तेषां तनोतु स्वयम् ॥९६॥

श्रीचैतन्यपदारविन्दमधुपश्रीरूपसेवाफले,
दिष्टे श्रीरघुनाथदासकृतिना श्रीजीवसङ्गोद्गते ।
काव्ये श्रीरघुनाथभट्टकविराजे गोविन्दलीलामृते,
सर्गोयं रजनीविलासवलितः पूर्णस्त्रयोविंशकः ॥१॥

x x x

4386/2172 पाण्डव-चरित

OPENING : श्रीगणेशाय नमः ।

कंदर्प्पदर्पाङ्कुरमात्रयोगं,
सिन्दूरपूरारुणभिन्नगौरम् ।
कुन्दावदातस्मितमट्टहासं,
वन्दामहे तद्द्वयमद्वयं वा ॥१॥

CLOSING : अथ कनकपताका चित्रितैरप्सरोभिः,
मधुरमधुरगाथामङ्गलं कुर्वतीभिः ।
सविनयमुपनीतैं राजमानैर्विमानैः,
सुरनगरमुदारं पाण्डवैरध्यरोहि ॥५५॥

COLOPHON : इति श्रीलक्ष्मीनारायणरायकविडिण्डिमराजपण्डितश्रीलक्ष्मीदत्त-विरचिते पाण्डवचरिते महाकाव्ये पाण्डवस्वर्गारोहणो नाम द्वाविंशतितमः सर्गः समाप्तः ॥

द्विज्ञास्तेकलयः यदीय कविताकर्ण्यकर्णामृत-
प्रस्पन्दामिह साधु साध्विति बुधैर्मूर्धा मुहुर्धूयते ।

एवन्नामतथापि लक्ष्मणकवेः संभावनां भारती,
सद्यो विन्दन्तु पाण्डवीयसरितद्राक्षारसक्षालनैः ॥

प्रसरसमपि निर्मुक्तं मदीयं,
शृणुतमनाघबुधान्तः कवीन्द्राः ।
शुकशिक्षितभणितं यदेव किञ्चित्–
भवति हि तन्मधुरीधुरीणम् ।

x x x

4435/1237 शङ्करदिग्विजयसार

OPENING: श्रीगणेशाय नमः ॥

सत्यं ज्ञानमनन्तमाद्यममलं वेदान्तवेद्यं परम्,
मायातीतमभेद्यमान्तरमजं सर्वज्ञमीड्यं सुखम् ।
आराध्यं विधिशङ्करादिभिरपि रागापहं केशवं,
वन्दे भक्तजनप्रियं सुरगुरुं कृष्णं श्रिया संयुतम् ॥१॥

यन्नामामृतमेव सर्वजनतावृद्धौ परं शङ्करं,
यद्ध्यानामृतमेव साधनतया चित्ते विधेयं जनैः ।
यद् ज्ञानामृतमेव सर्वविदुषां पाण्डित्यसम्पादकं,
तद्ध्यानामृतमेव शाङ्करमहं वन्दे दयार्द्रमहः ॥२॥

यन्नामश्रवणान्मतिः प्रमुदिता ब्रह्मात्मबोधोद्यता,
यत्पादाम्बुजसङ्गमेन जडतालीनामतेर्दुःखदा ।
यद्वाक्यामृतपानतः प्रविलयं ग्रन्थिर्गतोऽध्यासका-
स्तं बोधाम्बुजबोधकं दिनकरं वंदे परं दैशिकम् ॥३॥

शैवे सूचितमादितोयतिवरैर्बद्धं पुरा ग्रन्थतो-
ऽाधं शाङ्करदिग्जयं निजधियावीक्ष्याहमेवाततम् ।
सिद्धान्तं श्रुतिसद्गिरां विलसतो निष्कृष्य संक्षेपतः,
कुर्वे स्वात्मविशुद्धये स्फुटमसुं तत्सारमेवादरात् ॥४॥

पुरैकदा देवगणाः समस्ताः,
कैलाशमीशाननिवासमेत्य ।
त्रिधा प्रणम्योचुरिदं विनम्रा,
उमापतिं चन्द्रकलावतंसम् ॥५॥

देवदेव महादेव शरणागतवत्सल ।
सर्वज्ञ करुणासिन्धो विज्ञप्तिं शृणु नो विभो ॥६॥

यद्धितं नो जगन्नाथ विदितं तत्तव प्रभो ।
शरणं त्वां प्रपन्ना स्मः शरणागतवत्सलम् ॥७॥

विष्णुर्बुद्धवपुर्धृत्वा वंचयन्सौगतान्यथा ।
वर्त्तते तद्भवान्सर्वं जानात्येव न संशयः ॥८॥

तत्प्रणीतागमालंबैबौद्धदर्शनदूषकैः ।
धराव्याप्ता हरेदानीं लुप्तवर्णाश्रमक्रमैः ॥९॥

सर्वे पाखण्डतां याता जना आम्नाय दूषकाः ।
न सन्ध्यादीनि कर्माणि केचित्कुर्वन्ति वै द्विजाः ॥१०॥

सन्यासं नैष्ठिकं धर्मं निन्दन्त्येवोऽविपश्चितः ।
ज्ञानवैराग्यनिष्ठाया वार्ता तु दुर्लभैव हि ॥११॥

नष्ट श्रौतसमाचारो जने भ्रष्टेऽखिले भुवि ।
यज्ञभागं विना शंभो कथं नः स्याद्दिवि स्थितिः ॥१२॥

श्रौतमार्गं भवानद्य लोकसंरक्षणाय हि ।
स्वर्गापवर्गदं शंभो पुनः स्थापयतु क्षितौ ॥१३॥

इत्थं विज्ञापितः शम्भुरुवाच गिरिजाप्रियः ।
श्रूयतां भो सुराः सर्वे मयेदं निश्चितं पुरा ॥१४॥

निवृत्तिमार्गो वैराग्यज्ञानध्यानपुरःसरः ।
उच्छिन्नो दृश्यते लोके ममैष प्राणवल्लभः ॥१५॥

न मे प्रिया भवानीत्थं न गणेशो न वा गुरुः ।
यादृशोऽसौ परं ब्रह्माद्वैतमार्गैः प्रियो मम ॥१६॥

तं विना नैव तिष्ठामि क्षणमेकमहं कदा ।
अतः प्रतिश्रुतं मेऽद्य तत्त्वज्ञानसमृद्धये ॥१७॥

मानुषीं तनुमाश्रित्य परमहंसधुरंधरः ।
भूत्वा मनोरथं सर्वं पूरयिष्ये स वो ह्यहम् ॥१८॥

धर्मसंस्थापनार्थाय विनाशाय च दुष्कृताम् ।
शङ्कराचार्यनामाहं संभविष्यामि मायया ॥१९॥

चतुर्भिः सहितः शिष्यैर्ब्रह्मा ब्रह्मसुतैरिव ।
वेदान्तेषु स्वयं भाष्यं करिष्याम्यद्भुतं सुराः ॥२०॥

व्यासप्रणीतसूत्रेषु भाष्यं ब्रह्मपरेष्वहम् ।
करिष्यामि स्वयं युक्त्या वेदार्थं संप्रकाशयन् ॥२१॥

CLOSING: भास्करादिभवस्तत्राद्वैतमार्गस्य घोषणम् ।
तत् उदयनादीनां विजयः शङ्करेण च ॥५८॥

जयोद्भिभवगुप्तस्य शङ्करेण कृतस्ततः ।
वृत्तान्ताः कीर्तितास्त्वेते शङ्करस्य जयप्रदाः ॥५९॥

ततस्तु षोडशे सर्गे गुप्ताख्येनाभिचारणम् ।
आचार्यस्य गुरूत्पत्तिस्ततो वैद्यैश्चिकित्सनम् ॥६०॥

अश्विन्यामपरिहार्यकथनं श्रवणं यतेः ।
पद्मपादस्य संक्रोधपूर्वकं मंत्रतः पुनः ॥६१॥

कृत्यायाश्च समुत्पात्रं तया गुप्तमृतिस्ततः ।
आचार्यस्य रुजः शांतिः शङ्कातीरव्यवस्थिति ॥६२॥

षोडपादेन संयोगस्तेन संवाद-आदरात् ।
काश्मीरगमनं तत्र वादिभ्यो विजयो यतेः ॥६३॥

सिद्धिपीठसमारोहोद्यमो भाष्यकृतस्ततः ।
शारदाभाषणं तत्र पीठारोहो यतेस्ततः ॥६४॥

गिरिप्राप्तिनिवासश्च गमनं बदरीवने ।
तन्निवासश्चरित्रान्ते ब्रह्मादीनां समागमः ॥६५॥

तत्कृतस्तवनं भिक्षोः स्वधामगमनं ततः ।
अनुक्रमणिका पश्चाद्वृत्तान्ताः कीर्तिता इमे ॥६६॥

इति भवभयहन्त्री ब्रह्मविद्याजनित्री ।
निगमरसधरित्री भ्रान्तिहन्त्री मुमुक्षौ ॥६७॥

निरवधि सुखदात्री शान्तिदा सज्जनानी ।
जयतु निगमवेद्या शंभुचार्या श्रमं ते ॥६८॥

रसगुणवसुचन्द्रे विक्रमादित्यराज्यात् ।
समफलवति वर्षे चाश्विने मासि शुद्धे ॥६९॥

श्रवणयुतदशम्यां भौमवारे विलग्ने ।
ग्रथित इति निबन्धः सिद्ध ईशप्रसादात् ॥७०॥

COLOPHON : इति श्रीशाङ्करदिग्विजयसारे श्रीमन्मुकुन्दपदारविन्दमकरंदरसाभिलाषिसदानंदाख्य विदुषा विरचिते अनुक्रमणिकावर्णनं नाम सप्तदशसर्गः ॥

Post-Colophonic: संवत् १८६२ श्रावण सुद्ध २ रविवारे समाप्ता । लिपीकृतं ब्राह्मणजगरामेण पठनार्थम् ॥

x x x

4442/5800 शिशुपालवध-टीका

OPENING :

श्रीमतेरामानुजाय नमः ।

प्रियेति अथानन्तरं मुरं दैत्यं द्विषन् मुरारिः कृष्णः आसीद्बभूव कार्यद्वयेन् आकुलः व्यग्रः कार्यद्वयाकुलः कार्यद्वयाकुलत्वमेव विशेषणेन वर्णयन्नाह-कथंभूतः मुरद्विषन् ? पार्थेन युधिष्ठिरेण आहूतः निमन्त्रितः । पुनः कथंभूतः मुरद्विषन् ? अभिचैद्यं प्रतिष्ठासुः प्रस्थातुमिच्छुश्चैद्यं शिशुपालं अभि अभि चैद्यं । कथंभूतेन पार्थेन ? यियक्षमाणेन यष्टुमिच्छतीति यियक्षति यियक्षतीति यियक्षमास्तेन यष्टुमिच्छतीत्यर्थः । आहूतः इत्यत्र ह्लेज० आह्वाने-आङ् पूर्वः ह्वः संप्रसारणं । यदि युधिष्ठिरं व्रजति तदा शिशुपालः उपेक्षितः स्यात्, यदि शिशुपालमधि तुदा युधिष्ठिरे तुष्यति इत्यतएवानुकूलत्वं; पृ आषतं पार्थः यथा कुन्तीनाम तस्येदमित्यण् ।

CLOSING :

यं प्रासूत सविष्णुदासविबुधः श्रीमूलदेव्यां सुतं,
भक्त्याराधित सद्गुरुश्चिरतरं शास्त्राणि योऽधीतवान् ।
तेनच्छात्रहितेऽधुना विरचिते माघार्थसंदीपने,
तत्रैव क्रमशो जगाम नितरां सम्पूर्णतां द्वादशः ॥७७॥

COLOPHON :

इति श्रीमन्मोहोदारांतष्करणविष्णुभक्तसर्वज्ञचूडामणि श्रीमिश्रविष्णुदासात्मज सर्वविद्याविशारदश्रीमिश्रहरिदासविरचितायां माघकाव्यार्थटीकायां द्वादशः सर्गः सम्पूर्णः ॥१२॥

x x x

4474/2184 गीतगोविन्द-टीका 'रसकदंब-कल्लोलिनी'

OPENING :

इति यमुनाकूल इत्यनेन संभोगश्रमहरणाय शिशिरसमीरपद्मावचयजलकेलीनामित्यादि संपत्तिर्दर्शिता द्वयोराधामाधवयो । राधसाधसंसिद्धाविति राध्यते साध्यते, संसिद्धि-प्राप्यते सौन्दर्यादिगुणैस्तादृश नायिकाशिरोमणेराकाङ्क्षितमेन ययेति सा राधा ।

CLOSING :

श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराप्सरादि प्रियबन्धुकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥९२॥

प्रफुल्लभगवज्जनं रसकदम्बकल्लोलिनी,
प्रफुल्लयतु मोहने भजनतानसम्वर्द्धिनी ।

समस्तपदचातुरीवलितगीतगोविन्दतः,
प्रशस्तरसदीपिका मधुरपुञ्जमञ्जूषिका ।

COLOPHON :

इति श्रीमद्वृन्दावनेश्वरीप्रियकृच्चरणपङ्कजरेहमकरन्दास्वादन पटु-चञ्चरीकसम्भाषणमधुवरनन्दोद्दोलचल हृदये । श्रीमद्भगवद्दासेन भगवज्जन-परितोषाय विरचितेयं रसकदंबकल्लोलिनी ।

श्रीमद्रसवेदिभिर्भगवत्प्रियैरानंद संदोहसंदीपिका,
परमोज्ज्वलरसावगाहिमनसाऽहर्निशं विचारणीया ।

इति श्रीगीतगोविन्दस्य रसकदंब-कल्लोलिनी टीका समाप्ताः ।

Post-Colophonic :

सम्वत् १८४० ॥

x x x

4476/2187 गीतगोविन्द-शशिलेखा-टीका

OPENING :

श्रीगणेशाय नमः ।

प्रीतिं वः परमेश्वरः परहितः प्रीतिप्रसन्नः परा-
माधत्तां घनसारसुन्दरतर श्रीकस्य सा राधिका ।
गौरीभूषणभूषणीय पदतामन्योन्यशोभार्पणा-
द्धंमीवप्रतिमासिताश्मजटिता प्राप्नोति यस्याङ्गगा ॥१॥

विशदितशिवपक्षां गीतगोविन्दटीकां
रचयति शशिलेखां मैथिलः कृष्णदत्तः ।
इह न विविधटीकाव्यंजितः कृष्णपक्षो
विवृत उभयपक्षैकाभिधेयं पदं वा ॥२॥

दोषान्वितापि कुटिलापि विमार्गगापि,
शुद्धचास्पदंशिवपदं कथमप्यवाप्ता ।
केषां विशेषविदुषामपि मोदमेषा–
माधास्यति स्फुटपदा भुवि चन्द्रलेखा ॥३॥

शैवं नाद्रियते सुधीरपि मतं प्रायोधुना वैष्णवः,
शैवो नैव च वैष्णवं निजनिजासद्वासनावासितः ।
मत्वेत्थं मधुसूदनोपि मुरजित्पक्षे महिम्नः स्तुतिं,
व्याचख्यौ जयदेवसूक्तिमपि तां शैवे नमाम्यध्वनिम् ॥४॥

CLOSING : जिह्वा व्याली मुखबिलतलादुल्लसन्ती दुरुक्त-
क्ष्वेडं यस्योद्वमति पिशुनस्यार्थनाभिः किमस्य ।
जिह्वा यस्य प्रथयति गुणानेव वक्त्रेन्दुवासात्,
पीयूषार्द्रा जगति सुजनस्यार्थनाभिः किमस्य ॥१॥

COLOPHON : इति श्रीमैथिलकृष्णदत्तविरचितायां श्रीशशिलेखाख्यायां श्रीगीत-गोविन्दस्य श्रीशिवपक्षव्याख्यायां द्वादशः सर्गः ॥

Post-Colophonic: सम्वत् १९०९ फाल्गु० कृ० ति० १२ ॥

x x x

4482/2218 गौरीशङ्करकीर्त्ति

श्रीगणेशाय नमः ।

OPENING :

श्रीः सौख्यं कीर्तिरायुः किलभवति नृणां यत्कृपालोकलेशात्,
प्रत्यूहानां विनाशं झटिति हि कुरुते यः सकृद्ध्यात एव ।
सर्वारंभेषु देवा हरिहर विधयोयं यजन्ति प्रयत्ना-
न्नित्यः स त्वां सदाव्यात्सकलसुरनतः कोपि हेरंबदेवः ।।१।।

CLOSING

महादाता महावीरः सत्यवाग् विजितेन्द्रियः ।
वर्तते सर्वराजेन्द्र पूज्यपादारविंदकः ।।२०।।

तस्य पुत्राः प्रवर्तन्ते चत्वारो धर्मवर्द्धनाः ।
राधाकृष्णस्तथाबालगोविंदोस्ति द्वितीयकः ।।२१।।

तथा बालमुकुंदश्चदेवदत्तश्चतुर्थकः ।
सर्वे सर्वगुणै रम्या ब्राह्मणाशीर्फलात्मकाः ।।२२।।

पूर्वस्यां दिशिकाशीत उपभोजपुरं वरे ।
मधुसूदनमुख्यानां सार्द्धग्रामेभवत्स्थितिः ।।२३।।

श्रीगीरीशंकरप्रीत्यै कृतो ग्रंथः सुशोभनः ।
अमरेणेह कविना गौडविप्रवरेण वै ।।२४।।

जयसिंहपुरस्थेन माधवेन्द्रादिसेविना ।
नववेदवसुक्ष्माभिर्मिते संवत्सरे शुभे ।।२५।।

वैशाष मासि शुक्ले च षष्ठी युक्रविवासरे ।
सिन्धोः श्रीमाधवेन्द्रस्य राज्ये दिल्लीपुरस्थिते ।।२६।।

श्री गोवर्द्धननामशैलमपियोहस्तांगुलौ संदध-
द्गर्वंखर्वतरं व्यधाद्बलभिदः सस्मेरवक्त्राम्बुजम्,

गोपानां च मुदं स्मरं च सुदृशां यो वर्द्धयल्लीलया,
सोयं वो भवतात् सदैवपरमानंदाय नंदात्मजः ॥२७॥

COLOPHON : इत्यमरकविकृतौ श्रीगौरीशंकरकीर्तिनामकाव्यैकादशः सर्गः

x x x

4502/2221 मनोवलम्बिका

OPENING : श्रीराधाकृष्णाभ्यां नमः ।

श्रीरूपवाणीमाधुर्य्यं वृन्दावृन्दावनान्तरे ।
सदास्तिवीथीमाकृष्यादारादारागशालिनी ॥

कुंजाद्गोष्ठं निशान्ते प्रविशति कुरुते दोहनान्नाशनाद्यां,
प्रातः सायं च लीलांविदधति सखिभिः संगवे चारयन्गाः ।
मध्याह्ने चाथ नक्तं विलसति विपिने राधयाद्धापराह्ने,
गोष्ठं याति प्रदोषे रमयति सुहृदो यः स कृष्णोवतान्नः ॥

CLOSING : तदंते तु ।

तांबूलैर्गंधमाल्यैर्व्यजनहिमपयः पादसंवाहनाद्यैः,
प्रेम्णा संसेव्यमानौ प्रणयसहचरी संचयेनाप्तशातौ ।
वाचाकांतेरणाभिर्निभृतरतिरसैःकुंज सुप्तालिसंघौ,
राधाकृष्णौ निशान्ते कुसुमशयने प्राप्तनिद्रौ स्मरामि ॥८६॥

श्रीरूप हे श्रीरघुनाथदास,
श्रीकर्णपूराभिधकृष्णदास ।
युष्मन्मुखांभोज विनिसृतानि,
पद्यानि मे हृद्यनिशं स्फुरंतु ॥८७॥

युष्मत्पदाम्भोजरजोनुवर्त्तिना,
मुकुन्ददासेन मनोवलम्बिका ।
गोविंदलीलामृतदर्शितक्रमात्
पद्यानि संगृह्य मया विनिर्मिता ॥८८॥

COLOPHON : इति श्रीमनोवलम्बिकायां निशीथविलासो नामोष्टमोविषयः ।

x x x

4505/2195 मेघदूत-बालप्रबोधिनीटीका सह

OPENING : श्रीगुरुचरणकमलेभ्यो नमः ।

ग्रन्थादौ मङ्गलमारभते:—

कल्याणपूर्णैः करुणाकटाक्षैः,
काशीपुरे कामपि कल्पवल्लीम् ।
सीमानमुच्चैः सुतवत्सलानां,
समाद्रिये मातरमद्रिकन्याम् ॥१॥

काशीविश्वेशचरणौ प्रणम्याभीष्टसिद्धये ।
क्रियते मेघदूतस्य टीकाबालप्रबोधिनी ॥२॥

CLOSING : उद्भासिताखिलपदामिह मेघदूत-
काव्येप्रबुद्धरसबन्धुरभावभाजि ।
सज्जीभवद् गुणकथां स्थिरदेवनामा-
टीकामिमामकृतकीर्त्तिमिव प्रसन्नाम् ॥१॥

COLOPHON : इति सरस्वतीशृङ्गारहारोपाख्याने महाकाव्ये कविराजकालिदास-कृतौ स्थिरदेवकृतिरियं टीका सम्पूर्णा । शुभं भवतु ।

मेघदूताय नमः ।

Post-Colophonic : यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥१॥

अदृष्टभावान्मतिविभ्रमाद्वा यदर्थहीनं लिखितं मयात्र ।
तत्सर्वमार्यैः परिशोधनीयं दोषो न देयः खलु लेखकस्य ॥२॥
लिखितं ब्राह्मणेन निर्भयरामेण विद्वदुपासनार्थम् ।

x x x

4514/2212 रामचन्द्राह्निकर टीकासह

OPENING :

श्रीगणेशाय नमः ।

स्रग्धरावृत्तम् ॥

शक्तिर्येषां न पुंसां भवति न कवितालोकशास्त्राद्यवेक्षा,
नैपुण्यं चैवनोवाभ्यसनमपि तथा शिक्षया काव्यगानाम् ।
काव्यं कुर्वन्ति तेपि प्रचुरगुणयुतं यत्कृपातो लभन्ते,
प्रेमाणं चाप्यलभ्यं तदवनितनयापादपद्मं नमामि ॥१॥

येषां पुंसां शक्तिः कवित्वबीजरूपः संस्कारविशेषो नास्ति कवितायाः काव्यस्य लोकवृत्तस्य शास्त्रादीनामवेक्षया दर्शनेन नैपुण्यं प्रवीणता च नैव आदिपदेन इतिहासपुराणादीनां संग्रहः काव्यं गायन्ति तेषां शिक्षया अभ्यसनमभ्यासोपिनास्ति । एवमेतत्काव्यनिर्माणकारणभाववंतस्तेपि यस्य जानकीचरणस्य कृपातः काव्यं कुर्वन्ति अलभ्यं साधनासाध्यं स्वतन्त्रमिति यावत् जानकीरघुनन्दनविषयप्रेमाणं च लभंते तत् अवनितनयायाः श्रीजानक्याः षादपद्मं नमामि ॥१॥

COLOPHON :

इति सिद्धिश्रीमहाराजाधिराजश्रीमहाराजाश्रीराजाबहादुर सीतारामचन्द्रकृपापात्राधिकारी विश्वनाथसिंहदेवविरचिते रामचन्द्राह्निके टीकायां अष्टमो यामः ।

x x x

4516/2220 वखतेश-रहस्य

श्रीगणेशाय नमः ।

OPENING :

अथ श्री वखतेश-रहस्यं लिख्यते ।

स जयति वखतेशभूमिपालो,
हरिरिव सम्प्रति पुण्डरीकनेत्रः ।
सरसिजनिलयापतिः प्रजाना–
मवनकरः पुरुषोत्तमोतिहृद्यः ॥१॥

सुवर्णदानैर्जितकर्णभूप–
स्तनुश्रिया निर्जितदत्तरूपः ।
विराजते श्रीवखतेशभूपः
स्मेरास्यनिर्भर्त्सितचन्द्ररूपः ॥२॥

CLOSING

अथ भूपतिर्गृहमाययौ निजमुज्वलच्छविधारकः,
गजतोवतीर्य सशक्रविक्रमचक्रसंक्रमकारकः ।
बहुदानवारिविलक्षणार्णवजातशुभ्रयशः शशी,
निशिवादिवासकलासु दिक्षु च यस्य संप्रति राजते ॥३७॥

COLOPHON :

इति श्रीमाणिक्यमैथिलकृते श्रीवखतेशरहस्ये गृहागमनं नाम सप्तमः सर्गः ।

Post-Colophonic :

शाकेस्त्रकंठ्युतपक्षयुताग चन्द्रे,
चैत्रेकुजेनुदशमीत्यवलक्षपक्षे ।
माणिक्यमैथिलबुधः ससमाप काव्यं
भाव्यन्यतो न वखतेश रहस्यमित्थम् ॥

। शुभम् ।

x x x

4517/2216 वाराणसी-दर्पणः

OPENING :

श्रीमद्गुरुचरणकमलेभ्यो नमः ।

नत्वा श्रीगुरुपादपद्मयुगलं स्मृत्वा परं श्यामलं,
काव्यालापमयं मुदे शुभधियां संतोषविस्तारकम् ।
गर्जद्गूर्जरनागराभरसुधीः सर्वोत्तमं सद्गिरा
श्रीमद्राघवसूनुरेष कुरुते वाराणसीदर्पणम् ॥१॥

CLOSING :

एवं यत्कविना प्रकाशितमिदं वाराणसीदर्पणं,
तत्सर्वं मणिकर्णिकापतिरयं जानातु विश्वेश्वरः ।
तस्मै चेत्कृतमस्ति जन्मपरितः किंचिन्नमोभाषणं,
तेनैवात्र कृती भविष्यति सदा श्रीवत्सराजः सुधीः ॥२४॥

यं व्यासश्च पराशरश्च सुधियां श्रीरामनामेति यं,
यं वल्मीकभवोपि कुंभकलभो वारांनिधेः पाचकः ।
यं सर्वेन्द्रसुरासुरं जगदहो गच्छंश्च विश्वेश्वरो
यं गौरी च गणेश्वरश्चतमहं श्रीमद्गुरूंभावये ॥२५॥

श्रीमद्राघवसूनुसुंदरकृते वाराणसीदर्पणे,
श्रीमच्छंकरशंकरीपदयुगप्रत्यक्षभावोदधौ ।
श्रीमद्रुद्रसुसंख्ययाभिगणितः कालेशकण्ठच्छवि-
र्विश्वेशोत्तमनाम सर्वचरमः काव्ये प्रसादः शिवः ॥२६॥

विश्वेशोत्तममूर्तिदेविमहतादिव्यैरहोभिर्मुदा,
सत्यं श्रीरसविश्वनाथगणिते चाब्दे गुरौ वासरे ।
आषाढोत्तममासशुद्धसरसे पक्षे तिथिः पञ्चमी,
तस्यां राघवसूनुनाकृतमिदं वाराणसीदर्पणम् ॥

x x x

4518/2219 विनयसिंह–कीर्तिरथ

OPENING : श्रीगणेशाय नमः ।

सदरविन्दरवि शशिभूषणं,
गुरुनिदेशबुधं कृतमङ्गलम् ।
कविरमन्दमुदे प्रतिवासरं
द्रुतविलम्बितविश्वसृजं भजे ॥१॥

लावण्यातिरतिं पतिव्रतधरां प्राणप्रियां वल्लभां,
प्राप्याद्यावधिकामदस्य कृपयाऽगामैकनारीव्रतम् ।
किन्त्वेषा कवितेव मे पुरवधूश्चेतः समाकर्षति,
धन्यालापपरार्थसंचयनधीः शार्दूलविक्रीडितम् ॥२॥

CLOSING : अथ जय जय सार्वभौम महाराजाधिराज विनयसिंहसारविजित-भूमिपालविशालदयाधारमानसार इति सर्वतः स्तूयमानः संपदातुलित मेघ-वाहनोऽतिहृष्टोमित्रगणसमेतोऽनपेतोरुविनयोनयोचितमतिर्विनयसिंहो देवालय-मुपेत्य पूजोपकरणसंभारभासुरकरेण विप्रनिकरेण समेतः समभ्यर्च्य भगवन्तमु-पविष्टः पुरतो निषसदता विद्वद्वृन्दवन्दितपदेन जगन्नाथाभिधेन नृपशुभचिन्त केन सुमतिसमृद्धेन ज्ञानवृद्धेन च तेन प्रेरितानां मुखेभ्यो विद्वज्जनानां शास्त्रा-र्थमवचितकाव्यतत्वानां कविवराणां च कवित्वमहरहरश्रृणोत् ॥३३॥

विविधयमकहृद्यगद्यपद्य–
स्फुटतरभाव विशेषरम्यः ।
ललितपदपदार्थगुम्फितोयं,
जनयतु चेतसि सम्मदं कवीनाम् ॥३४॥

COLOPHON : इति श्रीगार्गीदीनविरचिते श्रीरावराजाविनयसिंहकीर्तिरथेकाव्ये पञ्चमः सर्गः ।

x x x

452122/17 शम्भुमति-विलासः

OPENING :

हयग्रीवाय नमः ।

कश्चिद्द्विजो भरतवर्षमिमं भ्रमित्वा,
प्रादक्षिणक्रमणतो निजधर्मवर्ती ।
संप्राप्य यामुनतटं मधुकाननांते,
दृष्ट्वा द्विजं कमपि तत्र वचो बभाषे ॥१॥

ब्रह्मन् पुरीयमवभाति सुरस्य कस्य;
सूर्यात्मजातटगताभिधया च कासौ ।
प्राकारगोपुरकपाटवती सुपुण्या,
प्रासादसौधशिखरोज्ज्वलहेमकुंभा ॥२॥

CLOSING :

इत्थं तदीयवचनं स निशम्य विप्र–
स्तेनैव सार्द्धमविशन्मथुरां द्विजेन ।
श्रीकेशवं च कमलाननपङ्कजेन
दृष्ट्वा तमोवितिरस्य विनष्टिमाप ॥१५३॥

गोत्रेभवद्विजवरः किल कश्यपस्य
नाम्ना हरिर्हरिसमर्प्पित सर्वकर्म्मा ।
सन्नाह मुत्कुलशिरोमणिरुग्रतेजा–
स्तत्सूनुरात्मसदृशः फणिशायिशर्म्मा ॥१५४॥

तस्मात्सीतारामशर्मा बभूव
पुत्रो देव्यां रूपवत्यां गुणाढ्यः ।
जातोभूधर्य्यां ततः शंभुशर्मा,
श्रीमद्विष्णवाचार्यसेवैककर्मा ॥१५५॥

यः श्रीनिवासगुरुलब्धसमस्तविद्यः,
श्रीमन्महार्य्यसमवाप्त परात्मविद्यः ।
श्रीवैष्णवाभिमतधर्म्मनिविष्ट चित्त-
स्तत्संगमादुभयभोगविरक्तचित्तः ॥१५६॥

योमाधवेशनृपनिर्मितमाधवाख्ये
वासं व्यधत्तनगरे बुधमाननीयः ।
काव्यं हि तेन निजबुद्धिविलास संज्ञं,
संदर्भितं भगवतः परितोषणाय ॥१५७॥

अहमिह यदि दुष्टं प्रावदं संप्रमादा–
त्सकलमपि विदित्वा शोधयध्वं प्रवीणाः ।
स्खलति किल यथाङ्घ्रिः कर्हिचिद्गच्छतो वै,
.....वत वदतिविरुद्धं वा बटुःकोपितद्वत् ॥१५८॥

काव्ये गुणौघरचिते मृगयंति दोषं,
दुष्टा न जातु गुणमत्र विलोकयन्ति ।
सन्मंदिरे मणिमये मृगयन्ति रंध्रं,
कीटा न शिल्परचनामवलोकयन्ति ॥१५९॥

संवत्सरेंकनिगमेभशशाङ्कसंख्ये,
शाकेब्धिचंद्रहयभूमियुते च ज्येष्ठे ।
कुह्वां रवावमृतभूवनसंनिकर्षे,
काव्यं ह्यास्य कृपयापरिपूर्तिमागात् ॥१६०॥

COLOPHON: इति श्रीमन्नारायणचरणनलिनद्विरेफ श्रीनिवासार्यशिष्यमिश्रशंभु-मतिविलासाख्ये महाकाव्ये चार्वाकादिनिराकरण-विप्रमथुराप्रवेशादिवर्णनं नाम चतुर्थः सर्गः ।

Post-Colophonic: मिती चैत्र कृष्णा ११ रविवासरे । सं० १९१३ का ।

मुरलीधरेण यथाप्रतिकृतम् ।

x x x

4522/4591 शिवहरिविलासः

OPENING : श्रीगणेशाय नमः ।

देवीं वागीश्वरीं वन्दे मुक्ताहारोज्वलप्रभाम् ।
स्फाटकीमलयायुक्तां भक्तज्ञानप्रदां शुभाम् ॥१॥

गुणिहृदयचकोरचन्द्रबिम्बं, रसिकरसामृतवर्षिणं प्रबुद्धम् ।
शिवनृपतिविलासनामधेयं, निजमतिचारुचमत्कृतिं करोमि ॥२॥

श्रीमद्रामदयालुनामपितरं रूपाभिधां मातरम् ।
वन्दे न्यायकलाकलापकुशलं श्रीब्रह्मदत्तोबुधः ।
क्षोणीमण्डलमण्डितालवरपूस्तत्रस्थितो मोदते ।
सारस्वत्यकुलाग्रणी कविकुलालङ्कारचूडामणिः ॥३॥

CLOSING : कन्याविवाहार्थमहं प्रयाचे, यस्मात्त्वदीयोऽस्मि तवैव लज्जा ।
तस्मात्सहस्त्रद्वयसंख्यकं मे, प्रदेहि वित्तं नरलोकपाल ॥१॥

काव्यं कारय भूपते मम रवात्पौराणिकीं सत्कथां,
सर्वान् श्रावय श्रावय प्रतिदिनं धर्म्यं सदा संशृणु ।
सत्तर्कामृतवर्षिणीं बुधवचः पाथोधिधारां पिब,
नोचेद्देहि विदेशसंगमकरीमाज्ञां गिरां मे प्रभो ॥२॥ शुभम् ॥

बाबूजी नामतः ख्यातः शिवराजहरेर्गुरुः ।
यस्यमंत्रप्रभावेण भवच्छत्रुपराजयः ॥३॥

x x x

4535/2246 अतन्द्र-चन्द्रिकानाटक

OPENING :

श्रीगणेशाय नमः । श्रीसीतापतये नमः ।
श्रीगुरुपरमात्मने नमः । श्रीसरस्वत्यै नमः । श्रीहरिः ।

या विद्या कपिलाक्षपादभरतद्वैपायनादीन् पुरा,
संश्रित्य न्यवसन्, जहुर्त्रविरहप्रारब्धदुखं मिथः ।
तान्निर्दूतवियोगदुखमवसन् यस्मिल्सुभद्रोदये,
तं विद्यानिधिमादरेण कलये भद्राय पीताम्बरम् ॥१॥

अपिच—

क्षीराम्भोनिधिमध्यसुप्तमधुजिद्बिम्बच्छटाबन्धुर-
स्सम्पूर्णमिलशीतरश्मिविलसल्लक्ष्म प्रभासोदरः ।
उन्मीलन्ननु पुण्डरीकविहरन्मत्तालिलीलाधरः
पार्वत्या तरलाक्षिमीक्षितरुचिः श्रीकण्ठकण्ठोऽवतु ॥२॥

नान्द्यन्ते सूत्रधार—

अहो साहसोपन्यासः प्रियवयस्यभावस्य । सकलकलावतां महाराज-
फतेशाहसभासदामनुरञ्जनाय यत् प्रयतसे ।
कथय, किंरूपकमाश्रित्यानुरञ्जयिष्यसि सामाजिकान् ?

पारिपार्श्विक—माऽवमंस्थाः आसीत्कश्चिद्विद्वद्वृन्दवन्द्यमानचरणो विद्यानिधि-पदलाञ्छनष्पीताम्बरोनाममैथिलः ।

सूत्रधारः—

सकलजनविदित एव सः कवेः रामभद्रस्यात्मजः यस्य दुष्करां प्रतिज्ञा-मुदाहरन्ति—

न सदाचारितादपैमिमार्गा-
त्परजायां जननीसमामवैमि ।
गुणगणमात्रमुपैमि रामभद्रा-
त्सुकृतागाधमहोदधे रुदेमि ॥

इति परिम्राम्नाया इव लोके सत्पुरुषार्था इवेश्वरात् । तस्मादजायंतसुताश्चत्वारो गुणवत्तराः । तेषु विद्याभिष्कलाभिर्वयसा च कनीयसो जगन्नाथस्य कवे. कृतिः ।

सूत्रधारः—

ससंभ्रमं स्मृतं, तर्हि अतन्द्रचन्द्रिकंनामप्रकरणम् तत् ।

CLOSING & COLOPHON :

इति निष्क्रान्ता सर्वे चन्द्रिका प्रत्यानयन्नाम सप्तमोऽङ्कः ।

समासं चेदमतन्द्रचंद्रिकं नाम प्रकरणम् । शुभमस्तु ।
चैत्र मासे शुक्लपक्षे भृगवासरीयां १३ त्रयोदशी ।

Post-Colophonic :

संवत् १९०९ ।

यादृशं पुस्तकं दृष्टा तादृशं लिखितं मया ।
यदिशुद्धमशुद्धं वा मम दोषो न दीयते ॥

x x x

4542/2263 आनन्दचन्द्रोदय-नाटक

OPENING:

श्रीगणेशाय नमः ।

येनानन्दैकमूर्तिर्मुकुरपुटभृता राधिकाऽसौनिकुन्ते,
क्रीडन्ती वेणुनादैरनुचरणध्वनिनास्वाम्यभावेष्धायि ।
योगीन्द्राणां दुरूहप्रगुणगणगतिः कोटिकन्दर्परूपः,
श्रीराधावल्लभोऽयं स दिशतु सरसं प्रेमपूरं जनेभ्यः ॥१॥

अपि च—

श्रीवृंदावनधाममण्डलमिति स्फीतं-गोस्वामिना,
राधावल्लभमन्दिरं च यमुना तत्रापि कुञ्जोद्रुमः ।
तत्तत्प्रेमनिवासपात्ररसिक ग्रामैकगोष्ठीपरा,
तत्र श्रीहरिवंशवंशवसतिर्वंचति? सर्वोपरिः ॥२॥

(नान्द्यन्ते)

सूत्रधार :—अलमलमनल्पजल्पनकल्पनाविकल्पेन । आज्ञापितोऽहं प्रणयदिन-मणिप्रभाप्रभासिताशयाकाशैरसिकसामाजिकनिचयैः यत्वया भरत-वंशावतंसेनाभिनवं नाम नाटकं प्रयोक्तव्यमिति तदहं गृहिणीमाहूय सगीतकमनुतिष्ठामीति (परिक्रम्य नेपथ्याभिमुखमवलोक्य).

आर्ये—नेपथ्याभिविधानमवसितं चेदितस्तावदिति । मणिमुक्ताफलावलम्बितरल्लकोभयलता ग्रथिततालङ्कगुच्छगुच्छमितकर्णयुगलारुचिनिचय चाकचिक्याचारुक च सकलमण्डलविशेषकविशेषयितृललाटमण्डलानासिकाधिराजमानोरुशिखरमुक्ताफलल्हासल्हासितनिखिलजनमनोहराविहङ्गनिकरसणसणायमानमणिघटितकेयूरकङ्कणक्वणितदेहावयवाचतुरसीयघटितमुक्तामणिविन्दुवृन्दवन्दिततरुतुलाकोटिसिंजित जितकोटिलोकमानसातनुतरीयपीतपीनामवसनाकञ्चुकंवितत चक्रवालरचित संजसिनिहितहेमन्ततुं पट्टिकाविलासलसितचञ्चलाचमत्कृत्लोकलोचनाहेमलतानाम् ।

नटी (प्रविश्य)—अज्ज, इयम्हि । आणवेदु भाओ कोणिओओ अणुचिदीअदु इदि ।

(आर्य ! इयमस्मि आज्ञापयतु भावो को नियोगो, अनुष्ठीयतामिति) ।

CLOSING :

(साष्टाङ्गम् प्रणमति) ।

हित चि—कुतस्ते पुत्रः श्रीरङ्गीलालशर्मा येनेदं सुविहितप्रयोगं नाटकं समुल्लसति ।

(प्रविश्य)

श्रीरङ्गी० —आर्यौ—प्रणमामि । इत्युभौ प्रणमतः) ।

हित चि—वत्स स्वेष्टसेवानुरागी भव । अपि च—

रागारधः नादितश्चरमिदं मात्रत शक्ति वृथा
स्तावन्मात्रतयोपयोगरसिकश्चान्तर्विरक्तो भव ।
राधाकृष्णपदारविन्दभजनस्वादेन लोकोत्तरो-
वृन्दारण्यकृतस्थितेस्तव भवत्यानन्दचन्द्रोदयः ।।

श्री रङ्गीलाल—तथास्तु (इति प्रणमति) ।

(इति निष्क्रान्ताः सर्वे) ।

इति सप्तमोङ्कः ।

....

शरां वराङ्केन्दुसमानवत्सरे,
पौषे सिते नागतिथौ शनैश्चरे ।
आनन्दचन्द्रोदयनामनाटकं–
श्रीरङ्गीलालोऽरचद्रसास्पदम् ।।

रेवोत्तरे गुर्जरदेशमध्ये,
बड़ोदसंज्ञे नगरे विशाले ।
श्रीराधिकावल्लभमंदिरेऽयं,
सम्पूर्णतामाप लघुर्निबन्धः ।।

COLOPHON : इदं पुस्तकं लिखितं श्रीवृन्दावनमध्ये श्रीगोपालदासेन ।

Post-colophonic: सम्वत् १९१४, कार्तिक सुदि ।

x x x

4551/2258 जगन्नाथवल्लभ-नाटक

OPENING :

श्रीराधारमणो जयति ।

स्वराञ्चितविपञ्चिकामुरजवेणुसंगीतकम् ।
त्रिभङ्गतनुवल्लरीवलितमुग्धहासोज्ज्वलम् ॥

वयस्य :— करतालिका-रणितनूपुरैरुज्वलम् ।
मुरारिनटनं सदा दिशतु शर्म्म लोकत्रये ॥

अपि च—

स्मितं नवसितद्युतिस्तरलमक्षिनाम्भोरुहं,
श्रुतिर्न च जगज्जये मनसिजस्य मौर्वीलता ।
मुकुन्दमुखमण्डले रभसमुग्धगोपाङ्गनाद्-
दृगञ्चलभवो भ्रमः शुभशतायते कल्पताम् ॥

अपि च—

कामं कामपयोनिधिं मृगदृशामुद्भावयानिर्भरं,
चेतः कैरवकाननानि यमिनामत्यन्तमुल्लासयन् ।
वक्षः कोककुलानि शोकविह्वलान्येकान्तमाकल्पय-
न्नानंदं वितनोतु वो मधुरिपोर्वक्त्रापदेशः शशी ॥

....

नटः—किं बहुना—

यन्नामापि निशम्य सन्निविशते सेकंदरः कन्दरं,
स्वंवर्गं.....भूमितिलकः सास्रं समुद्वीक्षते ।
मेने गुर्ज्जरभूपतिर्यदि च वारण्यं निजं पत्तनं—
वातव्यग्रपयोधिपोतपतङ्गमिव स्वं वेद गोडेश्वरः ॥४॥

कार्यव्यूहविलासईश्वरगिरेर्द्वैतं सुधादीधितेः,
निर्यासस्तुहिनाचलस्य यमकं क्षीराम्बुराशेरसौ ।

सार

शारदवारिदस्य किमपि स्वर्वाहिणीवारिणो,
र्द्वैराज्यं विमलीकरोति सततं यत्कीर्त्तिराशिर्जगत् ॥५॥

यद्दानाम्बुकदम्बनिर्मितनदी संश्लेषहर्षादसौ,
रिङ्गत्तुङ्गतरङ्गनिस्वनमिषात् प्रस्तौति यं वारिधिः ।
नित्यप्रस्तुतसप्ततन्तुभिरभिस्यूतं मनो नाकिनां,
येनैतत्प्रतिमाच्छलेन यदमी मुञ्चन्ति न प्राङ्गणम् ॥६॥

तेन प्रतिभटनृपचटाकालाग्निरुद्रेण श्रीमत्प्रतापरुद्रेण श्रीहरिचरण-
मधिकृत्य कमपि प्रबन्धमभिनेतुमादिष्टोस्मि ॥

यदुक्तम्—

मधुरिपुपदलीला शालितत्तद्गुणाढ्यम् ।
सहृदयहृदयानां काममामोदहेतुम् ॥७॥

तत्कथय कथमाराधनीयो विद्यानां निधिः यतोस्मिन्नभिधातुकामो-
वाक्पतिरपि प्रतिपत्तिमूढः स्यात् ।

(क्षणं विमृश्य) आ स्मृतम् ।

नटी—

ता किसो ।

गुरुप्रणीतनीतिकरं अभिनवकृतिमन्यच्छायमानो निबद्धम्
समभिनयनटानां वर्य्यकं कंचित्प्रबन्धम् ।

सूत्रधार :—

प्रिये! सर्वविद्यानदीविलासगाम्भीर्यमर्य्यादाप्रसादादिगुणरत्नाकरस्य सुरचितमंत्राश्रयीकृतप्रगुणपृथ्वीश्वरस्य श्रीभवानंदरायस्य तनुजेन श्रीहरिचरणालङ्कृतमानसेन श्रीरामानंदरायेण कविना तत्तद्-गुणालङ्कृतं श्रीजगन्नाथवल्लभं गजपतिप्रतापरुद्रप्रियं रामानंद संगीतं नाम नाटकं निर्माय समर्पितं च अभिनेष्यामि ॥

तथापि इदमस्तु :—

श्रद्धाबद्धमतिर्मम प्रतिदिनं गोपाललीलस्य यः.
संसेवेत रहस्यमेतदतुलं लीलामृतं लोलधीः ।
तस्मिन्मद्गतमानसे गुरुकृपा दृष्ट्या भवत्या सदा,
भाव्या येन निजेप्सितां व्रजवने सिद्धिं समाप्नोति सः ॥

मद० आह—

तथास्तु । (इति निष्क्रान्ताः सर्वे) ।

राधासङ्गमो नाम पञ्चमोङ्कः ।

COLOPHON: इति श्रीरामानंदरायविरचितं श्रीजगन्नाथवल्लभं नाटकं समाप्तम् ॥

x x x

4554/2336 दानकेलि-कौमुदीभाणिका (सटीकम्-भाणम्)

OPENING : श्रीराधाकृष्णाय नमः ।

अंतःस्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा,
किञ्चित्पाटलितांचला रसिकतोल्लिक्ता पुरःकुंचती ।
रुद्धायाः पथि माधवेन मधुरव्याभुग्नतारोत्तरा,
राधायाः किल कुंचितस्तबकिनी दृष्टिःश्रियं वः क्रियात् ॥१॥

CLOSING : गतमनुशतेशाके चंद्रस्वर समान्वितः ।
नंदीश्वरे निवसिता भाणिकेयं विनिर्मिता ॥१॥

तदातु नायिका मंजुपुरुषान्नागसप्तकम् ।
उपन्यासोऽथविन्यासो विरोधःसाध्वसं तथा ॥२॥

समर्पणं निवृत्तिश्च संहारश्चापि सप्तमः ।
उपन्यासप्रसंगेन भवेत् कार्य्यस्य कीर्तनम् ॥३॥

निर्वेदवाक्यव्युत्पत्तिविन्यास इति कीर्त्यते ।
भ्रान्तिनाशो विरोध स्यान्मिथ्याख्यानं तु साध्वसम् ॥४॥

उपालंभवचः कोपपीडयेह समर्पणम् ।
निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ॥५॥

संहार इति च प्राहुर्यत्कार्य्यस्य समापनम् ।
शेषं च नाटके ज्ञेयं बुधैः प्रस्तावनादिकम् ॥६॥

द्विविधं पाठचं गेयं च, तत्र भाणिकेयं गेयरुपा ।

Colophon : "श्रीराधाकुण्ड वासिनः श्रीरघुनाथदासा स्नस्येत्यर्थः ।"

Post-Colophonic : संवत् १७७६ ज्येष्ठ सुदि २ रविवासरे लिखितं श्रीवृन्दावनम् ।

x x x

4566/4580 मुण्डित प्रहसन

OPENING : श्रीगणेशाय नमः ।

कठिनकुचयुगं ते चंचलाक्षिद्वयं ते,
कुटिलकचचयस्ते मंदयानं त्वदीयम् ।
अतिकृशतनुमध्यस्ते मिथः केलितल्पे,
प्रलपनमिति शेषात् पातु गौरीशयोर्वः ॥१॥

(नाद्यन्ते)

सूत्रधार :—

अलमतिप्रसङ्गेन । (नभोऽवलोक्य) । अये मुदिततारकागणविलसितः शिवरात्रिसमयो भूयसीं श्रियं पुष्णाति । यत्र किलकाशीनगरोत्तंसं श्रीविश्वेश्वरायतनं येन नानादिगन्तप्रदेशागतपरमधार्मिकशिवकेशवाभेदप्रतिपादनैकनिष्ठसाहित्य विद्यानिपुणतरप्रचुरदवस्थविद्वज्जनसमाजेन नानाशास्त्रीयोपन्यासं कुर्वतामुक्तिमण्डपः शक्रादिभिः कैलाश इव प्रतिभाति ॥ तथाहि—

वेदान्तवादनिरताः केचिन्न्याये विशारदाः ।
अपरे मीमांसासांख्यपराः कर्मब्रह्मेति विवदन्ते ॥१॥

तदहमपिशिवकेशवाभेदरूपकं कंचित्प्रबन्धमुद्दिश्य गायामि ।

(इति गायति)

जयजयवृषभध्वजगरुडध्वज ०

....

सूत्रधार :—

भद्र! सम्यग्दृष्टवानसि यत्सत्यं शिवज्योतिर्विरचितं मुण्डित-प्रहसनम् ।

CLOSING & COLOPHON:

श्यालादयः—तह्भोदु ।

(इति निष्क्रान्ता सर्वे) ।

मुण्डितप्रहसने शिवज्योतिर्विरचिते तृतीयोऽङ्कः ॥३॥

समाप्तं चेदं मुण्डितप्रहसनं नाम नाटकम् ।

Post-Colophonic: पुस्तकशाला अलवर सं० १९११ ।

x x

4570/2251 रामाभ्युदय-नाटक

OPENING: श्रीगणेशाय नमः ।

विश्वोल्लासनिशाविसारितिमिरं दूरं निरस्यादरा-
दारादेवहुताशनाधिगतया कांत्या स्फुरंत्या युतः ।
उन्मीलत्कमलावलीपरिमलव्यालोलभृङ्गाङ्गना
गीतस्फीतयशः प्रशस्तिरुदयं तन्वन् शिवो पातु वः ॥१॥

तदद्य देवश्रीत्रिपुरुषायतनमनुकौमुदीमहोत्सवमिलितं यात्रिकजनमभिनवरूपकाभिनयेन विनोदयितुमिच्छामि । परिक्रम्य नेपथ्याभिमुखमवलोक्य, आर्ये ! इतस्तावत् । प्रविश्य

नटी—

एसह्मि आणवेदु अज्हो को णिओओ अणुचिट्ठिअदुत्ति ।

सूत्र०—

आर्ये विदितमेव तावद् भवत्या ।

अस्ति ध्वस्तसमस्तवैरिविपिनप्रोद्यत्प्रतापानल-
ज्वालालीविमलीकृतत्रिभुवनः श्रीरामदेवात्मजः ।
आयुष्मानवनीवनीपकमनः संकल्पकल्पद्रुमो,
मेरुः स्मेरयशःप्रसूनपटलप्रोल्लासितोर्वीतलः ॥३॥

अपि च—

रणक्षोणीरंगप्रसृमरविपक्षक्षितिभुजो,
भुजादण्डोदञ्चतरसमरकण्डूभरहरः ।
शरद्राकाकारैर्मणिकिरणजालैः सुविलसद्,
यशः श्रीः श्रीमेरुः कथमिव हि वर्ण्यः कविजनैः ॥४॥

तेन च प्रबलरिपुकुलजलधिसंशोषणागस्त्येन त्रिविधवीरचूडामणिना महाराजश्रीमेरुदेवेन समादिष्टोऽस्मि । यथा सरसकविना व्यासश्रीरामदेवेन विरचिताभिनवं रामाभ्युदयं नाम छायानाटकमभिनीयमानं निरूपयमानं निरुपयितुमिच्छामः ।

CLOSING: तथापि इदमस्तु ।

पर्जन्य : कामवर्षी भवतु च वसुधा रत्नसू भुक्तवैरा,
भूपाला : पालयन्तु क्षितिवलयमिदं नीरुजः सन्तु लोकाः ।
अश्रान्तं सज्जनानां मनसि नवसुधासारवर्षं वितन्वन्,
संसारं कवीनां विलसतु विमलः कोपि वाचां विलासः ॥३०॥

इति परिक्रम्य निष्क्रान्ताः सर्वे । द्वितीयोऽङ्कः
समाप्तः ।

x x x

4584/2262 हास्यार्णव-प्रहसन

OPENING: श्रीगणेशाय नमः ।

स्वेदस्यन्दिनसद्विचंदनचयं दोर्वल्लिबन्धश्रमा-
दूर्ध्वश्वाससहाखिलत्स्वरकथं संदष्टदन्तच्छदम् ।
सीत्काराञ्चितलोचनं सपुलकं भ्रान्तभ्रूनृत्यत्करं,
पार्वत्या सुरतं मुदे रसवतामास्तां मृडाणीपतेः ॥१॥

अपि च—

स्वर्भानुः स्वरवर्तनानुसरति ग्रासाभिलाषादसा–
विदोरिन्दुमुखिग्रसेत किमुतद्भ्रान्त्या भवत्या मुखम् ।
इत्थं नाथ गिरा नभोर्पितदृशो वक्त्रेभवान्या मृशं,
मानिन्या कृत चुम्बनस्त्रिनयनस्तादिष्टाद्यध्वंसती(?) ॥२॥

(नान्द्यन्ते)

सूत्रधार :—अलमतिविस्तरेण ।

यदद्य—

हास्यप्रस्फुटदन्तमौक्तिकचयच्छायामनोज्ञानिनां,
नानालङ्कृतिसत्कृता रसवती चित्तप्रमोदस्थली ।
स्वच्छंदं वरवर्णिनी रसवती सीमंतिनी च स्वयं,
रम्या श्रीजगदीश्वरस्य कविता मच्चित्तमानंदयेत् ॥३॥

अस्ति च, तस्य कवेर्निजकुलनलिनविकाशादिनेश्वरस्यत्रिपुरहर-चरणप्रणामचन्द्रमः प्रकाशितकवित्वकैरवस्यसंप्रति । को मां प्रति निदेशः । 'यत्त्वमिह इह सुरभिसमयं समुचितेनास्मद्विरचितेन हास्यार्णवनाम्नाप्रहसनेन विदग्धसमुदायानां हृदयानंदं समुत्पादयेति ।

महानिन्द०—(सहर्षं) प्रभवति मनसि विवेकोविदुषामपि शास्त्रसंभवस्तावत् ।
निपतन्ति दृष्टिविशिखा यावन्नेन्दीवराक्षीणाम् ॥

लक्षेयं सुरतिर्जगज्जनदृशामानंदभूमिर्भृशं,
धूर्त्तानां विसरं प्रपञ्चरजसा प्राप्ताश्च हृत्प्रीतयः ।
संप्रत्युद्भटसंवरारिसमरं नानानखास्त्राङ्कितं–
त्वा केलिगृहं विधातुमधिकं वाञ्छावरो वर्तते ॥

इति हास्यार्णवे प्रहसने द्वितीयोङ्कः समाप्तम् ॥

COLOPHON:

Post-Colophonic: *संवत् १९१० ।*

x x x

OPENING :

4585/2236 हृदयविनोद-प्रहसन

श्रीगणेशाय नमः ।

उद्वेलवारिनिधिमध्यनिमग्नपृथ्वी,
निकर्षणा प्रकटिताङ्ग तविक्रमोपि ।
उन्मानपीठहरणादनुभूतखेदः,
शर्म्मानिशं दिशतु मुग्धकुमारमूर्त्तिः ॥१॥

नान्द्यते सूत्रधार :—

परिक्रम्य चिन्तां नाटयित्वा अपरिक्रान्तपूर्वायाः सहसाचित्ताकर्षणं अंगनाया इवाशङ्क्य सभायाः पण्डितैरपि भवतु तावद्गृहं गत्वा भार्यया सह समंत्रयिष्ये—

CLOSING :

जमदग्नि पंक्तिरथशौरिवूदेल-प्रभवेषु राम इति नाम समानम् ।
प्रथितास्त्रयोऽपि जयनीतिबलैं-स्त्रिभिरेव चान्य इति कश्चनभेदः॥८॥

नटी—अज्जउत्त, को तस्य राघवसूणो गुणरासिणो संकलेदुं सकुणोदि यस्म रामसाही रामसाहि त्ति सद्दो दण्डाहदकसाणसद्दव व्व चिरं णज्जावि विरमदि ।

सूत्र०—प्रसह्य संग्रामयतो विविक्षन्, संग्रामसाहीति पदेन रूढः ।

नटी—तदो तदो

सूत्र—पुनरभूद् भारतसिंह इति राजसिंहः

नोद्युग्रैः कलिकालदोषकरैर्विश्वं पराभूयतां,
काम्यं कर्म्मफलोदयाय विदुषामस्त्वैहिकामुष्मिकम् ।
राजानः परिपालयन्तु वसुधां काव्येषु मत्प्रीतयः,
साधूनां प्रणिधानमेतु हृदयं, साक्षात्परं ब्रह्मणि ॥

इति निष्क्रान्ताः सर्वे । द्वितीयोङ्कः ।

COLOPHON : द्व्यङ्कं च प्रहसनमेतद्रचितं कविपण्डितेन सत्कविना । आषाढकृष्ण-पक्षे नवम्यां कुजयुतायाम् ।

Post-colophonic : इति श्रीहृदयविनोदनाख्यं प्रहसनं समाप्तिमगमत् । शुभं भूयात् ।

x x x

4605/2226 दशकुमारचरित-शेष

OPENING : श्रीगणेशायनमः । श्री रामचन्द्रायनमः ।

भजे भवनिषेवितं भवनमेकमुच्चैःश्रिया-
मदारकरुणामयं परमधाम रामाश्रितम् ।
अनन्तचरणं हृदा परिविभाव्य रामायणं,
तनोति सुखमक्षयं जगति यस्य प (पा)रायणम् ॥१॥

देवीमीडे शम्मयीं वाङ्मयीं तां,
वाच्यातीतां शब्दचित्रार्थचित्राम् ।
नव्या नव्या याति भव्या कवीना,
माविर्भूता सम्मदाना दधाति ॥२॥

व्याकुर्वाणोऽशेषशेषप्रबन्धा
नास्येनाहुर्यत्रशेषाद्विशेषम् ।
कान्त्या कीर्त्या प्रज्ञया चन्द्रमौलिं
तातं वन्दे दीक्षितं चन्द्रमौलिम् ॥३॥

कुशला मतिः किमियान्निर्माणे दशकुमारशेषस्य
अन्तेवासिभिरनिशं प्रेरितबुद्धेर्ममात्र निर्मिता ॥४॥

अथानन्दपूर्णमानसोमोमकान्तिः सुश्रुत विश्रुत-चरित्रो मित्रोदय-विकाशीकाशीपतिमुखभूपति महीतोमहितोरुचिश्रुतविक्रमः । क्रमशः कथित-

निजकथं कथंचिदात्तं परमाप्तं मित्रगणमभ्यमित्रीणं सहजस्नेहस्पृशा संभावयन् भावयन्नन्वेषणप्रसङ्गसंपादिता खण्डभूमण्डलप्राज्यराज्यसमधिगतेर्दैवगतेरचिन्यतामचिन्त्यवैभवोभवोद्भवसमोऽसमोन्नतविक्रमैरविभ्रमैः कृतश्रमैर्विषदसुहृद्भिः सुहृद्भिर्मान्यमानोमानोन्नतरिपुमर्दनेन विराजमानो राजमानो जयश्रिया श्रियातुलित नरवाहनो राजवाहनस्तापसीभूतनिजधात्रीकथित निजकन्यकां कतल शवरसमाक्षिप्तनिजसहोदरवृत्तान्तश्रवणादवसात्पूर्वं विज्ञातशवरीहस्तोपलब्धकर्माणं निहतचण्डवर्माणमपहारवर्माणममात्मसहोदरं निश्चितवतो स्थाय प्राञ्जलिना समुद्भूतशर्मणाऽद्भुतकर्मणा प्रणम्योपहारवर्मणा व्यज्ञायि ।

CLOSING : तदेवं निरस्ताशेषदोषः कृते समस्तगुणदोषपरिपालितप्रजोरंजितभृत्यः प्रजानामसाम्प्रतमपनुदन्, प्रतिकुर्वन्, दैवीर्मानुषीश्चापदः संभावयन् बुधजनानुद्भावयन्, बन्धुजनान् न्यग्भावयन्, रिपुगणानुत्साहयन्, कर्मकरान् विप्रानर्चयन् गुरून् प्रणमन्, मान्यान् मानयन्, सौजन्यं प्रकटयन् दाक्षिण्यं अनुसरन् विनयं वर्द्धयन्, राजवाहनो रूपेणाप्सरसोजयन्तीं मनुःस्नेहमेवक्रमयन्तीं, शमयन्तीखेदं नित्यं रमयन्तीमिवातिसुन्दरीमवन्तिसुन्दरीं रमयन् कामतन्त्रनिष्ठ्याश्च(?)राभिलषितसुखान्यनुभवन्सुचिरमाननंद ।

COLOPHON : इति श्रीदीक्षितचक्रपाणिविरचितेदशकुमारशेषे पञ्चमःउच्छ्वासः ।

Post-Colophonic : श्रीसंवत् १९१० । मासोत्तमे श्रावणमासे कृष्णपक्षे तिथौ द्वादश्याम्.....लिखितमिदं पुस्तकं बालमुकुन्दशुक्लेन ।

x x x

4669/3215 नदिकेश्वर-काशिका-सटीक

OPENING: श्रीगणेशाय नमः ।

नमः शिवाय देवाय सर्वज्ञाय परात्मने ।
यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥१॥

श्रीशं गुरुं कुमारं च शैवतत्त्वविशारदम् ।
प्रणम्य नन्दिकेशादीन् शिवभक्तान्मुहुर्मुहुः ॥२॥

श्री शङ्करमिति पाठान्तरम्—

काशिकामादिसूत्राणां नन्दिकेशकृतां शुभाम् ।
लोकोपकारिणीं दिव्यां व्याकरोमि यथामति ॥३॥

इह खलु सकललोकनायकः परमेश्वरः परमशिवः सनकनन्दन सनत्कुमारान् श्रोतॄन् नन्दिकेश-पतञ्जलि-व्याघ्रपादवशिष्ठादींश्चोद्धर्त्तुकामो ढक्कानिनादव्याजेन चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेशेति मत्वाऽस्य सूत्रजालस्य तत्त्वार्थं नन्दिकेश्वरो जानाति इति नन्दिकेश्वरं प्रणिपत्य पृष्टवन्तस्तेषु पृष्टवत्सु षड्विंशतिकारिकारूपेण तत्त्वं सूत्राणामुपदेष्टुमिच्छन्निदमाचेष्टौनृत्तेति अहमितिशेषः ।

मू०— नृत्तावसाने नटराजराजो, ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

CLOSING

मू०— शकाराद्राजसं रूपं षकारात्तामसोद्भवः ।
सकारात्सत्त्वसंभूतिरिति त्रिगुण संभवः ॥२६॥

तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मापरो हल स्यादिति शंभुस्तिरोदधे ॥२७॥

COLOPHON :

इतिश्री नन्दिकेश्वरकृतकाशिका ।

सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतोहल् स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशन्स्तिरोदधे इत्यर्थः । हकारः शिववर्णस्यादित शिवम् ॥२७॥

Post-Colophonic:

इति उपमन्युकृता आदिसूत्रनन्दिकेश्वरकाशिकायास्तत्त्वविमर्शिनी संपूर्णः ।

संवत् १९१२ द्वितीया आसाढ शुक्ला ।

4681/3073 परिभाषेन्दुशेखर-दोषोद्धारटीका

OPENING : श्रीगणेशाय नमः ।

नत्वा गणपतिं देवं, नृसिंहं कमलायुतम् ।
तातं शम्भुं प्रभुं दुर्गां कृष्णदेवं तथाऽग्रजम् ॥१॥
शास्त्रप्रवर्तकाचार्यान्पाणिनिप्रभृतीन्मुनीन् ।
बालंभट्टाभिधं पायगुंडोपाख्यं परं गुरुम् ॥२॥
दोषाये पण्डितंमन्यैः परिभाषेन्दुशेखरे ।
दत्तास्तान् सम्यगुद्धर्तुं मन्नुदेवेन चिन्त्यते ॥३॥

शिष्यशिक्षायै प्रसंगतोऽन्येषां मङ्गलाय च स्वोपास्यदेवतानतिमुख-निबध्ननचिकीर्षितम् प्रतिजानीते ।

COLOSING : बाधकान्येव निपातनानि ।

COLOPHON : इति श्रीमन्नुदेवेन विरचिता परिभाषेन्दुशेखरदोषोद्धारः समाप्तः ।
लिखितं रामचन्द्रेण शुचौ शुक्लैनगे कवौ ।
बाणाभ्रनन्ददरूपेब्दे परिभाषेन्दुशेखरम् ॥१॥

x x x

4769/3244 महाभाष्यटीका-सूक्तिरत्नाकर

श्रीगणेशाय नमः ।

OPENING: न धातुलोप आर्द्धधातुके । आर्द्धधातुक इति श्रुतत्वाल्लोपस्य विशेषणं न गुणवृद्धयोरश्रुतत्वाल्लोपेन पौर्वापर्याभावान्नेयं पर सप्तमी । किं तु निमि निमित्त सप्तमी । तथाचार्धधातुकनिमित्ते लोपे गुणवृद्धी नेत्यर्थेभविते-त्यादौगुणनिषेधस्याप्रसङ्गादनुबन्धलोपस्य वा नैमित्तिकत्वादित्यभिप्रेत्याह, धातु ग्रहणं किमिति ।

CLOSING : ब्रह्मराशिरिति । परिमितोप्युच्चावचानेकपदवाक्यरूपशब्दब्रह्मणां राशिः पुञ्ज इत्यर्थः । अस्य ब्रह्मराशेर्यथा शास्त्रज्ञाने सर्ववेदाध्ययनजन्यतदर्थं ज्ञानजन्यानुष्ठानजनितपुण्यफलप्राप्तिः ज्ञातुः पित्रोश्च स्वर्गावाप्ति भवतीति प्रशंसामाह सर्वेति ज्ञानपूर्वकप्रयोगफलतयानिर्णीतत्वादि त्यर्थः, महीयते इति पूजां प्राप्नुत इत्यर्थः । कण्ड्वादियगंतोयम् ।

स्वस्ति, श्रीमुनिराजकुत्स इति यः ख्यातोऽभवद्भूतले,
तस्याप्यंशवपुस्तदीयजनिते प्रादुर्भवत् श्रीमुनिः ।
ग्रावोच्चाभकरः समीरसवितादीनां चिरास्तंभतः;
शक्नं गन्धयितुं क्षमोभवदिहाम्बाचार्य नामा सुधीः ॥१॥

तद्वंशे रघुनाथराहुलसुतः श्रीजीवदेवोभव
त्तस्मासीन्नरसिंह राहुल बुधस्तस्य कृतौ बोधके-
नानाशास्त्रविचार सारचतुरे सत्तर्कपूर्णे महा-
भाष्यस्याखिलगूढभावविवृत्तौ श्रीसूक्तिरत्नाकरे ॥२॥

अध्यायाद्याद्यपादस्य द्वितीयं पूर्णमाह्निकम् ।
विचारयन्तु सदसन्निर्मत्सरतया बुधाः ॥३॥

COLOPHON : इति श्रीमन्मण्डलीकपुरस्थं विद्वन्मण्डल्य.....तनास्तिकश्रीमदम्बरराजभट्टाचार्यवंशावतंस राहुलजीवासुतराहुलनृसिंहकृतौ नृसिंहसूक्तिरत्नाकरे महाभाष्यटिप्पणे द्वितीयमाह्निकम् ॥

x x x

4804/3229. शब्दसारटीका

OPENING : ओं तत् सत् ।
जयन्ति त्रिजगच्छ्रीमद्यतीशपदरेणवः ॥
सर्वोत्कर्षैकनिष्कर्षवार्षिण्यः कामधेनवः ।१।

इह सकललोकानुग्रह विग्रहोऽस्मद्गुरुः श्रीमद्यतीशाभिधानः सर्वशास्त्रविषय झटिति व्युत्पातिहेतवे तत्सारमुद्धिधीर्षुरादौ व्याकरणमारमुद्धरन्मङ्गलमाचरति । तामिति ।

तां भवानीं भवानीतक्लेशनाशविशारदाम् ।
शारदां शारदाम्भोजसित सिंहासनां नुमः ॥१॥

तांसर्वशक्ति मूलत्वेन शुम्भघे प्रसिद्धामतएव सांसारिकक्लेशनाशकशुभाम् शारदां विद्याऽधिष्ठात्रीं शरदुत्पन्नश्वेतकमलासनां सरस्वतीं शिष्याणां विद्यावैशद्याय नमस्कुर्म इत्यर्थ ॥१॥

CLOSING :

स्वरादयो निपाताश्चाव्ययसञ्ज्ञाः ॥ अव्ययात्सुपुल, ।ऽ गल्लोप श्चावाप्योरूहसर्गयोः पक्षेटाष्वहलन्तानाम व्यमत्वात्तदव्ययम् । इत्यव्ययानि समाप्तानि ।

रामो माता मत्पिता रामचन्द्रः स्वामी रामो मत्संखारायवंशः ।
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं जानिनौव जानेन जाने ॥
(! ना जानको नैव जाने)

COLOPHON :

इति विद्वच्छिरोमणिश्रीमदन्वर्थयतीशाभिधार्मिस [धास्म] द्गुरू विनिर्मितशब्दसारटीकायां व्युत्पत्तिचिन्तामणावाख्यातवृत्तिः सम्पूर्णा ।

x x x

OPENING :

4821/3240 सिद्धान्तकौमुदी-शब्दरत्नटीका

श्रीगणेशाय नमः ।

शेषविभूषणमीडे शेषाशेषार्थलाभाय ।
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः ॥१॥

ध्यायमिति ध्यात्वा ध्यात्वेत्यर्थः, णमुलं तमेतत् परं सर्वजगदुपादानं कार्यब्रह्महिरण्यगर्भव्यावृत्तये इदं ध्यानं चिंतापर पर्यायं स्मृत्यनुकूलव्यापाररूपं स्मरणंन्तु तज्जन्यमिति विशेषः । गुरोरित्येकवचनेन सर्वविद्यालाभ एकस्मादेवगुरोरिति सूचितं । प्रौढानां मनो रमयतीत्यर्थिकां मनोरमां प्रौढत्वं सकलदर्शनार्थज्ञानपूर्वकं महाभाष्यगूढार्थ ज्ञानवत्वं इण ग्रहणेष्विति ।

CLOSING : समर्थनीयत्वादिति त्वयापीति शेषः । उत्वमिति निपातनादिति शेषः । प्रम्नरस्तमितमिति प्रयोगादि ति शेषः । कथंसङ्गच्छते इति एवं च ते चिन्त्या इतिभावः । चिन्त्यमिति चिन्ताबीजं तु हश्चछीहि कालयोरित्यत्र सामान्यग्रहणार्थं कित्वमिति । प्राचीनर्यथैरिति दीर्घोकित इति सूत्रस्थभाष्यादि ग्रन्थैरित्यर्थः । व्यवस्थितयेति छन्दसि सर्वविधीनां वैकल्पिक त्वादितिभावः । विकल्प व्यवस्थयेति; व्यवस्थितविकल्पोनेति यावत् ॥ इत्यष्टमः, ॥

COLOPHON : इति श्रीमद्दीक्षितभट्टोजि पौत्रदीक्षितवीरेश्वर पुत्रदीक्षितहरिविर-चिते लघुशब्दरत्नवैदिकी प्रक्रिया समाप्ता ।

Post-colophonic : संवत् १८४७ । शुभंभवतु ।

x x x

4843/3026 सिद्धान्तकौमुदी-टीकारत्नार्णव

OPENING :

श्रीगणेशाय नमः ।

जगतीन्दुर्गतिभीतां मार्गमितान्तमोष्ट तामेताम् ।
साध्वनुशासनयुक्तां घटयन् पद्मापतिः पायात् ॥१॥

शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं नमस्कारात्मकं मङ्गलं विघ्न-विधातार्थम् आचरन्नभिमतं प्रतिजानीते । मुनित्रयम् इत्यादिना ननु मध्य गुरु रूपस्य जगणस्य रोगदायकतया कथमस्य मङ्गलत्वम्: न च वर्ण्याभावात् न दोष इति वाच्यम् । वर्ण्यते नायको यत्र फलन्तद्गतमादिशेत् । अन्यथा तु कृते काव्ये कवेः दोषावहं फलं इत्युक्तेः । न च यावत्काव्यलक्षणाभावादन्नेदं काव्यमिति वाच्यम् । हीनाङ्गेषु यथा तवेदं शरीरं 'दुष्टमित्युच्यते न तु शरीरमेव' नेति । एवं दुष्टस्यापि काव्यत्वे, बाधकाभावात्, कविकर्म हि काव्यम् । मैवम्, मुनि-पदोपदानेनात्रादोषात् । तदाहुः देवतावाचका ये च भद्रादिवाचकास्ते सर्वे नैव दूष्यास्स्युः गणतो लिपितोपि चेति । वेदादि-अर्थज्ञानमुनयः मतेरूच्चेत्युकारा-देश औणादिक इकारः प्रत्ययः तपरत्वान्न लघूपधगुणः ।

COLOPHON :

इति श्रीदेवदत्तात्मज रामसेवकतनूद्भवाचार्य कृष्णमित्रकृते रत्नार्णवे संज्ञा । प्रकरणं समाप्तिमगमत् ।

CLOSING :

छत्रादिभ्योऽणित्येव सूत्रमस्तु किमनयाकु सृष्टयेत्यन्ये चौरीति चुराशीलमस्या, न च स्रज् स्त्रैणी पौ स्नो स्त्रीपुंसाभ्यां नञ्स्नञ: शाक्ती कीति शक्ति: प्रहरणमस्या: आढाकरणीति अनाढच आढच: क्रियतेऽनया ननु वयसि प्रथम इत्येवसिद्धेतरूणतत्तु न शब्दयोर्ग्रहणं व्यर्थं । मैवम्, गौरादि पाठात्प्राप्तस्यऽङ्षीषो बाधनार्थं पुनरत्रौपादानात्, पक्षे ङीष् तु भवत्येव तेन गौरादि पाठो व्यर्थ: । मजस्व योगविभागउत्तरार्थ: प्राचांष्फतद्धिते इत्यत्र यञ् एवानुवृत्तिर्यस्मात् हलस्तद्धितस्य यत्नोयेऽल्लो पस्याच्छायत्वेनासिद्धत्वा-दुपधाया इत्युक्ति: । श्री ।

Post-Colophon :

सम्वत् १९१२ आषाढ़ प्रथम शु० एकादशम्यां चन्द्रवासरे पठनार्थं । श्रीमन्महाराजविनयसिंहराज्ये लिखितं शिवरामेण मौजपुर मध्ये ।

x x x

4848/3222 सिद्धान्तकौमुदी टीकाफक्किका-प्रकाश

OPENING

श्रीगणेशाय नम: ।

सदास्यभास्पंकजालि हरिं हृदयपंकजे ।
सिद्धान्तकौमुदी गूढ-फक्किकार्थ: प्रकाश्यते ॥१॥

गर्गवंशावतंसो यो वैयाकरणकेशरी ।
उपाध्यायोयनामेंद्र दत्तस्तस्यैष का कृति: ॥२॥

एतदेकमाचार्य्यस्य मङ्गलार्थं मृष्यतां माङ्गलिक 'आचार्यो' महत शब्दशास्त्रोद्यस्य मङ्गलार्थं वृद्धिशब्दमादित: प्रयुक्ते मङ्गलादीनि हि मङ्गल-मध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरूषकाणि च भवन्ति आयुष्मत्पुरूषकाणि च अध्येतारश्च वृद्धियुक्ता यथास्युरिति भाष्यमस्यां पाणि-न्यनुक्तायां चतुर्दशसूत्र्यामसमंजसमाम्नाय समाम्नायशब्दयोर्वेदे विदित्त्वा-त्तस्यामक्षरसमाम्नाय इत्युद्दोषासंगतिश्चेत्यत आदेति माहेश्वराणीति । इमानि माहेश्वरादागतानि इत्यर्थ: ।

CLOSING :

अत्र कैयटः व्रश्चेति षत्वे प्राप्ते कुत्वस्य स्वः वावसान इति चर्त्वेन क पूर्वत्रासिद्धमित्यत्वं षत्वे कुत्वस्य नास्ति प्रत्ययग्रहणसामर्थ्यात्षत्वापवादत्वात्कुत्वस्येन्याचष्ट तदाहषत्वेत्यादि। तस्यायमभिप्रायः किं कुर्यात् इति न्यासेन दृष्ट इत्यव्यहारेण च बहुव्रीह्यर्थलाभे सिद्धे प्रत्ययग्रहणमन्यपदार्थे वीप्सा गभहुव्रीह्यर्थलाभार्थं तेन विशिष्य तादृक् छंदादिविषयफलक्षणोपवनेन तादृक्शब्दविषये षत्वप्राप्त्याषत्वस्यापवादकवत्वान्निरवकाशत्वादिति। अयमेवाशयो हरदत्तमिश्रादीनामपि बोध्याः। इदञ्च मतं भाष्य विरुद्धं प्रत्ययग्रहणस्य बहुव्रीह्यर्थमात्रफलकताया एवात्रोक्तत्वा..... (अपूर्ण)।

x x x

4856/3122 कातन्त्रटीकामन्त्रप्रकाशः

OPENING :

श्रीगणेशाय नमः।

शेषाशेषफणामणिव्यतिकरे कांताकृतिं बिबितां
पश्यन्ती रहसि स्थितापि परिषद्भ्रात्या यियासुर्मुहुः।
या प्रौढापि नवं समागमरसं भावैः समातन्वती,
श्लिष्टागाढमुरःस्थलेन हरिणा लक्ष्मीः 'श्रिये' सास्तु वः ।।१।।

त्रिलोचनख्यातमभिन्नदुर्गं,
सार्वं नमस्कृत्य विविक्तविद्यम्।
कातन्त्रमन्त्रार्थविनिश्चयार्थे-
मयं प्रयत्नः क्रियते शिशूनाम् ।।२।।

दुर्गत्वमुन्नीय स पञ्जिकायाः
वृत्तेर्विवेके विजयः प्रवृत्तः।
विवेचयंस्तद्वचनानि वाग्मी
स्वयं पुनर्दुर्गतमो बभूव ।।३।।

ततस्तमायुक्तिभिरुक्ति मुक्ता
विविक्तपञ्जि क्वचिदप्यमुख्यम्।
संयोजयिष्ये निजगीर्गुणेन
मनां हृदि श्रीमति संश्रयाय ।।४।।

त्रिलोचनाचार्यवचः प्रसादाद्,
दुर्गस्य वृत्तिः सुगमा य दीयम् ।
क्वचित्क्वचिन्मे वचसोऽवकाशः
शिलोञ्छवृत्या घटते तथापि ॥५॥

अभूत्किलाम्भोरुहभूप्रभूते,
कायस्थवंशे धरणीव तारे ।
विश्वोपकारव्रतरक्षणेन,
श्रीमेघनामा धृतमेघधामा ॥६॥

महोपकारोत्र महोदयश्च यशश्च भूवल्लभवल्लभत्वम् ।
इत्याद्यतोसौ (बहु) वैद्य विद्यामनेकविद्याधिगमे कृतेऽपि ॥७॥

जातस्तत्तनयस्त्रिलोचन इति ख्यातस्त्रिवेदी विदा-
माधारो (गदनिग्रहात्त्रि) भुवनप्रख्यातकीर्त्तिव्रजः ।
त्रैवर्गीसमुपासनामभिदधच्चित्तं त्रिनेत्रे दधद्,
यः शास्त्रेण वृथा दयाधिकतया स्वं नाम सार्थं व्यधात् ॥८॥

तस्यात्मजः समभवत्कुलशीलशाली,
बोधैकविद्यो ..... ।
भक्त्या गदाधर पदाधरवर्त्तिमूर्धा,
नाम्ना गदाधर इति प्रथितप्रकर्षः ॥९॥

येनातुरतरदेहा दधरयता सपदि विषमगदं जातानि ।
.....वैद्यसमूहे प्रगीतसद्यशसा ॥१०॥

पुत्रस्तस्माजनि.....सम्प्रदाता,
व्याख्या.....पृथगपि वहन् भूधरो धीरधैर्यः ।
योऽभूत् स्थैर्यव्यथितजनितोल्लाघतासंविधानाद्,
धर्मोद्रेकादपि च जनयन्न त्वयं नाम विश्वे ॥११॥

अमुष्मादुद्भूतो मम इव वपुष्मान्नियतिमान्,
सुधाधामेवाब्धेर्जगति भवनाथस्तुतकथः ।
पितृभ्यामाराध्य त्रिभुवनगुरू (श्राप्य) धिगत-
स्ततस्तस्मादासीत् प्रथित पृथुकीर्त्तिर्दिशि दिशि ॥१२॥

आकृतिनामतत्त्वज्ञ धन्वन्तरिसमक्रमः ।
यशोधनो यः सुखिनीश्चक्रे तात्कालिकाः प्रजाः ॥१३॥

विद्यां विश्वजनीनां परम्परीणां वहन्नपि प्रगुणाम् ।
शब्दागमसदलंकृति साहित्यैकाश्रयो योऽभूत् ॥१४॥

साहिस्त्रीमहमूत्ततो वसुमती चक्रैकशक्राद्गुण-
ग्रामैस्तोषित चेतसोऽधिगतवान्सत्कारपूर्वां श्रियम् ।
.....सुरसरिस्कूलेकरे पत्तने,
भेजे यस्त्रिगणं विभज्य समया भक्त्या सुमित्रान्वितः ॥१५॥

तत्तनयः श्रितविनयो विधृतनयः सुकृतविसंशयस्थिरधीः ।
अभ्युन्नतनिजवंशप्रदीप इव देवनाथोऽभूत् ॥१६॥

पुण्यश्रियां तत्फलमाशिषां वा, सच्छ्रोत्रियाणां परितोषितानाम् ।
श्रीभावनाथेन सु(तस्य लेभे वयोधिकेन द्युतिमत्सु जन्म) ॥१७॥

जितेन्द्रियोऽसौ भविता पदच्युतैर्नृपैरपि स्वस्थितयेऽर्थनीयः ।
देवाज्ञया तैरिति निर्मितेन, यो देवनाथत्वमियाय नाम्ना ॥१८॥

गुणैरनूनैः स्ववशीकृतस्य, हुसेनसाहेः सचिवत्वमेत्य ।
गवां द्विजानामपि यः शरण्यो,भग्नान्प्रतिष्ठापयति स्म राज्ञः ॥१९॥

यस्तन्वन्प्रतिधत्वं दिशि दिशि सरसीः शुचिरपः सृजति ।
पथि पथि भक्तिविशेषैः परिपूर्णां बन्ध्यपां [र्णावाप्रपा] व्यतनोत्॥२०॥

आरामैरभि रामान्ग्रामान्यः पात्रसात्कृतवान् ।
सुचिरं सत्त्रमलानीद्वारारण्स्यादितीर्थेषु ॥२१॥

गवां सहस्रं (य) दत्तं श्रोत्रियैरूप (भु) ज्यते ।
दत्वा प्रत्याददानस्तु सूर्योऽस्तं याति किं हि या ॥२२॥

बलिप्रभृतिभिर्दत्ता विष्णवे मृ (न्म) यी मही ।
सैव स्वर्णमयी रोमप्रश (हेमप्रस्थ) शैलवनान्विता ॥२३॥

ब्रह्माण्डं यो व्यतरदखिलं श्रोत्रियेभ्यो विभज्य,
स्थायीभावादिव य.....तो यद्यशोगण्डमैच्छत् ।
हैमं शैलं सुरविटपिनं कामधेनुं च दत्वा,
तत्स्वामित्वादिव शतमखं प्रोचुरन्ये प्रतीष्ठम् ॥२४॥

यस्य द्वारोपान्ते भूपा निजपदविरहगलितगुरुगर्वा-
स्तिष्ठन्तं स्वं राज्यं लब्ध्वा यदुचितविरचितपरिचितहर्षाः ।
जायन्ते किंवान्यद्येन क्वचन वचनमथ न वितथमुक्तं,
शत्रूणामप्यन्तः कालं मधुरमकटु बहु विनियुक्तम् ॥२५॥

(गोमूत्रिकाबन्धोऽयम्) ।

देवनाथो लसत्कीर्त्या स्तृणाति जगतां त्रयम् ।
अवभृथोच्छवसन्मूर्त्या प्रीणाति जगतामयम् ॥२६॥

पुत्रा यदीया षडमी पवित्रचरित्रचित्रीयितविश्वभागाः ।
सौभाग्यभाग्योपचयैरनूनाः सत्कीर्तिमूर्तिस्थितिनीतिभाजः ॥२७॥

शिवनाथो रघुनाथो रघुरिव वंशोन्नतेः कर्ता ।
सोम इवातिद्युतिमान् ख्यातः श्रीसोमनाथश्च ॥२८॥

श्रीवारनाथोपि रणे प्रवीरो, धन्यो वदान्यः सुकृती कृती वा ।
श्रीवादिनाथश्च तथादिनाथो, वृत्ताद्यनाथस्मृतिचारुचित्तौ ॥२९॥

स देवनाथः स्फुटमेव यस्य, यश्चाप्यमी नन्दनकल्पवृक्षाः ।
श्रीराघवाद्याः मणिमण्डिताङ्गाः, शाखाभृतोभीप्सितमृत्सृजन्ति॥३०॥

भ्रातुः कनिष्ठस्य पदेऽभिषिक्तो, यद् गोपिनाथोपि परोपशान्त्यै ।
ततोपि व्यञ्जितधीर्मघोनः, सख्यं न नाम्ना भुवि कर्मणापि ॥३१॥

पुत्रपौत्रीणभावेपि योभ्यमित्रीणतां रणे ।
दधद् विद्यासु पारीणोप्यमूदध्ययनप्रियः ॥३२॥

कलापके व्याकरणे गभीरे संदेहसंदोहमपोहयिष्यन् ।
निन्बधमेतं बहुयुक्त्युपेतं सोऽचीकरत् कर्मधरेण तेन ॥३३॥

यशोधरायणो योऽसौ लक्ष्मीधरसुतः (कविः)।
यः कृती याज्ञरूपेयः श्रोत्रपेयवचोकृतः ॥३४॥

यशोधर-लक्ष्मीधरयोश्च निजकीर्त्तिपद्यान्यद्यापि श्रूयन्ते-
श्रीरुद्रसिंहस्य निदेशवर्त्ती, यशोधरः शाब्दिकचक्रवर्त्ती।
कवित्ववक्तृत्वकलानिवासी, जागर्ति भूमौ नवकालिदासः ॥३५॥

द्राक्षादक्षा नकक्षामनुभवितुमलं काकला काकलीनां,
कोमल्ये कोकिलानां विधुरुचिररुचिर्द्रांङ्मुधामूत्सुधापि।
वीणा प्रावीण्यहीना मधुरिमधुरया हापि हैयङ्गवीनम्,
यस्यां याशोधरी सा जगति विजयते भारती भारतिभ्याम् ॥३६॥

मधुरिमगुणगर्भवैदर्भसन्दर्भसर्वस्वगीः,
कलितसकलशब्दमर्मागमः शर्ववर्मा न किम्।
रसमयमृदुगद्यपद्यानवद्यः स लक्ष्मीधरः,
प्रभवति वरवैरिवर्गाधिसर्गान्निसर्गार्चितः ॥३७॥

वाररुचं परिशिष्टं टीकामपि वार्थमानिकोपेताम्।
विद्यानन्दप्रभृतीन् समीक्ष्य चिरमेष यत्नो मे ॥३८॥

हे धीराः श्रृणुतावधाय विदधे नत्वाञ्जलिं मूर्धनि,
तत्कालस्थमपास्य हास्यमिह संधेयं निबन्धे मनः।
किं वा किं विनयोत्करेण यदि वः कातन्त्रमोमुष्णुता,
तत्सेव्यो भवितायमेव यदि वा स्वार्थोपि[स्वार्थोपि]मालभ्यते॥३९॥
द्वयमेतदसम्बद्धं खलता सुमनस्विता।
किन्तु सम्भाव्यते क्वापि खलता सुमनस्विता ॥४०॥

इति करणकुलालङ्करण श्रीदेवनाथसमादिष्टकूर्मधरविरचिते कातंत्रमंत्र-प्रकाशे संधिपादः समाप्तः।

CLOSING : इति कारुत्वं तेषां नास्तीति सेनेत्यादि, हस्ति नर च, अश्वाश्चेति विग्रहः बहुत्वादन्यत्र हस्त्यश्वाविति। वक्ष्यति क्षुद्रजन्तव एव क्षुद्रजन्तुकाः कृत्वेकः कुत्सायां वा क्षुद्रजन्तुकाश्चफलानि चेति। विग्रहा बहुत्व इत्यनुवर्त्तते, तेन यूकाश्च लिक्षाश्चेति विग्रहः, यूका च लिक्षा चेत्येकत्वे न भवति व्यंजनात प्राग्बहुत्वाधिकारो ज्ञेयः। अपचितपरिमाण इह क्षुद्रो गृह्यते मत्वंगहीनः, कृपणास्तण्डुलावयवश्चेति, तत्र क्षुद्रे स्मृतिभेदः अनस्थिकाः प्राणी न, इत्येकेमांसशोणितरहिता इत्यपरे सहस्त्रेणाषायमञ्जलिः पूर्यते.....।

OPENING:

4910/3254 शब्दबोध

श्रीगणेशाय नमः ।

स्वनतसुरगणमुकुटजटितबहुनानोच्चावचमणिकिरणैः ।
चित्रकान्तिमदशेषदुरितभयनाशि देवचरणं वन्दे ॥१॥

कमठवीरवरस्यमहीपतेरलवराद्युपलक्षितनीवृताम् ।
ब्रिनयसिंह महायशसः कृते, क्रियत एष सुशब्दज बोधकृत् ॥२॥

स्वल्पायासाद्बहून्शब्दान् बोधयत्यवलोकनात् ।
ततो ग्रन्थस्य नामास्य शब्दबोध इतीर्यते ॥३॥

संकेतो योऽनुभूत्युक्तो यश्च भगवत्पाणिनेः ।
प्रयोगसिद्धावनयोर्यः ऋज्वर्थः संगृह्यते ॥४॥

CLOSING :

राज्ञां ख्यातिमतां हि कच्छपतयाश्रीर्यत्र संराजते,
श्रीमानालवरो द्विषां स विजयी शार्दूलविक्रीडितम् ।
तस्य श्रीविनयेशभूपतिलकस्याज्ञावशादुद्धृतः,
सारो व्याकरणस्य तेन भगवान्श्रीशङ्करः प्रीयताम् ॥१॥

COLOPHON : इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगौरीशंकरशिष्यश्रीविरजानन्दकृतः शब्दबोधनामव्याकरणसंक्षेपसंग्रहः ॥

x x x

4911/3049 संस्कृतमञ्जरी

OPENING : श्रीगणेशाय नमः

अथ संस्कृतमञ्जरी लिख्यते ।

आनन्दमानन्दकरं प्रसन्नं,
ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीशं भवरोगवैद्यं,
श्रीमद्गुरुं नित्यमहं नमामि ॥१॥

लक्ष्मीनारायणं नत्वा, कुर्वे संस्कृतमञ्जरी ।
वैष्णवोद्धवदासोऽहं स्वस्त्यां बालकृते बुधः ॥२॥

CLOSING : प्रातःकाले उत्थाय श्रीमन्नारायणस्य चरण चिन्तनं क्रियते । पुनः दन्तधावनादि क्रियते । पुनः ग्रामे भिक्षाटनं क्रियते । पुनः पाकादि क्रियते । पुनः गुरुनिकटे गत्वा अध्ययनादि क्रियते । एवं श्रीवैष्णवानां पद्धतिरस्ति ।

व्याकरणं विनाप्यत्र बालबोधः प्रजायते ।
तस्मात् क्षाम्यन्तु कवयो मम जाड्यं तु सर्वदा ॥१॥

वैष्णवोद्धवदासेन कृता संस्कृतमञ्जरी ।
गृह्णन्तु पण्डिताः सर्वे बालव्युत्पत्तिसिद्धये ॥२॥

इति श्रीव्यवहारप्रकरणम् ।

COLOPHON : इति श्रीश्रीनिवासाचार्यशरणागतश्रीराघवदासशिष्यश्रीउद्धवदास-वैष्णवकृतौ बालसंस्कृतमञ्जरी संपूर्णा ।

Post-Colophonic: शुभमस्तु श्रीकृष्णाय नमः । मिति भाद्रवा सुदि तृतीया-संवत् १८०८ लिपिकृतं प्रागदासेन पठनार्थं ठाकुर चतुरसालजी । शुभमस्तु । लेखकपाठ-कयोर्मङ्गलं भवन् ।

x x x

4935/6234 कारकप्रक्रिया टी. बालबोधिनो

॥ श्रीगणेशाय नमः ॥

OPENING : अथ विभक्त्यर्थप्रक्रिया निरूप्यते । प्रथमविभक्तिर्लिङ्गार्थवचने *लिङ्गार्थमात्रकथने प्रथमा विभक्तिःस्यात् । हरिः, लक्ष्मीः फलम् आमन्त्रणे च* आमन्त्रणेप्यर्थे प्रथमा स्यात् । हे देव । हे देवौ । हे देवाः ।

CLOSING: सर्वनाम्नो हेत्वर्थैश्च द्वितीया। हेत्वर्थैर्योगेसर्वनाम्नो द्वितीया वर्ज्जिताः सर्वा विभक्तयः स्युः। को हेतुः, केन हेतुना कस्मै हेतवे कस्माद् हेतोः, कस्य हेतोः कस्मिन्हेतौ एवं किङ्कारणम् इत्यादिः।

अत्राधिकानि सूत्राणि पाणिनेः सम्मतानि च ॥
चान्द्रास्तु नाद्रियन्त्येव विवक्षा बलमाश्रिताः ॥

COLOPHON: इति श्रीमन् मिश्रभावविरचितायाम्बालबोधिन्यां प्रक्रियायां कारक-प्रक्रिया समाप्ता संवत् १८६८ चैत्रसुदी १५।

x x x

4940/3135 वाक्यवादटीका वाक्यदीपिका

OPENING: ओं स्वस्ति श्रीगणेशाय नमः।

सुप्तिङन्तं च यो वाक्यमिति प्रमाणानुसारेण सुबन्तचयत्वे सति तिङन्त चयत्वस्य मिलितस्य प्रत्येकं सुबन्त चयत्वादेर्वा वाक्यस्य लक्षणत्वे परस्परमव्याप्तिः। पदसमूहत्वमित्यस्य गौ, पुरुषो, हस्तीत्यादावति-व्याप्तिरित्याशयेन पृच्छति। अथेति इदं लोके प्रसिद्धं वाक्यं वाक्यपद वाच्यम्।

अथ किमिदं वाक्यं नाम एक तिङ् वाक्यमिति भाष्यात् ॥ एक तिङन्तार्थ मुख्यविशेष्यकबोधजनकपदसमूहो वाक्यमिति वैयाकरणाः, तेन पचति भवतीत्यादौ मृगो धावतीत्यादौ च क्रिया पदस्यानेकत्वेपि नैकवाक्यता व्याघातः नहि क्रिया विनिर्मुक्तवाक्यमस्तीति भाष्यात् ॥

CLOSING: तत्परामर्शानुपपत्तिरिति भावः स्ववत्क्षणत्वव्यापका विद्यात-त्प्रयुक्तदृश्याश्रयकालपूर्वत्वाभावकशुद्धा चिज्ज्ञानभिरस्तु विपरीतभावनीभूत-श्रीमद्धरानिर्मितवाक्यदीपिका समाप्तिमगमत्।

4957/3317 अभिधानचन्द्रिका

OPENING:

। ओं नमः श्रीरामचन्द्राय ।

ब्रह्मेशानसुरेन्द्रवन्दितपदं नीलाम्बुदश्यामलं,
रत्नोद्भासिकिरीटकुण्डलधरं कोदण्डबाणौर्युतम् ।
भक्तिप्रह्वजनेषु भूरिकृपया स्मेराननाब्जं सदा,
सीतालक्ष्मणवायुसूनुसहितं श्रीरामचन्द्रं भजे ॥१॥

गुरुचरणयुगं प्रणम्य मूर्ध्ना, जडताध्वान्तविनाशने पटीयः ।
विविधमतिविकासनैकहैतुं, क्रियते खल्वभिधानचन्द्रिकेयम् ॥२॥

द्रुमभेषजपुष्पसंज्ञितैः, श्रीखण्डादिसुगन्धिभिस्तथा ।
कनकादिकधातुभिः पुनर्धान्यप्राणिखरादिनामभिः ॥३॥

अनेकदेशान्तरभाषितेषु,
सर्वेष्वथ प्राकृतसंस्कृतेषु ।
गूढेष्वगूढेषु च नास्ति संख्या,
द्रव्याभिधानेषु तथौषधेषु ॥४॥

CLOSING :

पुनर्नवादिकाद्यैश्च श्लोकार्द्धो पञ्चकौ स्मृतौ ।
द्राक्षाकर्णजखर्जूरफलानीयं फलत्रिका ॥३१॥

COLOPHON :

इति अभिधानचन्द्रिकायां मिश्रश्रीभीमसेनसंगृहीतायां धरादिवर्ग्योऽष्टमः प्रकाशः ।

Post-Colophonic :

पूर्णा चेयं अभिधानचन्द्रिका । संवत् १७२१ ।

शुभमस्तु ।

x x x

5001/3282 काव्यलक्ष्मीप्रकाशः ।

OPENING

। श्रीगणेशाय नमः ।

यद्भालनेत्रशोभाप्त्यै गोपीचन्दननिर्मितम् ।
स्वीचक्रे तिलकं कृष्णः स मां पातु त्रिलोचनः ॥१॥

श्लोकेऽर्धे यजौक्रमादङ्घ्रयोः साम्याभेदे तु मीलितम् ।
सौन्दर्यगर्वतद्गर्वानालक्तोऽप्रीक्षितोऽधरे ॥२॥

CLOSING:

वसुग्रह यतिर्लगौम्न्परनोथ पृथ्वी हि रौ,
बहु त्र 'यदि' चैककोभिहित एष पर्यायकः ।
कथं न समुपागतः स्मरति येति सोत्काप्रियः ।
प्रियो ममरिपोर्गुरोर्वशगतो न ते नागतः ॥१६॥

मन्दाक्रान्ता जलधिषडगैर्मत्साद्विरः (?) श्री मुखांते,
वैदग्ध्यं चेचरति पुरुषः कर्मणा तद्विदग्धः ।
संधानेस्यादपरजनकैमंन्त्रगुप्त्यैनुयुक्ति-
दृष्ट्वास्वानाऽलिखदरमहो लिख्यमानाकरेऽब्जम् ॥१७॥

नारीस्ताः सप्तको तगो रविनगैः शार्दूलविक्रीडितम्,
शुद्धापह्नुतिरन्यनिन्हुति परं धर्मान्तरारोपणम् ।
मानानादृतनायकापरवधू सेर्ष्याङ्गना मानिनी,
न त्व सा दयिता मम स्मरहरप्राणा प्रिया दृश्यसे ॥१८॥

म्मौयोलाः पञ्चयाः स्युर्मुनिकृतयतियुक्स्रग्धरा भिन्नहेतो-
रुक्तो स्वाकारगुप्तौ कविवरकथिता व्याजपूर्वोक्तिरेषा ।
सा गुप्तायां स्वकीयं तिरयति सुरतं त्रिप्रकारं स्वयुक्त्या
श्रान्ता मां विद्धि शंभोर्जलहरणवशाद्विल्वयोगात्सचिह्नाम् ॥१९॥

काव्यानि पञ्चनुतयोपि च पञ्च संख्याः,
टीकाश्च सप्तदश चैक उणादिकोश ।
भूपालभूषणमथो रसरत्नहारो,
विद्याविलास इति पूर्वसरत्फलाद्याः ॥२०॥

ग्रन्थान्मया विरचितान्परिशीलयन्तु, शीलान्विता सुमनसो [मनसो] मुदे मे ।
यद्वह्निशोधितमनल्परुचासमेतं, जाम्बूनदं भवति मूल्यविशेष-लभ्यम् ॥२१॥

परिश्रमोव्याकरणे काव्यादावणि कृतः ।
सव्या [सा] दिगियं तस्य शिवरामेण दर्शिता ॥२२॥

COLOPHON:

इति श्रीशिवरामकृतिः काव्यलक्ष्मीप्रकाशः सम्पूर्णम् ।

CLOSING :

5004/3273 छन्दोदीपिका

श्रीगणेशाय नमः ।

सुन्दरमरविन्दद्युतिवृन्दारक वृन्दवन्द्यसुखकन्दम् ।
शिरसा मुकुन्दचरणद्वन्द्वं वन्दामहे नित्यम् ॥१॥

वाजपेयिजयगोविन्दानुजपुरुषोत्तमस्य चरणौ वन्दे ।
आचार्यस्य कविमण्डनजस्य यशो बहुविततं धरणौ ॥२॥

माधवपण्डितराजं रुद्रणशिष्टं मनीषि बलभद्रम् ।
मधुसूदनकविपण्डितमुख्यान् प्रणमामि पूर्वभवान् ॥३॥

हरिवंशजं चतुर्भुजपौत्रं बुधरुद्रणस्य नप्तारम् ।
श्रीमत्पितामहम ..... नौमि ॥४॥

कृत्वा पूज्यपितृव्यवेदमणिपत्पद्मप्रणामं तत-
स्तातश्रीहरिवल्लभस्य चरणौ नत्वा तथान्यान् गुरून् ।
ग्रन्थान् शंभुहलायुधप्रभृतिभिः श्रीवाजिपेय्यादिभिः,
सृष्टान् वीक्ष्य वदामि वृत्तरचनामाचार्यसूत्रक्रमात् ॥५॥

श्रीवत्सगोत्रजनिना कुमारमणिना, निजेष्ट तुष्ट्यर्थम् ।
अनुजस्य वासुदेवस्यानुमते संग्रहोऽग्राहि ॥१॥

नात्र काचन विचारचातुरी नैव कापि रसवस्तु माधुरी ।
बालबोधकृतये कृतं मया, शोधयन्तु सुधियो दयामयाः ॥२॥

अभ्रेण वेदाङ्गयुतेन युक्ते, वर्षे पयोराशिशशाङ्कशक्ते । १७६० ।
जातं तथा भाद्रवलक्षपक्षे मास्य [भास्व] तिथौ पूर्णमिदं
शुभेर्क्षे ॥३॥

COLOPHON :

इति छन्दोदीपिकायां गद्यप्रकरणं नामाष्टमः प्रकाशः ।

OPENING :

5021/3270 वृत्ताभिराम:

श्रीगणेशाय नम: । श्रीसीतारामाभ्यां नम: ।

श्रीमत्सीतारमणं सुरनुतचरणं जगत्त्रयीशरणम् ।
प्रणताभीतिवितरणं निरूपमकरणं नमामि भवहरणम् ॥१॥

करुणार्द्रीकृतनयनं, सुहसितवदनं, स्मरादिरिपुदमनम् ।
दासमनोमलशमनं निजमुखदशनं स्वदैशिकं वन्दे ॥२॥

श्रीपिङ्गलाद्युक्तलक्ष्म, छन्दोज्ञानस्य सिद्धये ।
वृत्ताभिरामनामाऽयं ग्रन्थो रामेण रच्यते ॥३॥

छन्दोज्ञानं विना काव्यमुपहासास्पदं भवेत् ।
वृत्तलक्ष्म ततो ज्ञेयं काव्यज्ञै: रसिकै: सदा ॥४॥

CLOSING :

पञ्चाध्यायनिबन्धोयं, तस्मिन्नामे तु परिमात्रामेरुरयम् ।
भाषा मात्रा छंदो वक्रं, द्वितीके गुणमिते तु समवृत्तम् ॥१॥

अर्धसमं तु ये स्यात्प्रस्तारादिक्रिया तु पञ्चके ।
परिभाषातत्वमितायार्थाणां, नव च सप्तलघुसमके ॥२॥

लामन्यानि त्रीणि वक्रे पञ्च क्रमादथोक्ताद्या ।
एकैकमाद्य पञ्चसु पञ्चवै द्वै चायं चत्वारि ॥३॥

रूद्रा भूपा बुद्धया दश नव षट्-पञ्च षट् गजवेदा: ।
त्रीणि द्वे द्वे त्रीणिश्रुतयस्त्रीण्यश्विनौ दृशौ रुद्रा: ॥४॥

एवं षट् सप्तत्यायुक् छंद: शतमथो चतुस्त्रिंशत् ।
अन्त्या मिलिता संख्यास्मिन् पञ्च त्रिंशदधिकशतयुगलम् ॥५॥

श्रीमान्कृष्णात्रिगोत्रो. बुधवरमहितो, याजुषो रामसूनु,
र्योगी सिद्धेश्वराख्यो सकलहितकर: तत्सुतोरामचन्द्र: ।
ग्रन्थो वृत्ताभिरामाभिध इहरचितस्तेन शाकेरसाब्धि ।
क्ष्माभृद्भूसंमिते (१७४६) श्री रघुवरपदयोरर्पितस्तारणोब्दे ॥६॥

COLOPHON : इति श्रीमद्विद्वन्मुकुटालङ्कारहीरवरश्रीमत्सिद्धेश्वरसूरिसूनु-श्रीमद्राम-चन्द्रपण्डितविरचितो वृत्ताभिरामनामायं ग्रन्थः समाप्त ॥ श्री ॥

5034/2318 अलंकारमुक्तावली

OPENING : श्रीगणेशाय नमः ।

सन्मूलप्रकृतिः प्रकशितशतानंदो दधानः क्षमां,
कृष्णाद्यापि सुमन्तुनैकगुरुताशाली न यन्पूज्यताम् ।
सद्वृत्तिदधदात्मभूतनयतामारुन्धते यस्य ता-
माचार्याः प्रथमो गिरां विजयते विद्वान्स लक्ष्मीधरः ॥१॥

नानापक्षविभावनकुतुकमलङ्कारकौस्तुभे कृत्वा ।
सुखबोधाय शिशूनां क्रियते मुक्तावली तेषाम् ॥२॥

CLOSING : अप्पादेर्जयतां नवो लवणिमा सीदन्ति गात्रणि किं-
रज्यन्ते नहि मानसानि विषये प्रत्यग्निरुद्धात्मनाम् ।
धिग्वृत्ति मनसः स्पृहां तरलितां लम्ये तवायं मया,
प्रेयानित्यचलाधिराजदुहितुश्चिन्ताचिरं पातु वः ।

इह जगदंबिकायाः शिवदर्शने विस्मयश्रममतिनिर्वेदोत्कण्ठानां शबलत्वं कविनिष्ठगौरीविषयकभावस्यांगमिति सर्वं शिवम् ॥

ऋद्यावधानतरलामवदानवृत्तां,
मुक्तावली गुणगणैर्ग्रथितामनर्घैः ।
कण्ठे निधाय विबुधा.....वहन्तु,
शश्वत्सभाजनसभाजनभा-जनत्वम् ॥१॥

श्रीमन्महीमहिततत्तदसीमधीमन्,
मूर्द्धन्यताकलनसंगतधन्यताकः ।
लक्ष्मीधरोयमुदसूत मुदं प्रसूतां,
विश्वेश्वरस्य कृतिरस्य चिरस्य लोके ।
इत्यलंकारमुक्तावली समाप्ता ॥

संवद्विक्रमभूपस्यभूम्यब्धिवसुचन्द्रकैः ।
मिते शुचौशुक्लपक्षेकतिथौ पूर्णमालिखत् ॥

5065/2366 प्रस्तावचिन्तामणिः

OPENING :

श्रीगणेशाय नमः ।

वर्तिं चन्द्रकलां शिखां दिनमणिं दीपं सुवर्णाचलं,
रूपं व्यापकमात्मजस्य सहजं दृष्ट्याद्भुतं विस्मयात् ।
देवक्यानकदुंदुभेरुरुजुषः कृष्णस्य नीराजने,
चित्रं न्यस्तवदास्थितंदिशतु नः श्रेयांसि कंसे जिते ॥१॥

CLOSING :

राजानो रसिका बुधा बहुविधाः शिष्टा विशिष्टा जनाः,
भक्ता भागवताः पृथक्जनशतान्यन्येपि ये केचन ।
शिष्टं वेकर [नाम] मौनिकुलजाच्छ्रुण्वन्तु कौतूहलं,
दुर्गानन्दनचन्द्रचूडविदुषः प्रस्तावचिन्तामणिम् ॥

COLOPHON :

इति श्रीभट्टपुरुषोत्तमात्मजचन्द्रचूडकृते प्रस्तावचिन्तामणौ जातिवर्णनं नाम पञ्चमउच्छ्वासः ।

Post-Colophonic :

संवत् १९१३ आसाढ़ शुक्ला १२ गुरुवासरे ॥

5066/2279 रसकल्पद्रुम

OPENING

वन्दे तत्किमपि ज्योतिरतिचित्रं चिदाप्तये ।
यत्स्मृतेरेव भूयांसि तमांसि हरति द्रुतम् ॥१॥

आदर्शप्रतिबिम्बवत्त्रिगुणभागुत्पत्तिमध्यात्ययं,
कुर्वन्निर्विकृतिप्रतीतममलैः सत्वेन यद्योगिभिः ।
आस्ते सन्निहितं स्ववत्श्रुतिसुधी वाचामगम्यं सदा,
ज्योतिस्तत्परमं नमामि करणव्यापारपारे स्थितम् ॥२॥

नत्वा गुरुनिष्टदेवान्व्रज्यासारं करोम्यहम् ।
रसकल्पद्रुमं नाम ग्रन्थं ग्रन्थविदां वरम् ॥३॥

यद्यपि बुधाः पराभिर्व्रज्याभिर्नामितृप्तिमापन्नाः ।
आस्वादयन्तु चैनं ग्रन्थं ताम्बूलमिव तथापि ॥४॥

आद्यः सर्वमहीभुजां प्रतिभटध्वान्तैकधर्मद्युती,
राज्यश्रीनववल्लिवेष्टितभुजस्तम्भद्वयः सद्दयः ।
अष्टाशाकरिकर्णतालजमरुन्मूर्च्छत्प्रतापानलः,
क्ष्माभृन्मौलिसुलालिताङ्घ्रिरितमाद्दौलेतिनामाऽभवत् ॥५॥

त्रिभुवनजनगीतोद्दामचापप्रताप-
श्चरणकमलनम्रोत्सारितानेकतापः ।
अजनि करवरोच्चैर्मांसलस्कन्धपीठः,
सुतनुरसकखानः सूनुरस्मात्क्षतारिः ॥६॥

यद्दानन्तु जगत्प्रसिद्धमभवद्राज्यानि यद्याचका,
राजानः सुलतानशाहसदृशा ये चापरे मानिनः ।
यद्भृत्याश्च नृपा नृपास्त्वनुचरा यस्य प्रतापो रवि,
श्चन्द्रो यस्य यशोऽभ्युदेत्यसकखानासीद्गुणैः सोऽद्भुतः ॥७॥

अस्ति स्वस्तिकरः समस्तजगतीवास्तव्यलोकस्य यो,
ध्वस्ताः त्रस्तसपत्नमस्तकभरो लक्ष्म्यातिवास्तोष्पतिः ।
शस्तस्तुत्ययशा निरस्ततिमिरस्तोमो मनस्तस्ततः,
शास्ताखाननृपो विहस्तमतिभृच्छस्त्रास्त्रशास्त्रार्णवे ॥८॥

जानामि दानाय सुवर्णशैलं,
स्तवाय तावद्वचनानि वेधाः ।
शायस्तखानस्य यशः प्रताप-
समाय सोमद्युमणी ससर्ज्ज ॥९॥

तस्यानुरञ्जनायैव ग्रन्थं नवरसात्मकम् ।
चतुर्भुजो रचयति स्वपद्यैश्च परैरपि ॥१०॥

CLOSING : यन्नादृतस्त्वमलिना मलिनाशयेन किं तेन चम्पक विषादमुरीकरोषि ।
विश्वाभिरामनवनीरदनीलवेषाः केशाः कुशेशयदृशां कुशलीभवन्तु ॥

5074/2298 रसप्रदीप

OPENING : श्रीगुरुभ्यो नमः

स्वबिम्बम्बाकुचकुम्भबिम्बे,
विलोकमानंप्रतिबिम्बमानम् ।
प्रचण्डशुण्डं परितः क्षिपन्तं,
हेरम्बमालम्बनमाश्रयेहम् ॥१॥

कलयतु कल्याणचयं, रघुकुलतिलकः कुलोपास्यः ।
यस्य प्रसादलेशात्कपिभिरकूपारलङ्घनं विहितम् ॥२॥

पुरतः प्रविलोक्य भग्नचापं, परतः कामपिकामकार्मुकज्याम् ।
पुलकाञ्चितपीनबाहुदण्डं, रघुबालं कलये दशास्यकालम् ॥३॥

अभूत् कुलिकनन्दनः प्रथितवंशदुग्धाम्बुधौ,
सुधाकर इवाकरः किल कला कलापस्य यः ।
रमारमणभावनो भुवनबिन्दुवृंदारकः
बृजचन्द्रपुरन्दरो विबुधभट्टरामेश्वरः ॥५॥

तस्मादजायत जगत्त्रयगीतकीर्तिः,
श्रीभट्टमाधवबुधो बुधवृन्द वन्द्यः ।
सद्यः समुद्यदनवद्यसगद्य विद्या-
विद्योत्तमानधिषणो धिषणोपमेयः ॥६॥

सहस्रेणास्यानां फणिपतिरभूद्येन न समं,
यदा वक्तुं शक्तस्तदवधि स पातालमभजत् ।
पराभूतेर्भीतः सरसिजभवस्तिष्ठति ततो-
निलीनः कंसारेर्गहनतरनाभीसरसिजे ।।७।।

भाट्टे भट्ट इवापरः कणभुजः शास्त्रे कणादः स्वयं,
साक्षादक्षपदो मतेक्षचरणः पातञ्जले प्राञ्जलः ।
ख्यातः सांख्यमते चिरं गुरुमते सिद्धान्तदीक्षागुरु-
र्ज्यायांस्तत्तनुजो विभाति भुवनेश्रीविश्वनाथः कृती ।।८।।

ततः कनीयान् रघुनाथनामा,
विद्वत्सु वन्द्योस्य सुतश्चकास्ति ।
ततः कनीयानहमस्मि जातः,
प्रभाकरो राघवपादसेवः ।।९।।

चापलेन तनुते रसिककानां,
प्रीतये किमपि कौतुकमेतत् ।।१०।।

विश्वनाथचरणाम्बुज भक्तिप्राप्त.....सन्मतिरुमापतिभक्तः ।

प्रवृत्तो दुर्ग्राहं ध्वनिरसविचारार्णवमहं,
विगाहुं यन्मूदस्तदिह सुमहासाहसविधौ ।
निराधारस्यारादभिमतविधौ कल्पलतिका,
जगन्मातस्तावत्तव चरणचिन्तैव शरणम् ।।१३।।

अश्रुतेऽपीह साहित्यदर्शने साहसं मम ।
निर्वाहयन्तु निपुणाः गुरुपादरजःकणाः ।।१४।।

ग्रन्थान्तराद् विशेषो यः स्यादस्मिन्नसौ तु गुणगृद्ध्यै ।
अवधार्यतां रसज्ञैरज्ञैरितरैर्नरैर्मम किम् ।।१५।।

CLOSING : कदाचित्पुनः लक्षणादिकमपि आस्ताम् का नः क्षतिः सर्वथा विलक्षण प्रतीति-उपपादनाय-अतिरिक्तवृत्तिस्वीकार इति निर्गलितोर्थ इति ब्रूमः । विस्तरेण चैयंवृत्तिरस्माभिरलंकाररहस्ये प्रसाधितेत्युपरम्यत इति शिवम् ।

श्रीमत्पुरारिपुरभेदनवासपूतः,
श्रीरामचन्द्रपदसारसषञ्चरीकः ।
श्रीविश्वनाथविबुधप्रतिपन्नविघ्नः,
श्रीमान्प्रभाकर इमं व्यतनोत्प्रबन्धम् ॥१॥

भवतु कृतिरियंविदेहपुत्री-
परिवृढपादपयोजयोर्मदीया ।
कठिनविपिनभूभिरेणुखेद-
क्षपणापटुः सरसामृतोर्मिधारा ॥२॥

व्योमाकूपारभूमीशगणिते खखत्सरे,
एकोनविंशवर्षेण प्रबन्धोयं कृतो मया ॥३॥

दोषापहाररुचिरो विमलो रससंचितः कोऽपि ।
विलसतु रसप्रदीपो यावत्कल्पंजगत्त्रितये ॥४॥

COLOPHON : इति श्रीमद्बिन्दुवृन्दारकवृन्दवन्दनीयपादारविन्दद्वन्द्वभूसुरपुरन्दर जगद्गुरुमहामहोपाध्याय भट्टभाधवतनुजनि भट्टभट्टारकोन्नीते रसप्रदीपे व्यञ्जनानिरूपणां नाम तृतीयालोकः । समाप्तोयं ग्रन्थः ।

x x x

5091/2287 शृङ्गारमाला

श्रीगणेशाय नमः ।

OPENING : अरुणिमरविनखचन्द्रं पावकभौमं बुधमणिभिः ।
सुरुचिचतुर्महिमगुरुकविवर्चं मंदगमवतु पदपङ्कजं देव्याः ॥१॥

CLOSING : संसारसर्पमुखमर्दनताक्ष्यरूपा
विज्ञानतापदलपादितमोहकूपाः ।
येषां कटाक्षकलिताः फलिता लसन्ति,
गङ्गे नमिभगुरवः सततं जयन्ति ॥३६॥

ग्रथ कविवंशवर्णनम् ॥
यनीपप्रस्थात्यरतस्तु [वनीपकस्थात्पुरतस्तु] मार्गो,
षट्क्रोशमध्ये हि घटोत्कचस्य ।
ग्रामो धरौण्डेति प्रसिद्धनामा,
पूर्वे स्थितास्तत्र पुरा मदीयाः ॥३४॥

श्रीविष्णुदत्तः स्वकुलाब्जभानु-
र्नारायणस्तत्तनुजो बभूव ।
कौशल्यगोत्रो यजुषामधीती,
माध्यंदिनीयो द्विजगौडजोशी ॥३५॥

तस्यात्मजोऽस्मादगमत्तु काश्यां,
षड्दर्शनी वैरिसपुत्रमन्त्री ।
दामोदरो वैद्यकग्रन्थकर्त्ता,
श्रीरामकृष्णस्तदपत्यमासीत् ॥३६॥

तुलसीमाधवगङ्गा-रामाख्या-स्तत्तनूद्भवाश्चासन् ।
माधवरामसुपुत्रो, हृदयराम, इति सुगीयते तनुजैः ॥३७॥

साहित्ये रसग्रन्थकृद्बुधवरस्तस्याङ्गजातः कवि-
र्बाबूराय इति प्रसिद्धिमगमद्वासी पुरे चार्गले ।
तत्पुत्रेण मया कृता रसमयी माला रसोपासकै,
र्जप्ता प्रापयितुं गुणैरपि युता कल्पा रसब्रह्मणि ॥३८॥

सुखलालेन सुकविना, रचिता, शृङ्गारमणिमयीमाला ।
कण्ठे सा रसिकानां, सगुणसुवर्णा विलासमातनुताम् ॥३९॥

सुधांशुव्योमवस्विदौ वर्षे ज्येष्ठासिते रसे ।
शुभा शृङ्गारमालेयं, रविपुष्ये समुस्फिता ॥४०॥

COLOPHON: इति श्रीमत्साहित्यशास्त्रानुभवरसिकगौडविप्रवरबाबूरायमिश्रसूनु-सुखलालमिश्रेण विरचितायां शृङ्गारमालायां संकीर्णवर्णनं नाम तृतीयं विरत्नम् ॥३॥

5094/2293 शृङ्गारामृतलहरी

OPENING :

सिन्धुसुताकुचकुंकुमपाटलवक्षः स्थलं किमपि ।
उपवीणितं च निगमैः सटाजटालं महः कलये ॥१॥

नरहरिबिन्दुपुरन्दरजनुषा विदुषाय सामराजेन ।
शृङ्गारामृतलहरी विरच्यते रसिकजीवातुः ॥२॥

CLOSING : अनुभावव्यभिचारिभावाश्च ग्रन्थान्तरेषूह्याः इह ग्रन्थगौरवान्न लिखितः ।

COLOPHON : इति श्रीकविकुलतिलकनरहरिबिन्दुपुरंदरकुलोत्तंसश्रीसामराजदीक्षित-विरचिता शृङ्गारामृतलहरी सम्पूर्णा ॥

x x x

5099/2363 साहित्यसुधासिन्धु

OPENING : श्रीगणेशाय नमः । वाग्विलासिन्यै नमः ।

उत्तालताण्डस्फुरदंघ्रिपातप्रजातपातालभुजङ्गकम्पम् ।
अभ्रान्तविभ्रान्तकपर्दजाल-विस्रस्ततालं कलये नटं तम् ॥१॥

उत्तालांघ्रिप्रपातस्फुटितवसुमतीरन्ध्रनीरन्ध्रनिर्य-
त्पातालाम्भः स्रवन्ती स्नपनसिमिसिमाकारिलालाटनेत्रम् ।
ऊर्ध्वव्याधूतभोगीश्वरवररचितायासनिश्वासरिङ्गद्-
गङ्गाकल्लोलजालं कलयतु विभवं घूर्जटेर्नाट्यलीला ॥२॥

चन्द्रचूडप्रियापांगसंदोहानन्दनिर्भरः ।
विदधाति कविः कोपि सुधासिन्धुं तरङ्गिम् ॥३॥

आस्ते धारासुराख्यं नगरमतिलसत्केशवोद्दामधाम-
प्रभ्राजत्कीर्त्तिपूरं विलसति स विधुर्यस्य गोदावरी सा ।

तत्रत्योऽनन्तदेवात्मज इह वसति मुक्तिपुर्यां स चक्रे [त्रिमल्ल-]
[चक्रे] तस्याङ्गजस्योल्लसति कृतिरियं विश्वनाथाभिधस्य ॥
प्रबलकर्कशतर्कविचारणोल्लसितकाव्यसुलक्षणलक्षिता ।
त्रिमरदेवतनूजविलासिनां, मतिमतां वितनोतु मनोमुदम् ॥

COLOPHON : इति श्रीत्रिमल्लदेवतनयविश्वनाथविरचिते साहित्यसुधासिन्धौ अर्थालङ्कारनिरूपणं नामाष्टमस्तरंगः ॥ समाप्तोयं कृतिरियं विश्वनाथस्य । ग्रन्थः ।

Post-colophonic :

कीर्तिशेषं गतेस्तैस्तैगुर्णैर्विक्रमभूभुजि,
ग्रहाम्भोधिरसज्योतिर्मिते संवत्सरक्रमे ।
एकादश्यां गुरौ स्वीयः सुधासिन्धुर्विलेखितः
पत्तने चंद्रचूडस्य विश्वनाथेन धीमता ॥

संवत् १९१४ वैशाखकृष्णा३तद्दिने पुस्तकं लिखितम् ।

x x x

5166/2524 लक्ष्मणोत्सवः

OPENING : श्रीगणेशाय नमः ।

प्रणतविबुधमौलिस्फाररत्नांशुगर्भा-
श्चरणनखरभासो भाति यो भक्तिभाजाम् ।
दददभिमतसिद्धयं [द्धिं] कल्पवल्लीरिवाग्र्याः [वल्लीवरम्यः],
स जयति गणनाथो दाननीरप्रसिक्तः ॥१॥

स्फूर्जन्मोहतमस्तिरस्कृतिरविर्विश्वांबुधेः सर्वदा,
पारे तिष्ठति यं स्पृशन्ति न जगद्बीजाम्बुदोषोर्मयः ।
साक्षात्पश्यति यश्च विश्वमखिलं तत्वार्थवाच्यं कवि-
स्तं वंदे प्रणताखिलार्तिशमनं सर्वज्ञमीशं परम् ॥२॥

नमोस्तु धन्वंतरये समस्त-
जगत्परा तं कतमस्सवित्रे ।
दिव्याङ्गनासंततयौवनश्री-
संपत्तिदायामृतसाधनाय ॥३॥

यस्मिन्मुदं चक्षुरिवस्मबद्ध-
सौधेषु कान्तार्द्धदनैः समत्वम् ।
व्रजत्यधः प्राप्तुमिवाकलंकं,
स्पष्टप्रकाशी सकलोपि चन्द्रः ॥४॥

तस्मिन्पुरे श्रीपथनाम्निबन्धे-
यशोविधुस्सद्गुणरत्नसिन्धुः ।
आस्ते शकेशो महमंदखानः,
शौर्यप्रतिक्षिप्तपराभिमानः ॥५॥

हर्म्येषु शून्येषु समीक्ष्य चित्र-
द्विपान्समाकुञ्चितनिश्चलाङ्गाः ।
पराक्रमे भान्ति यदीय वैरि-
पुरेषु सिंहा अपि चित्रतुल्याः ॥६॥

तत्सन्महीभृद्भुजमौलिमाला-
स्खलत्परागारुणपादपद्मे ।
तस्मिन्क्षितौ राजपदं दधाने,
ग्रन्थः कृतः श्रीमहमंदखाने ॥७॥

श्रीमत्पुरीसर्वजगत्प्रसिद्धा,
निवासलोभादिव यत्र विष्णुः ।
जन्माददे सर्वसुतीर्विहाय,
त्रैलोक्यवंद्या मथुरेतिनाम्ना ॥८॥

तस्यामशेषकुलपाल वयोभिरामः,
कायस्थवंशसरसीरुहकाननार्कः ।
कामाधिकोत्तमधनार्च्चितमार्गणाढ्यो,
भास्वद्गुणौघमहिमाक्षयनागनामा ॥९॥

तस्यात्मजो लोहडनामधेयः,
सच्छीललोकैर्हृदिसन्निधेयः ।
आसीत्सदासज्जननेत्रपेयः,
पुण्यात्ममध्ये प्रथमाभिधेयः ॥१०॥

तत्पुत्रः सहदेव इत्यनुगतः क्ष्मादेवसेवोऽभव-
द्विज्ञाने सहदेव एवकिमसौ सद्धर्मबन्धुस्सदा ।
लोकालोकविलोकनाथ विलसत्कीर्तिप्रदीपोऽखिल-
क्षोणीमण्डलमण्डने बलवज्जलेपानुकारोऽभवत् ॥११॥

सत्पूज्यः सहदेवसूनुरभवद्दामोदरो नामतो,
यो दामोदरपादपङ्कजरतस्कान्तद्विरेफः सदा ।
गाम्भीर्येण सरित्पतिं वितरणे कल्पद्रुमं धैर्यतो,
मेरुं देवगुरुं श्रिया च जितवान् यज्ञेश्वरं सम्पदा ॥१२॥

तस्मात्सहदेवादिव धर्मदेव-
श्चन्द्रो यथाऽभूत् क्षतनिष्प्रभेवः ।
सौन्दर्यसंतर्जितकामदेवः
सदा हृदिस्थापित [धा] मदेवः ॥१३॥

जातो यो धर्मदेवात्सकलगुणनिधिर्धर्मदेवादिवाभू-
त्पार्थाग्र्यं पार्थिवाग्र्याद्धरविविधमहारत्नसन्मानपात्रम् ।
सोऽजस्रं भूमिदेवार्पितविविधवसुधर्मवृक्षं सुमूलं,
चक्रे संकल्पनीरैर्दिविरकुलवरः खेतलः प्रोज्जितश्रीः ॥१४॥

रैपालस्तनयोस्पृश [स्यस] द्गुणगणोदंचद्यशोमण्डलो,
जातोऽसौ दिविरोत्तमः कविवरस्वांतैकतुल्यप्रभः ।
आवासोऽखिलसंपदामधिपदं धर्मश्रियामाश्रयः,
साधूनामवधिः समस्तसुहृदामास्थानकं सद्धियाम् ॥१५॥

तस्याभवद्गजपतिर्द्विजराजकान्तिः
पुत्रोऽपरः स्थिरयशाः स्थिरराजनामा ।
वासूक इत्यवरजः सुरविष्णुदासो,
लोकत्रयोद्धृतसुरत्ननिभास्त्रयस्ते ॥१६॥

कीर्तिर्भाति जगत्त्रये गजपतेर्विद्वन्मदाधायिनी,
शत्रुग्लानिविधायिनी गुणगणस्वच्छाम्बुसद्वाहिनी ।
शीतांशोः परिभाविनी शुचितया भूयो जगत्पायिनी,
साधुस्वांतनिवासिनी सुरपतेरैश्वर्यसंदायिनी ॥१७॥

आसंस्त्रयो गजपतेः प्रथिताः पृथिव्यां,
पुत्राः पवित्रचरिताः खलु कामराजः ।
ख्यातस्ततोप्यमरसिंह इति प्रसिद्ध-
स्तस्यानुजो विदितजालपनामधेयः ॥१८॥

पुत्राः पवित्रचरिताः स्थिरराजनाम्नो,
जातास्त्रयोप्यमितविक्रमविक्रमश्रीः ।
ज्येष्ठोऽपरः पृथुगुणैकनिधिः पृथुश्रीः,
कीर्त्यानुजो धनदजिद्धनराजनामा ॥१९॥

पद्मापतिपदाम्भोजभ्रमरीभूतमानसः ।
श्रीमान्भ्रमरराजोभूद्दासूकस्यात्मसंभवः ॥२०॥

ज्येष्ठःसुतो गजपतेरपि कामराजो,
नो कामराजवसगो द्विजकामधामा ।
यः सद्गुणार्जितयशः शशिमण्डलेन,
प्राकाशयत्सुकविकैरवकाननानि ॥२१॥

कामराजसुतौ जातौ ख्यातौ कीर्त्या यथा सुरौ ।
अभूदुद्धरणोज्यायान्महीचन्द्रोनुजस्तयोः ॥२२॥

प्राप्तोदयो गजपतिप्रवरोदयाद्रेः,
स्फूर्जत्प्रभावमहिमामरसिंहभानुः ।
उत्सादयन्नपि समस्ततमः प्रवृत्ति,
चित्रं न जातु जनतापमयं तनोति ॥२३॥

येनाकारि समस्तमानसमलत्यागोरतिं बध्नता,
शान्तौ येन भवार्णवैकतरणिस्तत्त्वार्थधीराहृता ।
येनासादि निजापरैकमतिना ब्रह्मैकशर्मोदयः,
श्रीमान्सोऽमरसिंह एष जयति क्षोणौ सुकल्पद्रुमः ॥२४॥

येनाशेषसकोत्तमात्प्रविलसत्प्रौढ़प्रतापानल-
ज्वालालीढसमस्तवैरिनिवहारण्यात्पदं प्रोन्नतम् ।
लब्ध्वा श्री महमन्दखानसुनृपात्त्रत्यर्थिकान्ताननो-
दञ्चच्चन्द्रपराभवाय सततं शौर्येण सूर्यायितम् ॥२५॥

योला उमाख्यजननीशुभकल्पबल्याः,
प्रादुर्भवन्प्रसवसुस्तबकाभिरामः ।
अर्थिव्रजोचितविचित्रफलैकधामः,
क्षौणौ स भाति दिविरोऽमरसिंहनामः ॥२६॥

येनाप्रापि दयालुना क्षितितले, बंदीः समस्ता धनै-
र्नित्यं मोचयता विमुक्तरमणीलीलाकटाक्षोत्सवः ।
सिक्तो धर्मतरुर्निजाश्रितजनेष्वातन्वता रत्नजं,
वृष्टिं सोऽमरसिंह एवमभवत्कल्याणपात्रं सदा ॥२७॥

दाने कल्पद्रुमो यः(?) परिहितकरणे भास्करः सिन्धुराजो,
गाम्भीर्ये वापिधैर्ये सकलजनिजुषां तापनाशे शशाङ्कः ।
विश्वाम्भोधौ निमज्जल्ललितवृषतरिर्गौरवे रत्नसानुः,
श्रीमान्कायस्थवर्यो भवतु बहुमुदामास्पदं सोमराजः ॥२८॥

तस्य द्वौ तनयौ प्रशस्तविनयौ जातौ सदा सद्गुणैः,
ख्यातौ मूर्तिधरौ वरामधिमतौ किं भानुचन्द्रावुभौ ।
सर्वाशापरिपूरितार्चितबभू (तनूः) भास्वत्प्रतापोज्वलौ,
ज्येष्ठो लक्ष्मणसंज्ञकः समभवत्तस्यानुजो रावणः ॥२९॥

सर्वाशाः परिपूरयन्नपि हरल्लोकेषु तापव्यथान्,
शुष्म [ष्य] द्वभूसुमनोव्रजानपि सुधाहस्तोदकैः पोषयन् ।
वृष्टिं सत्कमलोद्भवामपि शुभां मुञ्चन्सदा रावणः-
म्भोदश्चित्रमिदं न यत्प्रकुरुते क्वापि क्षितौ दुर्दिनम् ॥३०॥

विश्वप्रशस्तमहिमागुणरत्नसिन्धु-
स्त्रैलोक्यवन्द्यपरमोत्तमधर्मबन्धुः ।
विबुधकामिनीहृदयमण्डनकीर्तिहारः,
प्रोद्भाति रावण इह क्षितिलोकसारः ॥३१॥

प्रसूतोऽमरसिंहाख्यकासारात्कमलोपमः ।
लक्ष्मणो भाति भूलोके करुणावरुणालयः ॥३२॥

जयति सदसि दक्षः क्षिप्तविद्वेषिपक्षः,
फलितसुकृतवृक्षः स्वीकृतश्रेष्ठशिक्षः ।
यशसि विहितरक्षः सत्कृतात्मीयपक्षः
सुधनविजितयक्षो लक्ष्मणः कल्पवृक्षः ॥३३॥

यस्योदारविवेकमंदरगिरिप्रक्षुब्धनानागुणा-
कूपारीत्थयशोविधुर्धवलयंस्त्रैलोक्यमुज्जृंभते ।
अश्विन्नातचकोरलोचनमुदं कुर्वन्नपीत्यद्भुतं
यन्मित्रोदयमीयते ऽत्र जनतातापं हरन्सर्वदा ॥३४॥

सौन्दर्येण मनोभवो नहि यतो नो संयमिद्वेषण-
श्चन्द्रो नैव यतः कलङ्करहितो दस्रोपि नैको यतः ।
भूमौ संचरतीति वामनयना चेतोहरं न क्षमा,
वक्तुं यं कवयोपि स क्षितितले प्रोद्भासते लक्ष्मणः ॥३५॥

प्राग्लीनो जलधौ चिरं तदनु यो जातः सुमेरोः शिरो,
वाञ्छामात्रफलप्रदः प्रकटितः स्तब्धश्च कल्पद्रुमः ।
वाञ्छातीतवसुप्रदोपि च मृदुर्नम्रः सदा लक्ष्मण-
स्त्रैलोक्ये प्रकटीभवन्निजगुणैस्तेनोपमेयः कथम् ॥३६॥

त्रैलोक्यप्रसरन्सुकीर्तिललिलभ्राजसुशीलोल्लस-
द्वीचिव्रातपवित्रितारिवलजनत्प्रासूत यं निर्मलम् ।
देवी मौलिक संज्ञिका सुरसरित्प्रोद्यात्त्रिवर्गोदयं,
धर्मं मूर्तिमिवोदितं स जयति श्रीमान्सदा लक्ष्मणः ॥३७॥

CLOSING :

औदार्यगाम्भीर्यविवेकधैर्यदाक्षिण्यशीलादिगुणैकके तोः ।
ज्येष्ठस्तनूजोऽमरसिंहनाम्नः, सर्वातिदुष्पारसमुद्रसेतोः ॥
कायस्थमाथुरकुलाब्धिजकल्पवृक्षः, श्रीलक्ष्मणः सकललोकहितैकदक्षः ।
विद्वन्मुखेन कुरुते स्म शुभं निबन्धं, सन्तः समीकुरुत तत्र पदस्त्यबद्धम्
॥युग्मम्॥

आयुर्वेदपयोनिधेरभिनवं पीयूषसारं सुधां,
नीत्वा यं प्रकटीकरोति सकलं श्रीक्षेमशर्मा भिषक् ।
तस्मादिन्दुमुदीयन्नपि कविः स्याद्वेदशर्मा न किं,
तं सम्यग् लिखति स्म सन्मतिवरो व्यासश्च दामोदरः ॥

क्षोणीधन्वन्तरिः साक्षादभवत्पुरुषोत्तमः ।
क्रियमाणनिबन्धस्य युक्तायुक्तविवेचकः ॥
अभूज्जगच्छ्रीरितिचारुसभ्यः सद्धर्मसाहित्यविवेकसभ्यः ।
आसीद् द्वितीयोऽत्र तथाहर्दासः, साधूत्तमः कीर्त्तिकृतप्रकाशः ॥

रसव्योमशरेन्द्वङ्के वर्तते विक्रमवत्सरे ।
मार्गे शुक्ले हरिदिने पूर्णो ग्रन्थो नवो बुधे ।।

कल्याणभाजः सकला भवन्तु, लोके घनो वर्षतु साधुकाले ।
सन्तो लभन्तां सततं यशांसि, प्राप्नोतु धर्मो जयमत्र नित्यम् ।
यावन्नीरनिधौ नीरं दिवि भानुनिशाकरौ ।
श्रोणौ मेरुः कुलं तावल्लक्ष्मणस्येह नन्दतात् ।।

येनाकारि जनार्त्तिहारिणी नवग्रामे शुभा दीर्घिका,
नित्यं सज्जनमार्गणैक वसतिं यो धर्मशालां व्यधात् ।
सोयं सर्वजनान्विलोक्य विविधान्तर्कादितान्लक्ष्मणः,
कर्तुं तान् विरुजः करोति करुणासिन्धुनिबन्धं शुभम् ।।३८।।

दृष्ट्वा सुश्रुतवाग्भटात्रिचरकाचार्योदिताः संहिताः,
भेदाचार्यमतं विलोक्य बहुशः श्रीनित्यनाथादिभिः ।
प्रोक्तं चापि विविच्य सर्वमखिलं सारं गृहीत्वा ततो,
ग्रन्थं नाम सुलक्ष्मणोत्सवमिमं व्रूते सुधीर्ल्लक्ष्मणः ।।३९।।

ग्रन्थे शुभेपि विहिते सुधिया खलानां,
स्यादेवदूषणकथाव्रसरस्तथापि ।
चन्द्रेमलेपि धरणिप्रतिबिम्बयोगः ।
प्रोक्तो जनैरमृतवृष्टिकरे कलङ्कः ।।४०।।

संत्येव निर्मलगुणाः सदसद्विवेकं,
कुर्वन्ति ये परगुणान्प्रथयन्ति संतः ।
सन्त्येव दुग्धजलभेदविधानदक्षा-
स्तन्वन्ति मानसगुणानपि शुभ्रपक्षाः ।।४१।।

COLOPHON : इति श्रीमाथुरकायस्थवंशावतंसामरसिंहात्मजश्रीलक्ष्मणनामप्रथिते लक्ष्मणोत्सवग्रन्थः समाप्तः ।

Post-Colophonic: सम्वत्सर १९११ वैशाख कृष्णा १२ । पुस्तकं श्रीधर्मावतार विजयसिंहजी नृपेण पठनार्थं अलवरमध्ये लिखायतं गङ्गाधरेण ।

5197/2458 आयुर्वेदप्रकाश

OPENING :

श्रीगणेशाय नमः ।

अर्कप्रकाशकासारविमर्शाम्बुजिनीमयम् ।
सच्चिदानंदविभवं शिवयोः पूर्वमाश्रये ॥१॥

देवेन्द्रमौलिमंदारपुष्परागकणारुणाः ।
विघ्नं हरन्तु हेरंबचरणाम्बुजरेणवः ॥२॥

अधुना रसराजस्य संस्कारान्संप्रचक्ष्महे ।
नानातंत्राणि संदृश्य भिषजां सिद्धिहेतवे ॥३॥

COLOPHON : इति आयुर्वेदप्रकाशे श्रीमदुपाध्यायसारस्वतकुलावतंस-काशीनिवासि माधवविरचितेऽध्यायः समाप्तः ।

x x x

5212/2525 चिकित्सासारसागर

OPENING :

श्रीगणेशाय नमः । श्रीमतेरामानुजाय नमः ॥
श्राताङ्घ्र्यर्चानिलम्बाऽर्कजमरतनिशागेशसौमित्रितारा,
पुत्रारिघ्नर्क्षराजैर्मृतिचमरदलच्छत्रवस्त्राऽऽनिलैला: ।
सेव्यं बिभ्रद्भिरीशैः सचिवपरिवृतं रत्नसिंहासनस्थं,
स्यामं रामं प्रकामं नमत परिलसद्वामरामाभिरामम् ॥१॥

अथ कविवंस प्रस्ताव—

श्रीमान् गौतमगोत्रजो गुरुवरोऽभूत्काञ्चनीयो द्विवे-
द्याख्यः श्रीमणिकण्ठपूषसरयूपारत्रयीपारगः ।
सीताराममजीजनत्स च सुतं वेणीप्रसादं विधिः,
स्वांगादङ्गिरसं स वै गुरुमिव प्रान्तेषु दिल्लीभुवः ॥

मिश्रेति प्रथिताद्भूवतरुभौ वेणीप्रसादात्सुतौ,
श्रीमन्नंदकिशोरमिश्रसुभिषक् श्रीमन्युलालस्तथा ।

सौभ्राज्याद्यखिलैर्गुणैर्गुरुतरौ.....भ्रातरौ,
सूर्याचंद्रमसाविवादिपुरुषा दस्राविषस्राग्रवेः ॥

भिषग्वरो नंदकिशोरमिश्रः,
श्रीमन्युलालाध्ययनायधीरः ।
नरान् गदानमोचयितुं चिकित्सा-
सारोदधिं मञ्जुलमातनोति ॥

राजवंश प्रस्ताव—

श्रीमन्माधवरावभूपतिरभूत्सिध्वाभसिंधेकुला-
ग्लानम्लौऽरसिकेऽल्पसुग्लहसभिद्वैरिव्रजध्वंसनः ।
निर्यन्निर्ज्जरभेन निर्जरप्रति प्रस्थन्तु येनोर्जितं,
मर्जन्निर्जितऽर्मजिताऽर्यममोहाभिल्लीभदिल्लीभृता ॥

CLOSING

नीलोत्पलं समधुनागरपुण्डरीकं,
द्राक्षापि पालमधुकाशमती कणात्वक् ।
निदग्धिर्कामिलिकसावरकोग्रगन्धा,
काशीशसर्करचलाऽत्र्यषभं चराष्ण (चरास्ना) ।

भंजिष्ठचा सहसमैः कर्षाशपिष्ठै तैलंपचेतु पयसा तु चतुर्गुणेन ।
नश्यं नृणान्ति ॥

x x x

5235/2417 भिषक्चक्रचित्तोत्सवः

OPENING :

श्रीगणेशाय नमः ।

ध्यायेद्बालां प्रभाते विकसितवदनां फुल्लराजीवनेत्रां,
मुक्तावैदूर्यगर्भै रुचिरकनकजैर्भूषणैर्भूषिताङ्गीम् ।
विद्युत्कोटिच्छटामां परिमलबहुलां दिव्यसिंहासनस्थां,
गीर्देवी तस्य दासी भवति सुखदं नन्दनं केलिगेहम् ॥१॥

CLOSING

भिषक्चक्रचित्तोत्सवं वैद्यशास्त्रं कृतं हंसराजेन पद्मैर्मनोज्ञैः ।
सुहृद्यैरदोषैरुजो ध्वान्तनाशं हरेरंघ्रिसंसेवनानंदमूर्ति ॥११॥

महामङ्गल विश्वेश मङ्गलेश जगत्पते ।
मङ्गलं कुरु मे देव वासुदेव नमोस्तु ते ॥१२॥

महामङ्गले मङ्गले मङ्गलेशे शिवे कालिकेबे मुरारे किलेशे ।
शुभे वा किलं विश्वकृच्चन्द्रकान्ते नमस्ते नमस्ते नमस्ते ॥१३॥

COLOPHON : इति श्री भि० हं० वैद्य० [भिषक्चक्रचित्तोत्सवे हंसराजवैद्यकृते] रोगि मूत्रलक्षणं समाप्तम् ।

Post-colophonic : संवत् १९१० शाके ।

x x x

5251/2482 योगसमुच्चय

OPENING : श्रीगुरुभ्यो नमः

वंदेहं श्रीशं तु धन्वंतरिं वै,
देवादेवैरर्चिताङ्घ्र्यंब्जयुग्मम् ।
त्रैलोक्ये विख्यातमानन्दकन्दं,
कर्त्तारञ्चाप्यौषधीनामधीशम् ॥१॥

गणाधीशं नमस्कृत्य काङ्क्षितार्थस्य सिद्धिदम् ।
वैद्यानां सुहितार्थाय वक्ष्ये योगसमुच्चयम् ॥२॥

विलोक्यानेकशास्त्राणि बहुयोगनिरूपणः ।
कृतो मया समुद्धृत्य सारभूतं सुवैद्यराट् ॥३॥

युग्मेन्दुवस्वींन्दुमितेब्दवृन्दे,
भौमे नभे शुक्लचयोदशीषु ।
निधीकृतो योगसमुच्चयोयं,
ग्रन्थश्चिरं तिष्ठतु मङ्गलार्थे ॥

COLOPHON: इति श्रीमन्महात्मन्, साहिमल्लात्मजेन नवनिधिरामेण विरचिते योग-समुच्चये संकीर्णयोगनिरूपणो नाम पञ्चमो वृन्दः ।

Post-Colophonic :

मासे भाद्रे पदे कृष्णे अमायां, शनिवासरे ।
पूर्वा फाल्गुनि नक्षत्रे यतो ग्रन्थःपूर्णताम् ॥

संवत् १९१३ शाके १७७८ ।

x x x

5263/2431 वैद्यजीवन-सटीक

OPENING :

श्रीगणेशाय नमः ।

प्रकृतिसुभगगात्रं प्रीतिपात्रं रमाया,
दिशतु किमपि धाम श्यामलं मङ्गलं वः ।
अरुणकमललीलां यस्यपादौ दधाते,
प्रणत हरजटाली गाङ्गरिङ्गत्तरङ्गैः ॥१॥

श्रीगणेशाय नमः ।

ग्रन्थकर्त्ता शिष्टाचारपरिपालनाय ग्रन्थादौ मङ्गलमाचरति, तत्किमपि अनिर्वाच्यं धाम तेजो निराकाररूपं वो युष्माकं मङ्गलं दिशतु । मङ्गलं श्रेयसि श्वेत इति विश्वः० ।

CLOSING :

लोहाभ्रार्करसं समं द्विगुणितं गन्धं पचेत्कोकिला,
काष्ठाग्नौ मृदुले निधाय सकलं लोहस्य पात्रे भिषक् ।
शुद्धं गोमयमण्डले विनिहिते रम्भादले विन्यसेत्,
तस्योर्ध्वं कदलीदले द्रुततरं वैद्येश्वरोनिक्षिपेत् ॥

भो प्रिये लोहाभ्रार्करसं भिषजा समं कर्त्तव्यमिति शेषः द्विगुणितं गन्धं देयमितिशेषः ।

भिषक् वैद्यः, भिषक् वैद्य-चिकित्सके इत्यमरः । सकलं सम्पूर्णं इदमौषधं लोहस्यायसः पात्रे भाजने, पात्रामत्रं च भाजनमित्यमरः ।

[अन्त अपूर्ण]

COLOPHON :

इति भगीरथविरचितायां वैद्यजीवनटीकायां श्रीजगच्चन्द्रिकायां चतुर्थकिरणः । (एतत्पश्चात् पञ्चम किरण अपूर्ण) ।

5280/2528 सद्योगरत्नावली

OPENING :

श्रीगणेशाय नमः ।

श्रीशमच्युतमनन्तं चतुर्वर्गप्रदं विभुम् ।
विश्वानाथमहं वंदे कारणं पुरुषोत्तमम् ॥१॥

गिरिजानन्दनं वन्दे विघ्नं हन्ति दिवाकरम् ।
सर्वसिद्धैकदातारं गजवक्त्रं महाबलम् ॥२॥

विधिविष्णुपदान्वन्दे वागीशं करुणामयीम् ।
वातवीणाधरां श्यामां अतिरक्तां शुभां शिवाम् ॥३॥

प्रायुरारोग्यदं वंदे अम्बिकायुतत्र्यंबकम् ।
युगामयघ्नं ताराभं शशिमौलि जगद्गुरुम् ॥४॥

वंदेब्धिसम्भवं विष्णुं आयुर्वेदप्रवर्त्तकम् ।
कृपाकरं दैवनाथं सुधाघटधरं विभुम् ॥५॥

अगदागमगं सारं समुद्धृत्य यथामतिः ।
गङ्गारामेण लिखिता सद्योगरत्नावली ॥६॥

महेशशक्तियन्त्रितो गङ्गारामो यथा शुकः ।
आयुर्वेदाब्धिगं रत्नं समुधृतकृतावली [समुद्धृत्याकृतावलीम्] ॥

COLOPHON : इति श्रीसद्योगरत्नावली समाप्त ॥ पञ्चमखण्डः । शुभमस्तु ।
Post-Colophonic : संवत् १९१२ मिती चैत्रकृष्णा चतुर्दश्याम् ॥

x x x

5293/4974 भैषज्यकोशः

OPENING:

श्रीगणेशाय नमः ।

राधेऽधुना देहि च कन्दुकं मे,
त्वया धृतोस्तीति वदन्ति सख्यः ॥

एवं वदन्नन्दसुतः सखीनां,
मध्ये स्तनन्यस्तकरोऽवतु त्वाम् ॥१॥

श्रीसूर्यवंशे विमले बभूव,
श्रीमान्नृसिंहोऽपि यथार्थनामा ॥
दैत्यस्य वंशेषु यथा नृसिंहो,
म्लेच्छस्य वंशेषु तथा नृसिंहः ॥२॥

नारसिंहवंशे परतापसिंहः,
श्रीरावराजा नरखण्डदेशे ॥
आसीत्तदाज्ञामनुवर्तिनो ये,
कृता नरेशाश्च नरा नरेशाः ॥३॥

तदात्मजः श्रीबखतेशनामा,
वदान्यराजा शिविना समानः ॥
उमार्चने यो मनसानुरक्तः,
समीरपुत्रोऽपि यथानुरामे ॥४॥

आखेटकार्थं गमनं करोति,
श्रीरावराजाऽपि तदा बभूव ॥
भीता गिरीणां च गुहासु लीनाः,
येऽन्ये नृपाः स्युः क्षितिमण्डलेऽस्मिन् ॥५॥

आज्ञां तदीयामवलम्ब्य सम्यक्,
श्रीनाथनामानृपरञ्जनार्थम् ।
भैषज्यकोशं रमणं सुगम्यं,
स्वल्पं करोमीति भिषग्हितार्थम् ॥

COLOPHON : इति श्रीघासीरामभट्टात्मजश्रीनाथविरचिते श्रीमन्महारावराजासवाई श्रीबखतावरसिंहजी बहादुरस्य भैषज्यकोशे जकारवर्गः पञ्चदशः ॥
झाऊमूला नाम.....

CLOSING : कुस्तुम्बुरुरनारस्य पुष्पं माजूफलं तथा ।
उत्सवस्य च पत्राणां धूमो दुर्नामनाशकृत् ॥
द्विकर्कशं सजलं पीतं.....(अपूर्ण)

5297/2405 राजेन्द्रकोश

OPENING :

श्रीगणेशाय नमः । श्रीरामाय नमः ।

अथ राजेन्द्रकोशो लिख्यते ।

ध्यात्वा श्रीरामचन्द्रं प्रणतसुरवरं प्रोल्लसन्मौलिमालं,
माणिक्योद्योतभास्वद्रुचिविकचलसत्पादपाथोजमीशम् ।
सर्वाघौघातिरेकांधतमस्कदलप्रोल्लसन्नामदीपं,
ध्वस्तप्रत्यूहजालं निखिलनिजजनाभीष्टकल्पद्रुमीशम् ॥१॥

कृत्स्नार्थिस्तोमजाग्रद्विरधिरचितलल्लाटस्थदारिद्र्यलेखा-
ऽजस्रं नानाप्रदानोदकवहु·····रयैराशु येन प्रमृष्टा ।
विद्वद्वृन्दैकगोष्ठीप्रचुरपरिसरत्सर्वशास्त्रार्थतत्त्व-
ज्ञानप्रख्यातकीर्त्तिर्विपुलरसमतिः कोविदेन्द्रानुयातः ॥२॥

एकेनैव प्रयुक्तं निखिलगुणचयं द्रव्यसंघप्रसक्तं,
विद्वत्सद्वैद्यनानाविधरचितनिघण्ट्वर्थजातं विविच्य ।
गोडोर्वीशावतंसः क्षितिपतितिलकः प्रादिशच्छ्रीन्द्रसिंहो,
राजा सर्वोपकारं निखिलबुधवरानिन्द्रकोशं चिकीर्षुः ॥३॥

नानाद्रव्यार्थसंधानतत्परतमतश्चाक्ष्यादिन्द्रकोशा-
दर्थिप्रत्यर्पितार्थादमलसुमतयो मत्सरत्वं विहाय ।
गृह्णीध्वं वै यथेच्छं निखिलजनमनोहारिणोनन्यलभ्या-
नास्माद्यैतान्प्रदिक्षु प्रभवत गुणविख्यातकीर्तीन्दुभाजः ॥४॥

प्रभाकरतनूजनिर्विबुधरामचन्द्राभिधो,
बुधेन्द्रसमनुव्रतो नृपवरेन्द्रसिंहाज्ञया ।
समीक्ष्य विविधागमनाखिलवैद्यसद्ग्रंथितान्,
करोति विविधार्थसंग्रहमिदन्द्रकोशाभिधम् ॥५॥

CLOSING :

मुनिखर्जूरिकावन्या राजेष्टा च प्रकीर्तिता ।
पिंडखर्जूरिकायुग्मं मुख्यं स्वादे हिमं गुरु ।
पित्तदाहास्रतृष्णाश्वासघ्नं श्रमहृद्वीर्यवर्द्धनम् ।
विपाके लघुरुक्षं च बृंहणं क्षयनाशनम् ॥
सर्वदोषहरं प्रोक्तं सक्षारं कृमिदोषजित ।

अन्यच्च —

दाहघ्नी मधुरारुचिप्तशमनी तृष्णार्तिशोषापहा,
शीता श्वासकफश्रमोदपहरा वस्तिव्रणे पुष्टिदा ॥
वह्नेर्मेद्यकरा गुरुर्विषहरा हृद्या न दत्ते बलं,
स्निग्धा वीर्यविवर्द्धिनी च कथिता पिण्डाख्य खर्जूरिका ॥

[अन्तिमांश अपूर्ण]

x x x

OPENING

5298/3319 शब्दरत्नप्रदीपः

तत्सुतो नामदेवस्तु वैद्यो वैद्यगणाग्रणी ।
प्रख्यातो भूमिपालस्य गोपालस्य समीपगः ॥१॥

तस्मात्कल्याणदासस्तु प्रादुरासीत्प्रतापवान् ।
यत्कीर्त्या शौर्यदानादिभूतया पूरितं जगत् ॥२॥

यादवस्तुलसीदासः पुत्रो गोपालभूपतेः ।
बहादुरपुरं तेन निर्मितं तत्र सोऽवसत् ॥३॥

प्रोत्तुङ्गसौधप्रासादहर्म्यप्रकारगोपुरैः ।
शोभितं कोकिलैर्भृङ्गैर्वनोपवनकादिभिः ॥४॥

तत्र यादवराज्ये तु कल्याणः पूजितोऽभवत् ।
आयुर्वेदाङ्गनिपुणः शस्त्रशास्त्रविशारदः ॥५॥

तेन सन्तन्यते शब्दरत्नदीपस्तु भाषया ।
काशीरामेण गुरुणा क्षान्तैर्वैद्यैरदादिभिः ॥६॥

CLOSING

केल्हणो भल्हणश्चैव विप्रौ सारस्वताभिधौ ।
भारद्वाजीति आवीयौ जातौ पश्चिमखण्डले ॥१॥

तद्वंशे गुरुदासस्तु अर्गलायां वसन्पुरा ।
तत्सुतो मथुरादासः काशीरामश्च तत्सुतः ॥२॥

विख्यातो मथुरादेशे वैद्यविद्याविशारदः ।
तेनकल्याणदासस्तु पाठितो बदुमण्डले ॥३॥

नामदेवसुतः श्रीमान्पौत्रो लक्ष्मीधरस्य तु ।
तेन वैद्योपकाराय शब्दरत्नप्रदीपकः ॥४॥

काशीरामेण गुरुणा कारितः सद्विषक्प्रियः ॥
सौन्दर्ये शशितुल्यतामनुगतः सूर्योपमस्तेजसा,
पाठे वेद पुराणशास्त्रकवितानामेव वाचस्पतिः ।
शौर्ये वासवजामदग्न्यसदृशो, माण्डीवितुल्योऽथवा,
जीव्याद्ब्राह्मदिनावधेरपि परं कल्याणदासः क्षितौ ॥५॥

COLOPHON: इति श्रीनामदेवसुत कल्याणदासकारिते काशीरामविरचिते शब्दरत्न-प्रदीपे सर्वाक्षरवर्णः समाप्तः ।
ग्रन्थश्च समाप्तः ॥

x x x

5317/2485 रसरत्नप्रदीपः

OPENING: श्रीगणेशाय नमः । श्रीत्रिपुरादेव्यै नमः ।

प्रह्वोल्लत्स्फुटनीलनीरजदलाद्वैतप्रतीतिप्रभो-
र्दृष्टिर्दोष्टि [ष्णु] तमालनीलिमगुणग्राहिण्यनन्तस्य वः ।
लक्ष्म्याः सा सुसुखाय चिन्तितवती या भाति नीलाम्बुद-
श्यामश्रीयमुनाप्रवाहजठरे लोलेव मीनाङ्गना ॥१॥

जयति विदितसारः सृष्टविश्वोपकारः,
प्रबलमदकुठारः संहिताकण्ठहारः ।
सकलगुणसमाजः सिद्धविद्यानिकुञ्ज-
स्त्रिपुरहर इवेन्द्रः टाकनामा नरेन्द्रः ॥२॥

तस्यात्मजः क्षितिपतिर्जगति प्रसिद्धः,
साधारणो रणविनिर्जितशत्रुसेनः ।
त्रिस्थानमार्गमधिगम्य जगद्विरिञ्चे-
र्भूतं स्थितं च पुरवास्यकरोत्प्रतापात् ॥३॥

तस्यात्मजास्त्रय इमे विदिता जयन्ति,
ज्यायानयं समिति लक्ष्मणसिंहनामा ।
शत्रून्विजित्य कृतवान् रिपुकामिनीनां,
वर्षाविलोचनयुगे हृदये निदाघम् ॥४॥

श्रीमान्परः सहजपाल इति क्षितीन्द्रः,
(चन्द्रः) स्वयं सुकविलोचन कैरवाणाम् ।
स्त्रीणां नृणां हृदयपंकजकर्णिकायां,
तुल्यानुराग इव भाति गुणैः सदा यः ॥५॥

यत्कीर्तिकान्तिविमलो वचसां विलासो,
हारावलीव लुठतिस्तुतिपाठकानाम् ।
काव्ये कवित्वधनिनां मदनो नरेन्द्रो,
लक्ष्मीविलासनिलयो बलिवद्वदान्यः ॥६॥

वंशेथ विश्वविदिते नृपरत्नपालः,
प्रादुर्बभूव करुणावरुणालयेस्मिन् ।
यस्मादभूत्सुतनयोविनयाम्बुराशिः,
श्रीरामराज इगि रम्य तयाश्रिया च ॥७॥

साधारणक्षितिपतेः सुनियोगयोगात्,
संप्राप्य सेवकपदं खलु रामराजः ।
नानामयान्धतमसः प्रशमाय धन्यो,
रम्यं करोति कुतुकाद्रसरत्नदीपम् ॥८॥

CLOSING : एतैर्विदोषाथ समस्तदोषा,
चिह्नैर्विभिन्ना भिषजावधार्या ।
नाडी यथा कालमपि त्रयाणां,
प्रकोपशान्त्यादिभिरेव भूयः ॥

COLOPHON: इति श्रीटाकान्वयमण्डनरत्नदेवसुतश्रीरामराजविरचिते रसरत्नदीपे गलगण्डमालादिकफकेत्वन्ताधिकारः समाप्तः ।

Post-colophonic: संवत् १९१२ का मिति कार्तिकवदी ६ सोमवासरे ।

5318/2462 रसरत्नसमुच्चय

OPENING : श्रीगणेशाय नमः ।

यस्यानंदभवेन मंगलकला संभावितेन स्फुर-
द्धाम्नासिद्धरसामृतेन करुणा दीक्षा सुधासिंधुना ।।
भक्तानां प्रभव प्रसंहृतिजरारागादिरोगाक्षणा-
च्छान्तिं यांति जगत्प्रधानमिषजे, तस्मै परस्मै नमः ।।१।।

रत्नकोशश्च शम्भुश्च तथैको नरवाहनः ।
इन्द्रदो गोमुखश्चैव काम्बलिर्व्याडिरेव च ।।२।।

नागार्जुनः सुरानन्दो नागबोधिर्यशोधनः ।
खण्डः कपालिको ब्रह्मा गोविन्दो लम्पको हरिः ।।३।।

आदिमश्चन्द्रसेनश्च लङ्केशश्च विशारदः ।
कपाली मतमाण्डव्यो भास्करः शूरसेनकः ।।४।।

सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः ।
रसांकुशो भैरवश्च नन्दी स्वच्छन्दभैरवः ।।५।।

मन्थानभैरवश्चैव काकचण्डीश्वरस्तथा ।
वासुदेव ऋषिः शृङ्गः क्रियातन्त्रसमुच्चयी ।।६।।

रसेन्द्रतिलको भोगी भालुकिर्मुष्कलाह्वयः ।
महादेवो नगेन्द्रश्च वासुदेवो हरीश्वरः ।।७।।

एतेषां क्रियतेऽन्येषां तन्त्रान्यालोक्य संग्रहः ।
रसनामामयघ्नानां चिकित्सार्थोपयोगिनाम् ।।८।।

CLOSING : सूनुना सिंहगुप्तस्य रसरत्नसमुच्चयः ।
.....।।
अम्लकं तालकं ताप्यं शिलाजं कुनटीरसः ।
देवदालीरसोव्योषलेपनाद्विषनाशनः ।

रसेन चक्रमर्दस्य..... (अन्त अपूर्ण)

5336/2644 क्षेत्रदीपिका

OPENING:

श्रीगणेशाय नमः ।

अथ क्षेत्रतत्त्वदीपिका लिख्यते ।

यत्कान्त्या कान्तिमन्तः सुरसरणिचरा भूर्भुवः स्वः प्रकाशाः,
अभ्रान्त्या सभ्रमन्ति प्रवहपथसमालम्बिनो मूर्तिभाजः ।
यद्भ्रूमङ्गक्षणेन स्थितिजननलयाः संविभूतेर्गुणानां,
तद्रूपं मे हृदब्जे विकसतु सततं सच्चिदानन्दमाद्यम् ॥१॥

इंग्लैण्डीयकुलावतंसविबुधग्रामाभिरामाग्रणीः,
श्रीहट्टंससमाह्वयो व्यरचयद् ग्रन्थं स्वनामाभिधम् ।
रेखाख्ये गणिते स्वदेशवचसा तं देववाण्याधुना,
धर्क्ष्ये विज्ञमुदे सहायमकलंक्यो लेष्टनंसाहबम् ॥२॥

CLOSING:

एकोनचत्वारिंशत्तमम्–

अवसङ समकोणायतच्चतुर्भुजसमानं तत्र कल्पित वर्गक्षेत्रं कर्त्तव्यमस्ति । तद्यथातच्चतुर्भुजस्य अवभूजः तथा वर्द्धनीयो यथा·····वर्द्धित भागः बस भुजतुल्यः स्यात् अ ई रेखां व्यासं कृत्वा वर्द्धित बसरेखायाः फ चिह्नगतं वृतं कार्य्यं, तदा व फ रेखा कल्पित ब ड समकोणायत चतुर्भुजेन तुल्यस्य ईप्सित व फ गह समकोण सम चतुर्भुजस्य भुजो भविष्यति ८७ प्र. ७७ इदमेवेष्टम् ॥

येन श्रीलवभूपनामविदितो देशोऽधिवासाच्चिरं,
विख्याति गमितस्तु जेंटलिकुलालङ्कारतां बिभ्रता ।
वामभ्रोदविकीर्णशास्त्रसलिलः सोयं गुणानां पदं,
विख्यातो भुवि गोदराभिध बुधः सारस्वतोऽभूद्विजः ॥१॥

नानादानविधानयज्ञनिवहान् कुर्वन् कुलं द्योतयन्,
कन्धारीति समाह्वयस्तु सुकृती तत्पुत्रतामाप्तवान् ।
यस्यास्योत्तरङ्गगाङ्गसहिता स्वाध्यायवाणीचिरं,
नृत्यन्ती भरतप्रियानुकरणान्मन्येऽभवद्भारती ॥२॥

यशस्विनां गोदरमिश्रशर्मणां,
गुणीन्द्रपाथोजवनांशुमालिनाम् ।
यशः शरीरेण य आप पौत्रतां,
मुनेऽभिधानेऽपि च रामचन्द्रताम् ॥३॥

सम्पादितं येन च चातुरीतुरी,
विनिर्मितं कुन्दशशी नु सन्निभम् ।
दिगङ्गनाङ्गावरणां यशोम्बरं,
स पुण्यकीर्तिस्त्रिदिवे विराजते ॥४॥

सरस्वती येन कृता सरस्वती,
प्रवाहणादास्य पथेन भूतले,
सं रामचन्द्रस्य तनुस्तनूद्भवो,
बभूव वेदान्तनितान्तपारगः ॥५॥

अमृतसरसिवासी विज्ञचेतः प्रकाशी,
गुणिसदसि विलासी मुह्यतां मोहनाशी ।
पुरपतिकृतवृत्तिर्ब्रह्मनिष्ठात्मवृत्ति-,
र्भुवि बुधवरहीरानन्दमिश्रे बभूव ॥६॥

स लोकपालप्रतिमान्, कुलोद्भवान्,
पञ्चात्मजान्, वेदविधानतत्परान् ।
उत्पाद्य विद्याम्बुनिधेस्तिमिङ्गिला,
गणण्यपुण्यैस्त्रिदशालयं ययौ ॥७॥

तर्कोत्तुङ्ग तरङ्ग भङ्गिनिवहा काव्यप्रवाहावहा,
मीमांसाद्वयकूलिनीस्मृतिजला वेदत्रयी नादिनी ।
आयुर्वेदविदङ्गमार्थगहना मौख्यंद्रुमध्वंसिनी,
साङ्ख्यावर्त्तवहा पतञ्जलिमतपाहा (व्याला) कुलावाङ्गदी ॥८॥

बाल्ये केलिविधौ सुधान्धिविमला, वेदाङ्गकूल्येनिला,
यस्यासीत्स हि रामचन्द्रतनयो ज्यायान्विलासोभिधः ।
काश्यामात्मतनुं विहाय विमलां कीर्तिं दिगन्तेरितां,
संस्थाप्ये स पदारविन्दयुगलं, चित्तेस्मरन्स्वर्य्ययौ ॥९॥

विलासमिश्रस्य तपस्विमूर्त्ते-
र्ध्यौ ज्यायसीमात्मजतामुपेतः ।
साङ्गान्स नानानिगमानधीत्य,
देवीसहायेत्यभिधां प्रपेद ॥१०॥

तपःपरं केवलमेव मालवे,
चकार चेतः प्रणिधाय माधवे ।
जजाप गौरीचरितं च सत्कृतं,
य आप कर्णं हरिणा द्विधा कृतम् ॥११॥

दिवानिशं योऽनशनं विधाय,
गिरीशजायां हृदि सन्निधाय ।
तेपे च रामाम्बुधिवासरान्यः,
स दीप्तिमाग्निरिवावतस्थे ॥१२॥

पिता ममासीन्निगमे पितामह-
स्तस्यानुजो भानुरिव प्रतापवान् ।
शशीव शान्तः करुणासरित्पति-
र्नितान्तदान्तः क्षमया क्षमासमः ॥१३॥

रविरिवि विबुधेन्द्राम्भोजराजिप्रकाशी,
कविरिव भुवनेऽस्मिन्सर्वविद्याविलासी ।
हरिरिव गुणदावे गर्ज्जतां गर्वनाशी,
स भुवि गुरुसहायः पुण्यराशिः समासीत् ॥१४॥

माधुर्य्यमाप्लुत्य पयः पयोनिधौ,
विराजते यस्य वचोऽवलम्बनात् ।
शास्त्राम्बुधाराभिरवाकिरज्जग-
स्स वै पितुर्मेऽनुजतामुपेयिवान् ॥१५॥

जातः काव्यकलानिधिः पटुतरो दुर्गासहायः सुधी-
र्विन्ध्याद्रेर्विवरे विधाननिपुणस्तेपे तपोदुष्करम् ।
कुर्वन् ग्रन्थवरान्मुहूर्त्तरचनादीनब्दरत्नञ्च यः,
काश्यामात्मनि सन्निधाय परमे चित्तं ररामात्मवान् ॥१६॥

साङ्गाम्नायमहार्णवप्रतरणे यद्भारती सेतुता-
मायाता भुवने विचित्ररचनाचेतश्चमत्कारिणी ।
नानाशास्त्रमयप्रवाहवहनद्वारैरलं भूषिता,
स श्रीभैरवनाथ इत्यभिधया तस्यानुजत्वं गतः ॥१७॥

यदीयवाग्वारिनिधे पदङ्गता,
गभीरता सद्भिरुदीरिताभवत् ।
सवेदवेदाङ्गविदां हृदम्बुज-
प्रकाशेन भानुरिव व्यरोचत ॥१८॥

कुताब्जभानुर्मज्यायान्सोदरः करुणाकरः ।
श्रीमान् कृष्णसहायेति नाम्ना ख्यातो महीतले ॥१९॥

एतान् प्रणम्य मनसा वचसा तथाङ्घ्रि-
श्चित्तं निधाय गुरुपादसरोरुहे द्वे ।
सम्पूज्य वागधिकृतां कुलदेवताञ्च,
ग्रन्थञ्चकार गणितेऽमलरेखिकाख्ये ॥२०॥

ख्यातो जन्मंनिजातिजीवनजवि प्रोल्लासनेभास्करः,
श्रीमान् ट्रायरसाहबोऽत्रकलिकातायां गिरांगार यः ।
श्रीहट्टसंकृतौ स्थितं सुगणितं रेखाभिधं यत्परं,
तद्गीर्वाणवचोनिरूपणविधावाज्ञप्तवान्मां पुरा ॥२१॥

तस्मिन् स्वविषयं गते कियति च ग्रन्थेऽवशिष्टे मया,
तत्पूर्त्यै विबुधेन्द्रराजिभिरलं संसेव्यमानः प्रभुः ।
नानाशास्त्रविचारसारनिपुणो दीनार्त्तिविध्वंसनः,
श्रीयुक्तः सदलण्डसाहबवरो विज्ञापितोऽभूत्पुनः ॥२२॥

विज्ञप्तेन च तेन भूमिपतिना विज्ञाप्य साधारणीं,
विद्वद्बुद्धिविचारकारकसभां ज्ञात्वाथ तस्या मतम् ।
इत्युक्तं परिपूरणाय भवतोद्योगो विधेयः पुनः,
ग्रन्थस्यास्य तदाज्ञया शुभ इति, ग्रन्थः प्रणीतो मया ॥२३॥

श्री योगध्यानमिश्रो व्यरचयदमलां क्षेत्रतत्त्वप्रबोधे,
सत्पात्रे स्नेहपूर्णां सुगणिततरचनावर्तिकां चित्ररुपाम् ।
रेखाविज्ञानरश्मद्युतिनिचयकरीं तद्भवाज्ञानजालं,
ध्वान्तघ्नीं तन्मदान्धप्रमदशलभहां दीपिकां विज्ञतुष्ट्यै ॥२४॥

संवत्सरेऽरिबसुनागमही प्रमाणे,
शाके शशाङ्कुरिपुपर्वतभूमिमाने ।
खृष्टस्य नन्दगुणनागधरा मितेऽब्दे,
नीतासमाप्तिमजरामलदीपिकेयम् ॥२५॥

COLOPHON : इति श्रीक्षेत्रदीपिकायां वस्तूपपाद्यं नाम पञ्चमः प्रकाशः समाप्तः । समाप्तञ्चेदं प्रकरणम् ।

Post-Colophonic : संवत् १९०२ चैत्रशुक्ला ८ भौमवासरे । लिखितं भगवान् । शुभं भूयात् ।

श्रीविद्यावृद्धिचेतः परिषदनुमतः सर्वविज्ञातिमुख्यः,
श्रीहट्टसस्य रीतिं बुधजनसुखदां तत्त्वतः संविरच्य ।
श्रीलैरुलेष्टनाख्यैस्तदनु च हरचन्द्राख्यविज्ञै समेतः
श्रीयोगध्यानमिश्रोऽखिलबिबुधमुदे मुद्रयामास शुद्धाम् ॥१॥

यन्त्रे सारसुधानिधौविधुरिपुक्षोणीभृदिन्दून्मिते,
शाके पौषसितेतरे वसुतिथौ श्रीभानुसूनोर्दिने ।
रेखाकोणमुखप्रबोधजननीमुद्राक्षरैः पूर्णतां,
प्राप्तेयं वरदीपिकासुखमता-ज्ञानप्रकाशात्मिका ॥२॥

लिखायतं श्रीमहाराजाऽधिराजराजेन्द्रश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्रा-श्रीसवाईवीनयसिंहबहादुर ॥ शुभम् ॥

x x x

5338/2603 गणितलता

OPENING : श्रीगणेशाय नमः ।

शङ्कर ईश निशम्य वचः पुरुहूतमुखैः कथितंजगदीश्वर,
सिंधुरतुण्डजनुः परिसूचकमिन्दुकरोज्ज्वलदिव्यकलेवर ।
तेभ्य इमा मुदितो हरितो व्यतरोर्वसनानि निजानि दिगंबर,
देहि कवित्वविशेषचमत्कृतिमेकरदाश्रयणस्य विपद्धरः ॥१॥

निखिलगणितविद्याप्रभुं विभाकरं प्रणमामि ।
तदनुवराहोदितवचः प्रत्यहमेव भजामि ॥२॥

ज्योतिर्विद्याधाम ब्रह्मगुप्तदेवो जयतु ।
द्विजवरसुकुललालाम भास्करोपि भास्करगुणः ॥३॥

तेषां वचनैश्चोदितबुद्धे-
र्गणिते विलसितुमेव विशुद्धे ।
भवत्युद्यतामेद्य मनीषा,
शास्त्राभ्यासे यदप्यनीशा ॥४॥

श्रीबालाभिधदीक्षितैर्निजयशःशुक्लीकृताशान्तरै-
र्भूदेवोपकृतीङ्गितैश्च गुरुभिः पाटीविधौ दीक्षितः ।
अम्बाशङ्करदीक्षितात्मजपटुः श्रीवल्लभो गुर्ज्जरः,
पृथ्वीनिर्जर ईशदत्तधिषणो ग्रन्थप्रबन्धोद्यत. ॥५॥

विकसितरुचिशास्त्रकंजवृन्दोत्कटमकरन्दविमत्तचित्तवृत्तेः ।
रसिकजनमधुव्रतस्य प्रीत्यै गणितलता भवतात्सुपुष्पिताग्रा ॥६॥

CLOSING

जयनगरनिवासी श्रौतविद्याविलासी,
ज्वलनयजनशुद्धो दीक्षितो माधवाख्यः ।
गुणगणलसदम्बाशङ्करस्तत्तनूजः,
पठितगणितविद्यः शङ्करानुगृहीतः ॥१॥

भूदेवानुगृहीतोगुरुचरणरतो गुर्जरौदीच्यजाति-
श्चांचल्येनानुरक्तो ह्यपटुमतिरपि श्रीशिवानुगृहीतः ।
तज्जः श्रीवल्लभोहं करमणितलतां, पुष्पयुक्तामकार्षं,
संतस्तद्वासनातः प्रमुदितमनसः संतु दूरीकृतेर्ष्याः ॥२॥

अस्यां स्थितायां हृदयालवाले,
फलं तु सांख्यप्रतिपादयित्वम् ।
यथा तमोहारिणिचंद्रचूडे,
समाश्रिते सद्हृदयारविंदे ॥३॥

यथामतिप्रोक्तमिदं मयात्र,
तत्स्वल्पमप्यैक्ष्य चयंतु तोषम् ।
समस्तभेदान् गणितागमस्य,
श्रीसूर्यनारायण एव वेद ॥४॥

भासाश्चैत्रसितादितश्च तिथयस्तत्वैश्च वेदै हृतो,
राशिविंशतिभिश्च वासरमितिस्तुद्युक्तिहीनस्तु सः ।
षट्षष्टि : परिदृश्यते वद ततोमासादिमानं पटो,
नागाङ्काद्रिधरान्वितः स च समात्र, ग्रंथपूर्तिर्गता ॥५॥

अथ ग्रन्थावसानमङ्गलम्—

एको यो निजयेच्छया द्विवपुषी धृत्वा शिवावल्लभ-
स्त्र्यालोकश्चतुराननस्तुतपदः पञ्चाननो जन्मभूः ।
षड्वक्त्रस्य सदैव सप्तमुनिभिश्चिंत्योष्टमूर्तिर्नव-
निध्यैश्वर्यकरो नृणां वितरतादुर्व्यं स मे शङ्करः ॥६॥

इति कलकोमलवृत्तैः, पत्तैः सरसैरलंकृताङ्गायाम् ।
गणितलतायामुक्तं ग्रन्थालङ्कारवत्कुसुमम् ॥७॥

इति गणितलतायां विपुलरसायां श्रीवल्लभगणकेन वरैः,
कलवृत्तदलाढ्यैः पञ्चसुकुसुमैः संयुक्तं मधुगन्धधरैः ।
मुनिरवेन्दुसमानैः सुललितगानैं रचितायां वृत्तै रम्यं,
प्रकीर्णसंज्ञकं पञ्चमसंख्यं स्तबकमिदं सुजनैर्गम्यम् ॥

COLOPHON : इति प्रकीर्णकस्तबकं पञ्चमम् ॥

इति गणितलतेयं सप्तरामेषुवृत्तै ५३७,
रसभुजसुमनोभिः संयुता पञ्चगुच्छैः ।
मुदितहृदय एनामभ्यसेन्मानुषो यो,
दिशतु बहुल भव्यं तस्य गौरीगिरीशः ॥५३७॥

Post-Colophonic : इति श्रीवल्लभगणककृता गणितलता समाप्ता ॥ शुभमस्तु ॥

x x x

5339/3021 गोलप्रकाशः

श्रीगणेशाय नमः ।

OPENING :

नित्यं गोनवनीतनीतरभसं श्रीरङ्गराकाधवं,
सुज्ञालंकृतलाङ्गलाङ्गरतिदं श्रीकृष्णमीशं कविम् ॥
नन्दप्रश्रितबन्धुबन्धुरमजं, कान्तं कलांकं परं,
रन्तारं निजगं सुदर्शनधरं वन्देऽरविन्दाधरम् ॥१॥

श्रीलश्रीरामपादामलकमलरजोराजिपूजाभिमानी,
गर्जद्वारीन्द्रदन्तालिबलदमनप्राप्तमुक्ताफलानाम् ॥
हर्ती दीनैकभर्ता विविधमुखमुखानन्दसन्दोहधर्त्ता,
जातश्चण्डांशुवंशे निजकुलतिलकः श्रीप्रतापादिसिंहः ॥२॥

तत्पुत्रः प्रथितः प्रतापतपनः, सौजन्यजन्यप्रभो,
दृप्यद्वैरिसमस्तमस्तकनुतः क्रुध्यन्मृगेन्द्रोपमः ॥
नानादानपयोधिसंभववशश्चन्द्रप्रकाशोऽभव-
त्ख्यातः श्रीबखतेशसिंहनृपतिर्मानोन्नतः सन्नतः ॥३॥

नृपाणां मूर्द्धन्यस्सकलजनधन्यस्सरभसः,
कृपापारावारः कुलकमलसिंहो नरपतिः ॥
सुतस्तस्य प्रोद्यत्सकलकलयालंकृतमतिः,
कृतां चित्रस्फूर्तिःकृतसुकृतमूर्त्तिः सुरुचिरः ॥४॥

बली क्रीरो धीरोनरपतिगभीरोतिचतुरः,
प्रतापस्तारिर्धैरणिकमलोल्लासतरणिः ॥
यतो दाने सिंहः शिव इव जनेषु क्षितिपति–
स्ततः ख्यातः सिंहो जगति शिवदानादिरधुना ॥५॥

चकास्ति श्रीयुक्तो नृपमुकुटनीराजितपदः,
शरच्चन्द्राभायद्वितरणजकीर्तिः शिखरिणी ।
शीलश्चण्डारिकरो, विभूतिधारी, नृपाभिमानहरः ।
नानाकलाविनोदी विनायकप्रीतिकृत्सचन्द्रकलः ॥६॥

अलवर नगर निवासी वशी प्रकाशी जयी जयति ।
ईशो गोपविलासी श्रीशिवदानादिसिंहनृपः ॥७॥

श्रीपञ्चाननसेवयानरवरः पृथ्वीशपञ्चाननः,
शिक्षाकृज्जगतामुदाहरति यो रातीन्द्रवृन्दादसिम् ॥
बल्लन्मल्लगणैस्समं दरहरः, सुप्रीतसर्वंसहो ।
दाताकल्पतरुप्रमस्सरभसः ख्यातस्स जीयादयम् ॥८॥

श्रीराघाराध्यराज्यो लसति सति सदा कौतुकोनुप्रतुष्टो,
नाना मानाभिनाथो हरचरणरतो माप [र] रूपप्रपन्नः ।।
दाता त्राता प्रतापी परपुरहरणाच्चापसंपत्प्रपञ्च-
श्चंचत्सिञ्चत्सुचन्द्रो भक्तु वरबली द्योतितातिप्रतिष्ठः ।।९।।

प्रोद्यतकीर्तिसुधांशुदीधितिचयैरानन्दिताखण्डलं,
शीलश्रीशिवदानसिंहनृपतेरानन्दकन्दप्रदम् ।।
सद्युक्तिग्रथितं स्वबुद्धिमथितं बोलप्रकाशाभिधं,
श्रीनीलाम्बरभूसुरः प्रकुरुते सन्देहसन्दोहहृत् ।।१०।।

इह ग्रन्थे रेखागणितभणितं क्षेत्रगणितं तथा ।
मौर्वीजातं समकुतलगत्र्यस्त्रगणितम् तथा ।।

CLOSING : अक्षांशो न नवत्यंशालम्बाशा एव । एवं सर्ववृत्तेषु नवत्यंशयुत-चापरूपाणां भाऽर्द्धाशशोधनेन चापकोट्यंसिद्धिरिति न च चापस्य बृहत्कोटिः बी.सी. चापं, वी.सी. चापस्य बृहत्कोटिः न च चापमिति सिद्धम् ।।

(ग्रन्त अपूर्ण)

x x x

5376/2619 सिद्धान्तराज

OPENING : ओं नमः श्रीगणाधिपतये विघ्नहर्त्रे ।

नित्यानंदं नित्यमव्यक्तमीशं,
सच्चिद्रुपं निर्गुणं निर्विकारम् ।
एकं व्यापि ब्रह्मवेदांतवेद्यं,
यत्तं वंदे विश्वरूपं मुकुन्दम् ।।१।।

श्रीसूर्यसोमपरमेष्ठिवशिष्ठमर्मा-
चार्यात्रिरोमकपुलस्त्यपराशराद्यैः ।
तंत्राणि यानि गदितानि जयन्ति तानि,
स्फूर्जद्द्विधागणितगोलपरिस्फुटानि ।।२।।

मयाऽऽर्य्यभटजिष्णुजाः रवचरवेधने [वर्धने] वेधसो,
वराहमिहरादयो यदनुसारमात्रं ययुः ।
द्विधा गणितचातुरी निखिलगोलनैपुण्ययो-
र्विभुर्जयतिभास्करो गणकचक्रचूडामणिः ।।३।।

तस्मात् कैश्चित्प्रमेयैर्विमलबहुधियामेव विज्ञानवेद्यै-
र्वक्ष्येसिद्धान्तराजं नवनवरचनं दोषकुद्दालरुपम् ।
सम्यग्विज्ञाय विज्ञा गुणमगुणमिहं प्रस्फुटं प्रस्तुवन्तु,
प्रायो वा दूषयन्तु क्वचिदपि न भयं केवलं मौढचतो भीः ।।७।।

CLOSING :

इत्येतस्यामिद्रपुर्य्यां वसन्स-
न्नित्यानंदो देवदत्तस्य पुत्रः ।
सारोद्धारे सर्वसिद्धांतराजे,
यंत्राध्यायं प्रापयंत्तत्रपूर्तिम् ।।१४८।।

श्रुतिस्मृतिव्याकरणप्रवीणै-
र्विशिष्टशिष्टाचरणैकदक्षैः ।
श्रीमत्कुरुक्षेत्रसमीपसंस्थ-
द्विजोत्तमैरिद्रपुरी बिभाति ।।१।।

तस्यां वसन्गौडकुलप्रसूतो-
नुशासनेनापि डुलीनहट्टः ।
इच्छाभिधो मुद्गलगोत्रजन्मा,
बभूव पूर्वं स तया मनीषी ।।२।।

तस्यात्मजः श्रौतविधिप्रयुक्तो,
वेदांतशास्त्रादिकपारगामी ।
तपोधनो ज्योतिषशास्त्रदक्षो,
विचक्षणो लक्ष्मणसंज्ञकोऽभूत् ।।३।।

तदीयपुत्रस्तपसावरिष्ठः,
सदा गरिष्ठो द्विजमण्डलीषु ।
सदा सदाचारयुतो मनीषी,
नारायणो धर्मपरायणोऽभूत् ।।४।।

तस्यात्मजो ज्योतिषशास्त्रदक्षो,
विद्याविनोदेषु विलग्नचेताः ।
जितेन्द्रियः सत्यतपः समेतः
श्री देवदत्तोस्ति नरेन्द्रमान्यः ॥५॥

नित्यानंदस्तस्यपुत्रो द्विजाना-
माज्ञाकारी सूर्यलब्धप्रसादः ।
षड्नोभूपैर्विक्रमार्कस्य शाके
(१६९६) याते चक्रे सर्वसिद्धान्तराजम् ॥६॥

COLOPHON : संवत् १९०३ कार्त्तिक शुक्ला १० गुरुवासरे पुस्तकं लिखितम् । शुभंभवतु ।

अन्योक्तं वृत्तम् :—

ये नाम केचिदहनः प्रथवत्यवज्ञां,
जानन्ति ते किमपि तान्प्रति नैष यत्नः ।
उत्पत्स्यतेस्ति मम कोपि समानधर्मा,
कालो ह्ययंनिरवधिर्विपुला च पृथ्वी ॥१॥

x x x

5401/2627 सिद्धान्तसिन्धुः (शाहजहाँप्रकाश)

OPENING : श्रीगणेशाय नमः ।

सिद्धं साध्यमिदं विधेरपि जगद्यच्चेतसि ध्यायतो,
यत्स्मृत्वैव पुरा पुराणपुरुषोऽपीच्छावतारान्दधौ ।
यज्ज्योतिः परमं निधाय हृदये तेपे तपोपीश्वर-
स्तस्मै मङ्गलमूर्तये त्रिविबुधाराध्यैक ! तुभ्यं नमः ॥१॥

वेदाज्ञापरिपालनाय जगतो निःशृंखलस्य स्थितौ,
यश्चक्रे श्रुतिसम्मतार्थकलना नाना पुराणस्मृतीः ।
आचारव्यवहारमस्य कृपया सत्यं परं दर्शयन्,
संसारार्णवतारणो विजयते सोयं मुनीनां गणः ॥२॥

यस्योपदेशवचनौषधभक्तिपथ्य-
प्रायो निसेवननिरस्तसमस्तमोहः ।
विद्वत्सभामुप विवक्षुरिवास्मि तस्मै,
विज्ञानकल्पतरवे गुरवे नमोऽस्तु ॥३॥

जम्बूद्वीपान्तरालावधिकमलदृशो चास्ति कर्णस्य भूषा-
वर्षेऽस्मिन भारताख्ये जनपदनगरी नागरी मौलिमाला ।
यस्याश्चाग्रे समग्रा विबुधवसतयः किं पुनर्यक्षपुर्यः
सेयं ढिल्लीमतल्ली वरधरणिभुजां राजते राजधानी ॥४॥

आसीत्तैमूरनामा चतुरुदधिधराधीश्वरो यश्च गन्ता,
मीरासाहाभिधानस्तदनु सुतनयस्तस्य राजाधिराजः ।
तद्वा [ज्जः] सुल्तानमहम्मक्षितिपतितिलकोऽस्यात्मजोऽबूसयीदो, (?)
भूभृन्नक्षत्रचंद्रो रिपुकुलदलनोद्दामधामैकमल्लः ॥५॥

तदनु तत्तनयोऽतिपराक्रमः,
सकलराजगजोद्धतकेसरी ।
उमरशेख इति प्रथितो नृपः,
समभवत् नृपवंशविभूषणः ॥६॥

यवनवरचगन्तानामवत्ता समेह-
स्तिमुरनृपतिवंशे स्यौतकर्णावितंसः ।
निखिलधरणिचक्रे चक्रवर्त्यस्य सूनुः,
क्षपितरिपुगणोऽसौ बाबरोऽस्या वरोभूत् ॥७॥

तदीयतनयो नयोवितत [नयान्वित] पदे पदप्रक्षिप-
न्प्रतापपनावपैररिकुलं परं तापयन् ।
विचारचतुरः स्वयं गणकचक्रचक्रो यतो,
रराज हिमदीधितिच्छविवशा हुमाऊँ नृपः ॥८॥

तत्सूनुर्धर्ममूर्तिः सकलगुणनिधिः ख्यातकीर्तिप्रतापः,
शत्रूनुत्कृत्य सर्वानिखिलवसुमतीमण्डलाखण्डलोऽभूत् ।
गङ्गापानीयसिक्तप्रतिविपसलसत [पथविलसत], सत्यसंतान वल्लि-
श्चक्रे सप्ताङ्गराज्यं नृपतिरकबरः शाहजल्लालुदीनः ॥९॥

येन स्वल्पप्रसादादपि तृण लम [घ] वो निर्मिता मेरुतुल्या,
यद्दण्डत्रासतो न प्रबलतनुरपि स्वल्प सत्यश्चबाधे [सत्त्वं ववाधे] ।
यश्चातुर्वर्ण्यधर्म्माचरणबद्धमना रक्षको गोहिना [द्विजानां] नां ।
सोयं रेजे पृथिव्यामकबरतनय: श्रीजहाँगीरभूप: ।।१०।।

तत्पुत्र: प्रबलप्रचण्डविलसद्दोर्दण्डखण्डीकृता-
रातिव्रातधृतातिनिर्मलयश: प्रक्षालितक्ष्मांबर: ।
प्रत्यक्षप्रतपत्प्रतापतपनध्वस्तान्धक[का]र व्रज:,
श्रीमान्शाहजहाँ समस्तजगती राजधिपो राजते ।।११।।

द्वेष्येऽभीष्टे भवति समता न्यायमार्गेण यस्व,
प्रायो नीत्या पशुमृगखगांसर्वं.....।
जानेतित्वा [किंवा] सकलकमलां षड्गुणैर्भूपतीनां,
सद्यो जेतुं मनसि यतता शक्तिभिर्लोकपालान् ।।१२।।

साम्ना साधून्वशयति तथा दुर्गतान्द्रव्यदानै-
र्भेदैरन्यान्नयति वशतां भेदसाध्यान्नृपालान् ।
दण्डैर्दंड्यान्विपथपथिकान्दण्डयत्येव योऽसौ,
सर्वोपायप्रखरचतुरो राजते राजराज: ।।१३।।

तस्यामात्यगणेषु भेषु विधुवद्वृक्षेषु कल्पद्रुवत्,
पृथ्वीभृत्सु सुमेरुवद् ग्रहचये ध्वान्तक्षद्विम्बवत् ।
यो यक्षेषु कुबेरवत्सुरगणे देवेन्द्रवत्भात्यसौ,
मन्त्री वासफखाँ बृहस्पतिसमो वर्वर्ति सर्वोपरि ।।२१।।

तेजोभिर्द्युतिमान्विशुद्धमतिमद्भावात्कलानां निधि-
र्दश्वा मंगलमूर्तिरेव विबुधैर्बुद्धया बुधो बुध्यते ।
ज्ञाचिद्ये [साचिव्ये] न गुरु: कवि: सुवचनैर्मन्दोऽपकारे सतां,
सोऽयं वासफखाँ विभाति भुवने सर्वग्रहात्मा कृती ।।२२।।

यो राज्याह्वयमण्डपस्य सुदृढ: स्तम्भ: स्थितो निश्चल:,
संसारार्णवधर्मपोततरणे य: कर्णधार: क्ष [कृ] ती ।
य: पृथ्वीपतिरत्नयोज्यकनकं भूपार्थशब्दोऽथवा,
सोऽयं वासफखाँ विभाति सकलान्वर्णाश्रमान्पालयन् ।।२३।।

तस्य प्रेरणया नृपालमुकुटालङ्कारचूडामणे-
र्मामाज्ञापितवान्सुतन्त्रकरणे लोकोपकाराय यत् ।
श्रीमत्साहजहांप्रकाशममलं सिद्धान्तसिन्धुं स्फुटं,
निस्यानन्द इति प्रसिद्धगणकः कर्तुं समीहे ततः ।।२४।।

सत्यं सत्यपयोनिधे तव यशो मुक्ताफलानां गणा-
स्तेजोरत्नचयाश्च कुत्र न महीपृष्ठे विकीर्णा स्थिताः ।
किं ते तान्गुणवत्तयेव सुधियो बध्वा स्वकीयैर्गुणैः,
कण्ठेषु श्रवणेषु च त्रिजगतामाभूषणीकुर्वते ।।२५।।

अपारसंसारगभीरनीरधौ, स्वतन्त्ररत्नानि कियन्ति सन्ति न ।
तथापि दृक्प्रत्ययकारखेचरं, तनोमि तन्त्रं यवनोक्तियुक्तिभिः ।।२६।।

यत्किञ्चित्कथितं मयाऽत्र विशदं तत्रास्ति यो विस्तरो,
बालानामवबोधनाय तदहो दोषो न मे दीयताम् ।
एतस्मादपि यावनेऽधिकतरस्तन्त्रोत्तमे विस्तरः,
किं वा किं भयमत्र तन्त्रविदुषां ब्रह्माण्डविज्ञानिनाम् ।।२७।।

ये केचिज्जडबुद्धयोऽपि गणितं ज्ञातुं विधातुं तथा,
किं वा तन्त्रविचारसारचतुराः सद्बुद्धयोऽपि स्वयम् ।
किं वा मध्यमबुद्धयोपि गणका वाञ्छन्ति चेल्लीलया
सिद्धान्तं यवनोक्तियुक्तिकमिमे सर्वे फुटन्तु स्फुटम् ।।२८।।

प्रत्येकलिप्तागणितं सुसूक्ष्मं, सद्वास्तवं वासनया समेतम् ।
अस्माभिरस्मिल्लिखितं समस्तं, विलोक्यतां सद्गणकैः प्रवीणैः ।।२९।।

यदवद्यमिहोदितं मया भ्रमतस्तद्विबुधैर्विभूष्यताम् ।
न भवन्ति कदापि सज्जना गुणवन्तः परदोषसंग्रहाः ।।३०।।

पञ्चाष्टभूपोम्मितसौरवर्षैः १६८५, श्रीविक्रमार्कस्य शके गते (सौ) ।
तस्थौ समस्तक्षितिपालसिंहः, सिंहासने शाहजहांनरेन्द्रः ।।३१।।

श्रीशालिवाहनशको . गतस्तदैव,
व्योमाक्षपञ्चशशिभिः १५५० स्फुटसौरवर्षैः ।
जल्लालदीननृपतेरपि वर्तमानः,
शाकः खपञ्चविशिखैरिह ५५० सौरवर्षैः ।।३२।।

CLOSING & COLOPHON :

यः श्रीशाहजहाँनृपालमुकुटालङ्कारचूडामणि-
स्तस्याज्ञामवलंब्य दुस्तरममुं सिद्धान्तसिन्धुं तरन् ।
नित्यानन्द इति द्विजोत्तमकृपः [कविः] श्रीदेवदत्तात्मज-
स्त्रिप्रश्नप्रचुरोक्तियुक्तिसहितं काण्डं द्वितीयंह्यगात् ।

x x x

5419/2960 अमरभूषणम्

OPENING :

श्रीगणेशाय नमः ।

प्रणिपत्य महादेवं, शारदां च गणेश्वरम् ।
वक्ष्येऽहं ज्योतिषं शास्त्रं बालानां बुद्धिवर्द्धनम् ॥१॥

विलोक्य नाना मुनीनां मतानि,
संशोधितं सारसुसंग्रहं च ।
कुर्वे हितार्थं द्विजबालकानां
अबोधिनां सद्यप्रबोधनाय ॥२॥

शास्त्रे शूरश्च दातारं,
पृथ्वीपालनतत्परः ।
अमरसिंहो महाराजः,
क्षत्रियाणां नायको महान् ॥३॥

तन्नाम्ना च कृतो ग्रन्थः,
पूर्वशास्त्रानुसारतः ।
बालानां च विनोदाय,
बुद्धिवर्द्धनहेतवे ॥४॥

CLOSING :

शक्तिसिंह कुले जातः, प्रवरसोहमात्मजः । [प्रवरसेनोहमात्मजः]
अमरसिंहस्य तन्नाम्ना ग्रन्थश्चामरभूषणम् ॥१०५॥

COLOPHON : इति श्रीमहाराजाधिराजगोब्राह्मणप्रतिपालकअरिमानमर्दकचतुर्दश-विद्याविनोदरसिकमहाराजाश्रीअमरसिंहजी, एतन्नामानुसारेण अमरभूषण-नाम्निग्रन्थे राज्ञाभिषेकप्रकरणं नाम चतुर्दशमे ।

Post-Colophon : समाप्तोऽयं (ग्रंथः) शुभमस्तु । सम्वत् १९१३ श्रावणकृष्णा ५ ।

x x x

5452/2649 करणप्रकाशः

OPENING : श्रीगणेशाय नमः ।

ब्रह्माच्युतत्रिनयनार्कशशाङ्कभौम-
सौम्येज्यशुक्रशनिवागधिपागणेशान् ।
नत्वाहमार्यभटशास्त्रसमं करोमि,
श्रीब्रह्मदेवगणकः करणप्रकाशम् ॥१॥

CLOSING : आसीत् पार्थिववृंदवंदितपदांभोजद्वये माथुरः,
श्रीश्रीचन्द्रबुधो गुणैकवसतिः ख्यातो द्विजेन्द्रः क्षितौ ।
नत्वा तस्य सुतोऽङ्घ्रिपङ्कजयुगं खण्डेन्दुचूडामणे-
र्वृंते स्पष्टमिदं चकार करणं श्रीब्रह्मदेवः कृती ।

COLOPHON : इति श्रीब्रह्मदेवगणकविरचिते करणप्रकाशे ग्रहयुद्धाधिकारो नवमः ॥ समाप्तश्चायं ग्रन्थः ॥

सायकसायकभूधरभूमितशाके समाप्तिमायातः ।
करणप्रकाशनामा शुक्ले षष्ठ्यां तपस्यमासे ॥

Post-Colophon : सं० १९०९ भा. कृ ११ । शुभं भूयात् श्री ।

x x x

5456/2772 कुण्डलीकल्पतरुः

OPENING :

श्रीगणेशाय नमः ।

श्रियं वक्रतुण्डं गुरून्सूर्यमुख्यान् ।
ग्रहान्पद्मजं पद्मनाभं सुरेशम् ।
हृदाहं च नत्वा नराणां हिताय,
प्रकुर्वे फलं भावजं सूक्तिव्यक्तम् ॥१॥

यथा कुण्डलीदर्शनादेव लोके,
वदेत् भावि भूतं तथावर्तमानम् ।
वयं प्रेरिताः श्यामनदैः (?) सर्ग-
स्था (?) कुर्महे कुण्डलीकल्पवृक्षम् ॥२॥

शरीरात्सुखं पूजनं चिह्नरूपे,
वयोवर्णमाने गुणान्देहदुःखम् ।
ततो मस्तकं वस्तिकण्ठौ च पूर्वा,
दिशं शत्रुमृत्युं, तथा मातुलेयान् ॥३॥

CLOSING :

मुनिमिते भवने च तदोर्ध्वगे,
गणकचक्रवशात् वद निर्भयम् ।
त्रिविधकालकृतं च शुभाशुभं,
गुरूपदेशकृपावशतो वदेत् ॥२२॥

सुगमशास्त्रजा होरा, निबद्धा शिष्यबुद्धये ।
सुगमं प्रीतये लोके, सिद्धये भवति नृणाम् ॥२३॥

विगतगर्वचयश्चतुर स्वयं,
पठति स्वादरतः कृपया गुरोः ।
गणकचक्रचये च शिरोमणि-
र्भवतिभूतलनाथदृशा धनी ॥२४॥

गुर्जरे गुरुतरेतिसुदेशे,
नारदीयपुरवासविलासी ।
(ढाग) ईश्वरपदे च यदीयं,
नाम तेन कृत एष निबन्धः ॥२५॥

COLOPHON : इति श्रीकुण्डलीकल्पतरौ द्वादशभावज्ञानप्रकाशशाखा ॥ समाप्ता ॥

x x x

5502/2930 ज्योतिष्केदारः

OPENING: श्रीगणेशाय नमः ।

तत्त्वं ज्ञानात्मकं दिव्यं ज्ञानगम्यं सनातनम् ।
भेदं प्राप्तं विहारार्थं तं नमामि परं महः ॥१॥

ज्योतिष्केदारं संहितागणितहोराप्रश्नलग्नाढ्यम् ।
करोति सारसहितं कृपाशंकरः शिशुबोधनाय लघुम् ॥२॥

CLOSING: ज्योतिष्केदारजातं फलममृतसमं, ह्यश्नतो लोकपूज्या-
स्तस्मास्वीकार्य एषः सुविशदहृदयैः पण्डितैः शास्त्रविद्भिः ॥
तैरस्मिन्दृष्टदोषो न भवति गुणवत्तिक मणौ लग्नलोह-
मग्नेस्वीकुर्वतां मे बहुशतनतये कोटिपां(पं)चाञ्जलिर्वा ॥७७॥

शकेष्टवस्वंगशशीमिते च १६८८, त्रिद्व्यष्टचंद्रे १८२३ नृपविक्रमाब्दे ।
सौम्यायनेऽर्के किल माघमासे, शुक्लच्छदे सौम्यदिने च षष्ठ्याम् ॥७८॥

श्रीमन्महारावगुमानसिंह-राज्ये तथा मालवके च देशे ।
चर्मण्वती पूर्वतटस्थिते च, कोटाभिधाने नगरे विशाले ॥७९॥

सहस्रौदीच्यजातीयो द्विवेदीत्यवटंकः ।
भार्गवो देवकृष्णोऽभूच्छाजूरामश्च तत्सुतः ॥८०॥

तत्सूनुना कृतो ग्रन्थः कृपाशङ्करशर्मणा ।
बालानां सुखबोधाय स्वेष्टदेवार्पणं शुभम् ॥८१॥

COLOPHON : इति श्रीमद्दैवज्ञछाजूरामसूनुकृपाशङ्करविरचिते ज्योतिष्केदारे प्रश्नवल्ल्यां प्रश्नप्रकथनं नामः द्वितीयः पल्लवः ॥

x x x

5503/2940 ज्योतिश्चन्द्रार्कः ।

OPENING : श्रीगणेशाय नमः ।

श्री गौरी वचसां प्रियै स्वविधया ध्याता ध्रुवं मानसे,
सूर्याग्नींदव एव जन्म [न्य] नुकलाः सर्वार्थसिद्धयै सदा ।
ब्रह्माण्डानि पराद्धभूरिगुणितान्युद्यंति यत्र स्फुटं,
बीजानीव वटेस्त्वनंतमहिमा श्रीभूतिवाक्सिद्धये ॥१॥

श्रीविश्वमूर्तिं त्रिजगद्भवादेर्निमित्तमूलं प्रणिपत्य भानुम् ।
यद्दर्शने संस्कृतियत्नसिद्धिदे, विप्रप्रमोदो जगतः प्रबोधः ॥२॥

काश्यां हि गङ्गाधर बोधितोऽसौ,
ब्रह्मर्षिविद्वत्कलितं सुबुद्ध्या ।
विद्वन्महादेवजरुद्रदेवो,
ज्योतिः सुधांश्वर्करुचिं व्यनक्ति ॥३॥

CLOSING : यो वेदवक्तृकुशलोऽभिधकाव्यतर्क-
साहित्यवित्सहृदयः श्रुतिमौलिनिष्ठः ।
सिद्धान्तबीजगणितागमसन्मुहूर्त-
सामुद्रशाकुनविदूहतु मच्छुभं सः ॥४७॥

हिमांचले या तस्यू स्साक्षिजा,
शिवः पिनाकीश इतोस्ति पश्चिमे ।
तत्कौशिकी पूर्वनगेस्ति मल्लिका,
तत्राश्रयः श्रीगणकाग्रणीरभूत् ।।४८।।

पुरंदरो यः स्वशिरोहविर्भुजि,
जुहाव काश्यां पठितो हि तत्सुतः ।
पद्माकरो भूपनतोऽप्रतिग्रही,
हरीश्वरस्तत्तनयः सुसाधुधीः ।।४९।।

हेरंबनाम्नास्य सुतः सुवैद्यविद्-
घोरामणिबाजबहादुरार्चितः ।
तज्जो महादेव इतीवसा [इवास] सत्कृतो,
वागीशकाश्यां स्वतनुर्यं [तनुं य] उज्जहौ ।।५०।।

—त्रिभिः कुलकम् ।

यं [यः] श्रीमाहेन्द्रमत्यामजनि सुगणकः श्रीमहादेवशर्म्मा,
काश्यां सर्वस्वदीपः कविवरगणितो वैद्यनाथप्रसादात् ।
गायत्रीश्रीशविद्या मधुत (?) हि हृदयं श्रीप्रयागादिपीठे,
गोविप्रस्त्रीसुरेज्याङ्घ्रिषु नमितशिरा एकपत्नीव्रतोऽसौ ।।५१।।

काश्यां हि गङ्गाधरबोधितोऽब्रवीत्,
कूर्माचली योगिरसः कुलाग्रणी ।
शाकेऽष्टवेदर्तुधरा १६४८ मितेऽर्थदं-
सर्वोपकाराय मुनीरितादमुम् ।।५२।।

वर्षेशाद्ययनर्तु मासादिवसैर्योगं मनोर्ह्राणो,
मानं तिथ्यहनी भयोगकरणैर्मौहूर्त्तलग्नांशकः ।
खेटर्क्षस्फुटवर्गभावगमना दुर्वस्तपूर्वाखिला,
दोषा ग्राह्यगुणा नृदिविषया मौहूर्त्तवेक्षः खिलाः ।।५३।।

स्मृत्वाद्यं जनुषि ग्रहादिजफलं योगा दशाब्द फलं,
शंकुजतिकनामकर्मपुरतोभप्रासचौलव्रतम् ।
सामुद्राणि च लक्षणानि रमणीपाणिग्रहो भूभुजां,
नीतिः साद्भुतवर्णनान्वधरणीगोलः फलं कू[क]र्मजम् ॥५४॥

युद्धानां विषयोगप्रश्नकथनं सद्वंशचारेश्वराः,
बालाद्या अथ कोटचक्रकलनं सच्छत्रसिंहासनम् ।
स्वप्नाङ्गस्फुरणानि शाकुनफलं यात्रादिगीशावनं,
यात्रायाः समयः सयोगशकुनः प्रस्थानसंकीर्तनम् ॥५५॥

वास्तव्यावनि वीक्षणं द्विजनृपादीनां च वेश्मो दिशे,
विस्मायव्ययवक्त्रशालरचना दिक्पालवास्त्वर्चनम् ।
प्रविश्य [आवश्यं] रविसंक्रमोम्बुदकथात्रार्थं फलं गोचरं,
खेटानां क्रमशोऽष्टवर्गजफलंचक्रे हि सौदर्शने ॥५६॥

आयुर्दायमिहाब्दमासदिनजात्याकाद्भुतस्वाप्निकं,
प्रश्नाद्यं हि समीरितं च त्रिशरा तत्सर्वतोभद्रकम् ।
दोषावासविधिष्वरिष्टकलनं छाया न रायं फलं,
सर्वात्मेशतया ग्रहार्चनमिहेंद्वर्कद्युतौ कीर्तितम् ॥५७॥

संज्ञाहे यो मिश्रसंस्कारकांतो-
द्वाहे यात्रावास्तुखेटप्रचारः ।
अष्टौ षड्भिश्चित्रिता ज्योतिषाङ्गै-
रध्यायास्तैः श्रीशदेवद्विजेष्टः ॥५८॥

COLOPHON: इति श्रीज्योतिर्विद्द्रमणिकृत-ज्योतिश्चन्द्रार्कग्रन्थः समाप्तिमगात् ।

x x x

5518/2931 ज्योतिःसार-सागरः

OPENING : श्रीगणेशाय नमः ।

यस्मिन्नभ्युदितेऽभ्युदेति भुवनं यत्रास्तभाजि, व्रज-
त्यस्तं ध्वस्तसमस्तदुस्तरतमस्तोमाऽब्धिपूरोदरे ।
यद्दोषागमने तनोति सदृशामाशु प्रसन्नां दृशं,
ज्योतिर्भ्रान्तिहरं हरेस्तदमलं भूयात्सतां भूतये ॥१॥

अनेकतंत्रसिद्धान्तनितान्तासक्तचेतसाम् ।
ज्योतिर्विदां मुदेऽस्माभिः क्रियते सारसागरः ॥२॥

माण्डव्यगर्गादिमुनिप्रणीतं,
ग्रन्थार्थतत्त्वं विदुषां वचांसि ।
आचिन्वतो लल्लवराहभोजा-
दीनां न मे चापलमस्ति तत्र ॥३॥

COLOPHON : इति श्रीहरिलात्मज·····श्रीमत्कीर्त्तिकरकृतौ ज्योतिःसारसागरे यात्रा-निर्णयो नाम पञ्चमस्तरङ्गः ।

Post-colophonic : संवत् १९१० । लेखक माधो ।

* * *

5522/2626 ज्योतिषसिद्धान्तसार

OPENING : सिन्दूरारुणभालं कालं विघ्नस्य शर्मगणपालम् ।
मोदकपूरितवदनं सत्सुखसदनं नमस्यामः ॥१॥

कर्माण्युत्तरभव्यान्युदयाद्यस्य क्षितौ प्रवर्तन्ते ।
लोकानामयमात्मा त्रयीतनुः श्रीरविर्जयति ॥२॥

जय जय भारति भव्ये विचित्रवेषे विभूषिताशेषे ।
कविजनवदनविभूषे प्रतिशयितानंदमञ्जूषे ॥३॥

जयति श्रीगुरुचरणं, मादृशजडवर्गजीवनं शरणम् ।
हरणं स्वहृदयतमसां करणं सज्ज्ञानसंपत्तेः ॥४॥

सहृदयहृदयसरोजं विकासयंति स्वपुष्टतरसुकरैः ।
परिपूरितजगदाशा जयन्तु जीवन्तु मित्राणि ॥५॥

कथमहमेकरसनया सज्जनगणगौरवर्णनं कुर्याम् ।
श्रीव्यासो वाल्मीकिः क्षमो गणेशोथवा शेषः ॥६॥

प्रतिविचित्रशक्तिभाजो संतो सन्तोषमुख्यस्य गुणवंतः ।
परगुणदोषारोपे पटवः कटवः क्षमान्विताः सन्तु ॥७॥

किमिह विशेष बहूक्त्या नामं नामं[क्ष]नृणादथ ब्रह्म ।
मालव-मथुरानाथस्तनोति वसुधाभ्रमीमांसाम् ॥८॥

CLOSING :

प्रति हि कठिनं ज्योतिःशास्त्रं ततो विषयो ह्ययं,
किमिह सुतरां बोध्यं शोध्यं मनुष्यचतुष्पदैः ।
जगदधिपतिर्ब्रह्माविष्णुस्तथा च सदा शिवो,
निजकृतिमिमां वेदव्यस्तान्तरीमतमां गुरुः ॥१०९॥

यद्वै हैयतुहैपतेति यवनैरुद्घुष्यते प्रायशो।,
यद्ज्ञानादखिलैतदंगकुशलोऽत्रत्योऽथवा गण्यते ।
तच्चेदं गुरुपादपद्मयुगले, भृङ्गायमानः सदा,
शुक्लोपाह्वयमालवीयमथुरानाथो मुदेऽवीभवत् ॥११०॥

पूर्वं यद्यपि संस्थितिस्त्रिविधयस्रोतस्विनीरोधसि,
श्रीमत्पाटलिपुत्रनामनगरे विद्वज्जनोपाश्रये ।
तत्राप्यालमगंजनामसुपुरे ज्योतिर्विदा धीमता,
ब्रह्माङ्घ्रेः स्वपितामहस्य विमलभ्राजत्सदाचारिणः ।।१११।।

अन्वर्थं प्रथितं जगत्पथसदानंदाह्वयं बिभ्रतो,
ह्यासीदस्ति तथाप्यनेकदिवसैः श्रीविश्वनाथाज्ञया ।
काश्यां श्रीमदशेषपेशलधियां वंद्यस्य राज्ञां गुणै-
र्गुण्य श्रीयुतडा[भा]लचन्द्रनृपतेः सङ्गे विचिता स्थितिः । ११२।।

तत्राहं द्विज ईशप्रेरितधिया छात्रान्समध्यापय-
न्नासेन्नाखिलभूनभः स्थितिगतेः शास्त्राणि प्राङ्मूलयोः ।
तांस्त्वैतद्विषयोक्तपेशलधियो दृष्ट्वा नृपाज्ञाभव-
न्मच्चित्ते च भवेत्सुहैयतवपुर्गीर्वाणवाण्या ऋजुः ।।११२।।

त्यक्त्वा तत्र दुरूहदुर्घटपदं तस्योपपत्तिं बहुं
स्वल्पं सारमिदं च बालजनताबोधाय पूर्णं व्यधात् ।
ज्ञात्वैतत्प्रभवेच्चमत्कृततरा सूक्ष्मास्य बुद्धिर्यदि,
स्यादेवाखिलशास्त्रकष्टनिरपेक्षो यं सुधीर्वंदितः ।।११४।।

अपूर्वेयं विद्या यदियमतिकष्टादतिबला-
त्परेषां सच्छास्त्रादमिनजलधेः श्रीरिव मया ।
प्रकाशं सन्नीता[ह्य]तिशयितविनीतापुनरियं,
सदानंदायास्तां जगदधिपतेः श्रीयुतगुरोः ।।११५।।

वेदाभ्रनगभूगण्ये शके जेष्ठसिते कुजे ।
समाप्तिमगमद्ग्रन्थस्तिथौ विश्वसृजः शुभः ।।११६।।

COLOPHON : इति श्रीमद्विविधविद्याविनोदितान्तःकरणाखिलगोलगणितविदावलीनीराजितचरणपीठश्रीमद्गुरुनाथाङ्घ्रिसरोजमधुपमालवीयशुकलमथुरानाथविरचितो ज्योतिः सिद्धान्तसारः समाप्तिमकारणीत् । शुभं भूयात् ।

Post-colophonic : मिति भाद्र पद कृष्णापक्ष ४ संवत् १९१२ ।

x x x

5523/3009 ठाकुरदासविलासः

OPENING : श्रीगणेशाय नमः ।

श्रीमन्मङ्गलमूर्त्तिमातिशमनं विघ्नौघविध्वंसनं,
स्वान्तध्वान्तविदारणं कुजविदां ज्ञानोद्गतेः कारणम् ॥
सिन्दूरारुणशुण्डमिन्दुशकलप्रोल्लासिमौलिस्थलं,
वन्देऽहं सुरवृंववंदितपदं देवं द्विपेन्द्राननम् ॥१॥

विश्वं स्थावरजङ्गमं सृजति यो रक्षत्यजस्रं ततो,
भूयस्तं हरति स्वयं विरचितं ब्रह्माच्युतस्थाणुभिः ।
श्रीसूर्यादिनवग्रहैर्भगणगैर्नित्यं जगत्पूजितैर-
लोके यच्छति यः शुभाशुभफलं कालाय तस्मै नमः ॥२॥

श्रीमल्लक्ष्मणपत्तनान्मनु १४ मितक्रोशान्तरेऽवाग्दिशि,
व्यक्तं श्रीरघुवीरसंज्ञकपुरं वर्वर्ति सर्वार्तिहृत् ।
इभ्योद्भासितरम्यहर्म्यमभितः सभ्यास्पदैः शोभितं,
वापीकूपसरोभिरर्चितपदैर्देवालयैश्चावृतम् ॥३॥

योजनद्वयविहारिणी ततो जाह्नवी सकलपापहारिणी ।
तद्गतश्रुतिविबुद्धतध्वनिः शृण्वतीव मुदिता तरङ्गिता ॥४॥

यस्याः कारणमच्युताङ्घ्रिकमलं धातुश्च पात्रे स्थितिः,
श्रीकण्ठस्य जटासु मेरुशिखरे काश्यां प्रयागे तथा ।
प्राच्यां सागरसङ्गता प्रतिपदं या भुक्तिमुक्तिप्रदा,
सा गङ्गा रघुवीरपूर्वकपुरे सद्भिः सदा सेव्यते ॥५॥

CLOSING :

ज्योतिःसिद्धान्तवेत्ता सकलगुणयुतः शीलसौजन्यसिन्धुः,
विश्वामित्रान्वये श्रीनरहरिरभवन्मालवत्यां नगर्य्याम् ।
द्वौ पुत्रौ तस्य जातौ नयनसुख इति ज्येष्ठ आसीत्कनिष्ठो,
हीरानन्दोऽस्त्युभावप्यखिलफललसज्जोतिषज्ञाननिष्ठौ ॥१८॥

आज्ञप्तो जयसिंहभूमिपतिना सूर्यादिकान्खेचरान्,
यन्त्रैः स्पष्टतरान्विधाय विविधैर्घृत्वा खगोलं स्फुटम् ।
सिद्धान्तं जयसिंहकोस्तुभामिति ख्यातं च जीवं नवं,
पूर्वं पण्डितराजनामपदवीं दिल्लीश्वरादाप्तवान् ॥१९॥

गर्गाद्यैर्गदितास्तथामुनिवरैर्व्यक्ता वसिष्ठादिभिः,
सर्वैराद्यनिकैर्विचार्य रचिता ये ये निबन्धा बुधैः ।
तांस्तान्वीक्ष्य मुहुः प्रणम्य गणपं वाणीं गुरुं च क्रमा-
द्धीरानंद इमं चकार रुचिरं ग्रंथं तदर्थानुगम् ॥२०॥

दृष्ट्वा तत्त्रिविधं समस्तफलदं ज्योतिष्प्रबन्धं ततः,
स्कन्धं सांहितिकं विचिन्त्य सुतरां श्रेष्ठं चतुर्वर्गदम् ।
श्रीमठ्ठाकुरदासभूपतिमुदे ग्रन्थः कृतोऽयं मया,
वृत्तैर्जातकताजकादिगणितप्रोक्तप्रकारान्वितैः ॥२१॥

यावत्-श्रुतिस्मृतिपुराणकथातिपुण्या,
यावच्च रामचरितं रुचिरं विभाति ।
तावत्समुल्लसतु ठाकुरदासनाम्ना,
ग्रन्थो विलास उदितः (सततं) पृथिव्याम् ॥२२॥

येन श्रमेण रचितोऽच्युचतारुवृत्तं-
ग्रंन्थो मयैष न हि कोऽप्यपरोऽस्य वेत्ता ।
त्वामन्तरेण विदुषां रसनासने तु,
सम्यङ् निवेश्य करुणालय ! पालयस्व ॥२३॥

अथ ग्रन्थसमाप्तिसूचकं पद्यं बीजगणितेनोच्यते–

यो राशिर्गुणगुणितोमकरसहितो घनं भवति ।
घनमूलं वर्गीकृतमग्निः उर्विनिघ्न कृतिः संका ॥२४॥

राशिर्वाजिगजा ८७ हतः ससहितो विश्वैस्तु १३ संवत्सरो,
मा: पक्षस्तिथिवारभप्रभृतयो विश्वो १३ नराशः समाः ।
ठाकुर्दासविलासउद्यतपदो ग्रन्थोऽत्रे घत्ते शुभे,
हीरानंदकृतः सदा विजयतां विद्वज्जनैः पूजितः ॥२५॥

अथ ग्रन्थसमाप्तिसूचकं पद्यम्–

वाय्वाकाशमुनींदुभिः १७०५ परिमिते शाके तथा कार्तिके,
मासे कृष्णदलेन शंकरतिथौ पुष्यार्कयोगे शुभे ।
ठाकुर्दासविलासनाम्नसहितं ग्रन्थं मुहूर्तैर्वृतं,
हीरानंदबुधोऽत्र पूर्तिमनयत्पञ्चाङ्गशुद्धे दिने ॥२६॥

श्रीमठ्ठाकुर्दासभूभृद्विलासे,
हीरानन्दप्रोक्तवृत्तप्रकाशे ।
ग्रन्थेऽन्वर्थे [न्विते] संहितास्कंधसारः,
संपूर्णोऽयं शुद्धिपूर्वोऽधिकारः ॥२७॥

COLOPHON: इतिश्रीदैवज्ञवर्यनरसिंहतनयहीरानंदविरचिते ठाकुर्दासविलासे शुद्धिनिरूपणतिथिवर्ज्यशाकाद्यधिकारः १६ समाप्तः ।

x x x

OPENING : **5552/2792 ताजिकरत्नाकरः**

तमोगुणा विनाशिनी सकलकालमुद्योतिनी,
धरातलविहारिणी जडसमाजविद्वेषिणी ।
कलानिधिसहायिनी लसद(ति)लोलसौदामिनी ।
मदन्तरविलम्बिनी भवतु कापि कादम्बिनी ॥१॥

कालो व्योमकरोदयो व्यवहृतिर्यात्राप्रवेशः स्वर-
स्तिथ्याद्यानयनं च वत्सरफलं भूव्योमगोलाकृतिः ।
पश्चाज्जातकताजके शकुनकः प्रश्नाश्च सकीर्णकं,
रत्नैरेभिरितश्चतुर्दशमितैर्दैवज्ञरत्नाकरः ॥२॥

ज्योतिर्वर्त्मनि लक्ष्यलक्षणकृते न्यायादिशास्त्रोल्लस-
द्बुद्धिविशुद्धकौतुकतया श्रेयान्मया निर्मितः ।
यः सिद्धांतगभीरनीरनिचयो दैवज्ञरत्नाकर-
स्तस्मात्ताजिकरत्नमुद्गतमिदं भूदेव भूषायताम् ॥३॥

दृष्ट्वा ताजिकभूषणं गणपतेर्गौडस्य चूडामणेः,
सारं कल्पतरोस्तथैव गदितं श्रीनीलकण्ठस्य च ।
अन्येषां कृतिनां कृतानि बहुशः संवीक्ष्य निष्कृष्य च,
श्रेयो यद्बहुसम्मतं मतमिह ब्रूमः स्वपद्येन तत् ॥४॥

CLOSING वाग्देवीवदनादनादिरचनाविन्यास दीव्यन्नव-
द्वीपप्राप्तजनैरनेकदिवसं वाराणसीवासिनः ।
विद्यासागरजागरोन्नतमतैर्भाव्या ममैषाकृति-
र्विद्वद्भिः कृपया कयापि सहसा मात्सर्यमुत्सृज्यते ॥२८॥

द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतौ,
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत्कविः ।
नानाशास्त्रविदा तदात्मज चिरंजीवेन यन्निर्मितं
दिव्यं ताजिकरत्न सम्प [मस्य] दशमी पूर्णा प्रभाभूदियम् ॥२९॥

COLOPHON : इतिश्रीशतावधानभट्टाचार्यश्रुतदैवज्ञरत्नाकरोद्गते ताजिकरत्नाकरे दशादिफलप्रकाशिका दशमीप्रभा ॥१०॥

Post-colophonic : संवत् १९०९ ।

x x x

5603/2779 मिताङ्कु-विवरणम्

OPENING : श्रीगणेशाय नमः ।

सूरिः श्रीविश्वनाथो जगदुपकृतये सूर्यसिद्धान्तसारं,
संक्षिप्यातिप्रमोदादकृत करणं यन्मिताङ्काभिधानम् ।
स्पष्टीकर्तुं तदेतद्विवरणसहितं ताण्डवस्संविधत्ते ;
तल्लब्ध्वा चाङ्कविद्याजलनिधिविबुधागोष्पदं कल्पयन्तु ॥१॥

CLOSING : यद्युत्तरदिक्चिह्नमनन्तरभाव्यदक्षिणं दिक्चिह्नमन्तरभाव्यपूर्ववृत्तं-बहिस्थञ्च भवति तदा उत्तरशृङ्गोन्नतिर्ज्ञेया । यदा दक्षिणदिशमनन्तरभाव्योत्तरदिशमन्तरभाव्यपूर्ववृत्तं बहिस्थं स्यात् तदा दक्षिणशृङ्गोन्नतिर्ज्ञेया ।

COLOPHON : इतिश्रीताण्डवकविराजकृते मिताङ्कविवरणे शृङ्गोन्नत्यधिकारः समाप्तः ।

Post-colophonic : संवत् १८७९ शाके १७४४ का. फाल्गुनमासे शुक्लपक्षे तृतीयायां बुधवासरे ।

x x x

5604/2982 मुकुन्दविजय

OPENING: श्रीगणेशाय नमः ।

अविद्यातिमिरोच्छेदि विद्याकरसहस्रकम् ।
जगदानंदकंदं च मुकुन्दमिहिरं नुमः ॥१॥

कमलकुमुदबन्धू लोचने वारयन्त्या,
रहसि जलधिपुत्र्यालिङ्गिताङ्गः सलज्जम् ।
हृतवसनसुपीनोत्तुङ्गवक्षोजवीक्ष्या,
क्षुधित इव दिशत्वानन्दवृन्दं मुकुन्दः ॥२॥

विध्वस्तारिकुलान्धकारनिचयः श्रीभूपनारायणो,
दोर्दण्डप्रथितप्रतापविभवो भूमण्डलाखण्डलः ।
शौर्यौदार्यगभीरतागुणगणा श्रीष्टामराजाम्बुधे-
श्चन्द्रादप्यधिकः कलानिधितया श्रीचन्द्रसेनोऽभवत् ॥३॥

अर्थिभ्यः प्रतिवासरं वितरणादभोनिधेर्यद्यश-
श्चन्द्रोद्व्याहतभास्कराखिलकरः पूर्णोदयः सर्वदा ।
दुर्गाधीशविमर्दनात् इव महाराजाधिराजो गिरेः,
क्रुद्धो रुद्रपराक्रमो रणाभुवि श्रीरुद्रसेनस्ततः ॥४॥

तदीयतनयो नयैः पृथुरिवाभवत्पार्थिवः,
प्रशस्त्युदयपर्वतावधिधरान्तथा भूधरात् ।
सुरद्रुमनिरुद्यमं ददा(द)दशेषससेषकृ-
न्मनोरथफलप्रसूनूपमुकुन्दसेनोऽभवत् ॥५॥

साक्षान्मुकुन्दो धरणीमवाप्य,
लोकानशेषान्मुदितान्करोति ।
वाग्देवतायाः कमलालयायाः,
सीमाविवादाय वपुर्पदोयम् ॥६॥

तस्याज्ञया शेषमशेषबोधः,
कृतश्चतुर्धोदितसङ्गरस्थः ।
सतां मुदे श्रीपरमेशसम्य-
ग्विनिश्चयार्थं क्रमतेऽत्र यत्नः ॥७॥

ब्रह्मविष्णुशिवयामलागमा-
नाकलय्य गिरिजानुशासनम् ।
रच्यते स्वरविदां सुखावहः
श्रीमुकुन्दविजयो जयोदयः ॥८॥

किं राजविजयेनात्रयुद्धकौशलकौतुकम् ।
मुकुन्दविजयादस्माद्बहुभेदस्वरोदयात् ॥९॥
अपूर्वा स्वरविद्योका गंभीरसमरार्णवे ।
धीरास्तरन्त्यधः मज्जन्त्युपरिसंस्थिताः ॥१०॥

यो भूपतिर्वसुमतीं वसुमान् ग्रहेयु-
र्वाञ्छत्यशेषचतुरङ्गचमूसमेतः ।
जित्वा रिपून् स्वरविदोप्यवमत्य नित्यं,
सन्तापमेति समरे विजयं कदाचित् ॥११॥

CLOSING

श्रीमार्त्तण्डपुरे समङ्गलपुरान्तर्वर्तिनी प्रोल्लसत्-
यज्ञागारविभूषितेसूनिवसनविद्वद्विवादोदये ।
अब्दे चन्द्रनवासुगेन्दुगणिते (१५९१) श्रीविक्रमे भूभृता,
भूत्यै श्रीपरमो मुकुन्दविजयं ग्रन्थान्वबध्नादमुम् ॥

COLOPHON :

इति श्रीमन्मुकुन्दविजयसमाप्तिमगमत् ।

x x x

5646/3020 योगरत्नावली

OPENING

ओं नमः श्रीवक्रतुण्डाय ।

या सूक्ष्माकृतिभेदतस्त्रिजगतां चित्ते परोद्भासते,
वर्णाद्यात्मकतामवाप्य रुचिरांधत्ते तनुं भूयसीम् ।
वेदाद्यात्मतया विचाररुचिरं सा तत्त्वसंदीपनं,
कुर्वन्ती कविभारती भवतु नो भव्याय भव्यात्मिका ॥१॥

यदर्द्धाङ्गे नारी विलसति परा कान्तिनिलया
परागं पुंरूपं जयति च जटाजूटरुचिरम् ।
सदा शृङ्गाराङ्गं वहति वपुषा यस्त्रिभुवने,
नमस्तस्मै कस्मैचिदधिककलायेन्दुशिरसे ॥२॥

वाणीमध्यममत्कणादरचितां सम्यक् जगौ गौतमीं,
यो बुद्ध्या समजीगमत् फणिपतेर्वाच्यं रहस्यामृतम् ।
मीमांसा प्रथमोत्तरामधिजगे सद्धारतीं भारती-
मज्ञासीद्विबुधस्तुतो विजयते श्रीजीवनाथप्रभुः ॥३॥

सूर्यान्वये समुत्पन्नाः क्षितिज्ञा वेदवर्मदाः ।
तेषां मध्ये महावीरो वक्षतेशो नृपोऽभवत् ॥४॥

श्रीगजहयरथपूर्वैर्वहिनैः शोभमानो,
विजितरिपुगणोऽसौ सर्वदिक्षु प्रसिद्धः ।
बहुधनयुतकोशो वीर्यवानुग्रतेजो,
जयति नृपकुलेशो भूमिभूपालवन्द्यः ॥५॥

आकर्णाकृष्टधन्वा समरविजयिनः शात्रवानेकराव-
क्षोणीपालान्विजित्य द्विरशनविषमैर्बाणवर्षैर्हठेन ।
यः पृथ्वीं निःसपत्नामुदधिकलयितां पालयामास निर्भीः,
सूत्रामेवामराणामधिकसुखयुतो नाकराज्यं चिराय ॥६॥

तत्पुत्रो बलवन्तसिंहधरणीपालोऽग्रणी धन्विनां,
दीनानां सुरभूरुहः सुकृतिनां ज्ञातिः कलाजन्मभूः ।
शास्त्राणां मुकुरं द्विषामपि यमः स्त्रीणां प्रसूनायुधः,
वीराणां प्रथमो नरेन्द्रपदवीमध्यास्य सर्वाधिकः ॥ ७ ॥

खड्गे श्रीबलवन्तसिंहनृपतेः कोषो विमुञ्चत्यहो,
शत्रूणां निवहो विमुञ्चति बलात्कम्पं दधाने सति ।
सत्कम्पं भजति प्रतिक्षितिभुवां वर्गोऽपि किं ब्रूमहे,
निःशङ्कं त्यजति क्षमामरगणैः संत्यज्यते हि क्षमा ॥ ८ ॥

तस्मिन्श्रीबलवन्तसिंहनृपतौ दानादरे वासरैः
स्वर्णाद्रिः कतिचित्प्रमास्यति परिक्षीणत्वमित्याशया ।
मोदं याति रथाङ्गनामयुगलं सोऽपि स्वहस्तार्पितै-
र्दानैःस्वर्णमहीधरान् प्रतिगृहं संख्यावतां निर्ममे ॥९॥

ख्याताक्षीरधयोधधी समुदिते कुर्वन्ति संवर्तता-
मेतच्चित्रपदं जनस्य न भवत्याश्चर्यमाकर्ण्यताम् ।
भूपेन्द्रस्य बलाब्धयः प्रतिदिनं वृद्धिं वहन्तः परै-
र्दुर्लङ्घ्या द्विषतां सृजन्ति समयाभावेपि कल्पान्तता ॥१०॥

वेदचक्षुरतं श्रुत्वा बलवन्तं नराधिपम् ।
ब्रुवे योगावलिं तस्य मुदे पूर्वानुसारतः ॥११॥

CLOSING: रचितोयं संक्षेपाद्धोराशास्त्रस्य संदर्भः ।
अत्राज्ञताभ्रमाभ्यां कृकृतं तच्छोधनीयं ज्ञैः ॥३६॥

COLOPHON: इति श्रीमच्छत्रमणिकृता योगावली समाप्ता ।

x x x

5674/2789 वर्षपद्धति

श्रीगणेशाय नमः ।

OPENING: अथ वर्ष पद्धतिः—

॥ ओम् ॥

प्रणम्य वासरे क्षितुः पदांबुजद्वयं मया ।
तदज्ञबोधदायिनी वितन्यतेऽब्दपद्धतिः ॥१॥

अथ वर्षनयनम्:—

ओं गतवर्षाणां सपादमर्धं साधं कार्यम् अधस्तात्षष्टिहृतं लब्धम् ।
ऊर्ध्वाङ्के युतम् । जन्मवारादिभोज्यम् ।
पुनरधस्तात् षष्टिहृतं लब्धं ऊर्ध्वाङ्के युतम् ।

CLOSING: रामशैलधृतिश्चापि मधुशुक्लद्विके शनौ,
मोतीराम बुधेनेयं निर्मिता वर्षपद्धतिः ॥

COLOPHON: संवत् १८७३ इति श्रीमिश्रमोतीरामविरचितं वर्षपद्धतिः सम्पूर्णं मिती ज्येष्ठ कृष्णा बुधवासरे ।

Post-Colophon: संवत् १९०१ हस्ताक्षर लल्लूरामस्य ।

x x x

5855/2860 दोषज्ञानरत्नावलिः

OPENING :

श्रीगणेशाय नमः ॥

यस्योत्तमामलविभाञ्चितपादपद्मं,
द्वन्द्वं सुरासुरकिरीटमणिर्मयूखैः ।
संरज्यते कनकरत्नसुपीतसंस्थं,
तं देवदेवमहमात्मनि चिन्तयामि ॥१॥

श्रीमद्गुर्जरदेशभूषणमणिस्त्रंबावतीनामके,
श्रीपूर्णोनगरे बभूव सगुरुः श्रीभावरत्नाभिधः ।
तच्छिष्यो जयरत्न इत्यभिधाया यः पूर्णिमागच्छवा-
स्तेनेयं क्रियते जनोपकृतये श्रीज्ञानरत्नावली ॥२॥

CLOSING :

भृषे कर्कसा दोषमुग्रहृदि,
साददो दाहपित्तज्वरं च ।
कृतं तर्पणं चौलके क्षिप्रकं च,
शतेष्टाहुतिं होमयेद्गुग्गुलं च ॥६२॥

COLOPHON :

इति प्रश्नलग्नोपरि दोषरत्नावली सम्पूर्णम् ॥

x x x

5903/2826 प्रश्नरत्नसागर

OPENING :

श्रीकृष्णाय नमः ।

चचत्काञ्चनरुचये देववधूटीसुनेत्रमुखराय ।
नाभेयाय नमोस्तु केवलकमलात्मने तुभ्यम् ॥१॥

उत्पत्तिस्थितिसंहृतिप्रभृतिभिर्यो चित्करं [यों चीकरत्] जङ्गमं,
स्थाण्वप्राणभृतां प्रवृत्तिनिरतः स्वच्छन्दलीलामलः ।
धर्मं यो दशधानयत्सुकृतिनां योजीगणत्केवलो,
ब्राह्मीं वाचमनासाररसिकः कश्चिद्विभुक्तं श्रये ॥२॥

कौमारे युगधर्मभिश्च सवयैः साकं सभायां स्थिति-
स्तेषामग्निमयुग्मिना च कुतुकाविष्टेन पृष्टः प्रभुः ।
देवास्मानमलं त्रिकालविषयं ज्ञानं शुभं दर्शये-
त्युक्तः स्माह चमत्क्रियासु कुशलं शास्त्रं स्वयं रामलम् ॥३॥

आरभ्य तद्दिनमिदं सकलोपकारि,
प्रापत्सुविस्तरमनेकजनस्थलेषु ।
तैस्तैर्वितस्य निहितं निजपुस्तकेषु
वाचा स्वया जयति तद्रमलं त्विदानीम् ॥४॥

भूते भाविनि वर्त्तमानविषये यद्यद्यदाकाङ्क्षितं,
तत्तत्प्रष्टुरभीष्टमिष्टमखिलं साक्षात्करोति स्वयम् ।
प्रश्नोद्देशविधासु चिन्तितमुखास्वेतत्तदा वाङ्मय,
सत्याकूतविभावनेन सुधियां चेतश्चमत्कारकृत् ॥५॥

सन्त्यन्येपि सहस्रशो यदि भुवि ग्रन्थाः सुखप्रश्नदा-
स्तेषामध्ययनक्रियासु कुशला भूयोऽपि ते भूरिशः ।
संदेहप्रतिघातनाय सबलं नान्यद्विना रामलं,
तेनैत्प्रतिसावधानमनसा यत्नं कुरुध्वं बुधाः ॥६॥

अथ च—

श्रीपुण्डरीकः प्रथमं सुधर्मा,
ततश्च जम्बूप्रमुखा बभूवुः ।
संपूर्णपूर्वाङ्गविदो महान्तः,
स्वष्टाङ्गनैमित्तिकशास्त्रविज्ञाः ॥७॥

श्रीभद्रबाहुमुनिपुङ्गव एष पूर्वं,
सर्वाक्षरार्थनिपुणः प्रकटप्रभावः ।
विद्याचमत्कृतिवशेन जगत्यखण्डे,
चक्रे सुरासुरनरात्मनि चित्रमेकम् ॥८॥

श्रीभद्रबाहुगुरुणा बहुमुग्धबुद्धि-
बोधप्रदप्रकरणानि कृतानि पूर्वम् ।
उद्धृत्य सारमखिलं च निवेश्य तेषु,
दत्तानि तानि पठनाय तदर्थिनृभ्यः ॥९॥

CLOSING :

सोऽहं श्रीविजयादयाग्रहधरः श्रीवर्द्धमानार्हतः,
पट्टे दिग्गजदंतकेसमतिभरेऽकार्षं स्वयं स्वमलम् ।
शास्त्रं प्रश्नविचारसारसहितं लोके चमत्कारदं,
वर्षे चाष्टभिधानसंयममिते पौषे दशम्यां शितौ ।।११।।

यः सर्वातिशयैः श्रितः फणिपतिर्यं सेवते भक्तितो,
येन ध्वस्तमठः कठोभवदरं यस्मै नमो योगिने ।
यस्मादाविरभूदखण्डितवृषो यस्यामलं शासनं,
यस्मिन् ज्ञानमुखागुणा गणनयातीताः स पार्श्वः श्रिये ।।१२।।

श्रीपार्श्वनाथस्तुतनाकिनाथो,
यन्नाम्नाथोधिदधर्म्मधाम्नः ।
वामाप्रसू मानसराजहंसो,
जयत्यसौ सूर्यपुरावतंसः ।।१३।।

श्रीसूर्यमण्डनजिनेश्वरपादपद्म-
माहात्म्यतो विरचितो रमले निबन्धः ।
पद्यात्मकः प्रवरपाठक भोजनाम्ना,
निर्विघ्नशास्त्रपरिपूर्तिरपीह तस्मात् ।।१४।।

प्रथमादर्शे लिखितं सूर्यपुरे भोजसागरेणेदम् ।
पाठकवरेण सम्यक् श्रीपूज्यादेशतः शास्त्रम् ।।१५।।

COLOPHON : इति श्रीयवनाचार्यप्रणीते रमलमहोदधिधर्मधारक-श्रीविजदयासूरि-समुद्धृते प्रश्नरत्नसागरे पाठकभोजना[सा]गरसंदर्भितपद्यप्रकारे श्रीरमलतन्त्रे सबीजमंत्रे परिसमाप्ताध्यायो द्वाविंशतितमोऽध्यायः ।।

Post-colophonic : मिती मार्गशिरशुक्ला १२ गुरुवासरे संवत् १९०९ का. श्रीस्तु शुभं भूयात् ।

x x x

5934/2880 रमलतत्त्वशिरोमणिः

OPENING : श्रीगणेशाय नमः ।

अविरलमदनिर्वहं भ्रमरकुलानेकसेवितकपोलम् ।
अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥१॥

मोहमर्द अताकविरभूत इन्द्रप्रस्थे विशेषवित् ।
तेन रमलविनिर्णीतं मगजदला इतीरितम् ॥२॥

तन्मतं च विलोक्यार्थं कुर्वे रमलशिरोमणिम् ।
शिवरामद्विजो विश्वक्रमलशास्त्रार्थकीर्तिव[वि]त् ॥३॥

x x x

CLOSING : इन्द्रप्रस्थप्रशस्तराजनगरे, योऽभून्महमद अता,
तस्येयं कृतिरुत्तमातिविमला, प्रश्नैः मनोज्ञैर्युता ।
नुक्तासारविचारसारचतुरो, रमलार्थवित् कोविदः ॥४॥
.....॥१॥

श्रीमत्काथस्थकुलजस्सदानंद इति स्मृतः ।
पारसी तेन लिखिता विमला विशदाक्षरा ॥२॥

तस्मान्मयाव्यलोकिष्ट शिवरामेण चादरात् ।
पुस्तक संस्कृतयुतं स्पष्टार्थं विशदाक्षरम् ॥३॥

वर्षे वि(क्र)म केष(ड)ष्टवसुभूभाद्रे सिते चाष्टमी,
जीवे मैत्रभसं युतेपि च सदा योगे तथा वैधृतौ ।
.....।
उल्लासत्रयसंयुत च नगरे कोले मनोज्ञे मया ॥४॥

अधुना पठनाय पाठकानामशेषनिश्चयवदामि सम्यक्-
एषांबुद्धिप्रकाशनायमस्माद् वाचः सिद्धिः सुपेशला भवन्तु ॥५॥

स्नात्वा ग्रन्थं नत्वा विप्रान् पूजयित्वाक्षतैर्धनपुष्पैरमलम् ।
लिखितं योग्यं शुभशकुनैः शुभवचनैरुभौयुक्तौ ॥६॥

COLOPHON : इति रमलशास्त्रे रमलतत्त्वे तृतीय प्रकरणम् ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥

Post-colophonic : मिति पौष बदी ४ बृहस्पतिवार संवत् १९१२ । लिखितं लालारामलेखकेन ।

x x x

5935/2870 रमलदिवाकरः

OPENING: श्रीगणेशाय नमः ॥ श्रीभगवत्यै नमः ।

अथ रमलदिवाकर लिख्यते । श्रीयवनाचार्याय नमः ।

श्रीगोपालं नमस्कृत्य गणेशं भारतीं रविम् ।
गुरुपादाम्बुजं चैव सर्वविघ्नोपशान्तये ॥१॥

यवनानां विलोक्यैव रमलापारसागरम् ।
रत्ननिष्कासयत्नेन, सुशिष्यसुखहेतवे ॥२॥

कृतो रामप्रसादेन ग्रन्थो रम्लदिवाकरः ।
देयः शिष्याय पुत्राय न देयो यस्य कस्यचित् ॥३॥

गुरोर्हृधीत्याखिलरम्लविद्याः पीयूषवक्ता कुशलः क्रियासु ।
स्वेष्टं सदाराधयतस्तपस्वी, गुरोः पदाम्भोरुहभक्तिशीलः ॥४॥

CLOSING: इत्येवं फल (?) संज्ञात्वा वर्षे वर्षे पुनर्मुनः ।
यवनाचार्यप्रसादेन रमलज्ञपुराकथम् ॥४४॥

अस्मिन् ग्रंथे सर्वप्रश्नं प्रसिद्धं, ये ये पुंसाकाग्येद् भूतलेषु ।
ते ते सर्वे कारणं चोत्तरं च, पूर्वाचार्यं भाषितं तत्क्रमेण ॥४५॥

गौडान्वये रामप्रसाद शर्मा
करोमि ग्रन्थं जग कारण हेतुः [जगतो हिताय] ।
प्रश्नार्थगर्भञ्च मितक्रियान्वितं,
सद्योपकारी फलशीघ्रदाता ॥४६॥

सर्वोपरि विजानीयाद् ग्रन्थं रमलदिवाकरम् ।
देशे पाञ्चालके प्राप्तं गुरोर्यवनप्रसादतः ॥४७॥

COLOPHON: इति श्रीगौडान्वये रामप्रसादशर्मणा कृतो रमलदिवाकरग्रन्थः समाप्तः ।

x x x